९१/15

अथ

२१/१५

ग्रन्थनामः- "वाल्मीकिरामायणम्" (बालकाण्डः)

कर्तृनामः- वाल्मीकिमुनिः ।

विषयः- काव्यम् ।

464

Valmiki Ramayana (Baalkand).

॥ वाल्मिकिरामायण बाल कांड प्रारंभः पत्र संख्या ८२ ॥श्रीः॥

वाल्मी॰ रामा॰ बाल॰

श्रीमद्गणपतये नमः॥ ॥श्रीमद्वेंकटेशाय नमः॥ ॥जयति रघुवंशतिलकः कौसल्याहृदयनंदनो रामः॥ दशवदननिध
नकारी दाशरथिः पुंडरीकाक्षः॥१॥ नमस्तस्मै मुनीशाय श्रीयुताय तपस्विने॥ सर्वशास्त्राधिवासाय वाल्मीकिमुनये नमः॥२॥
तपस्स्वाध्यायनिरतं तपस्वी वाग्विदां वरं॥ नारदं परिपप्रच्छ वाल्मीकिर्मुनिसत्तमः॥१॥ कोन्वस्मिन्प्रथितो लोके सद्गुणैर्गुणवा
न्॥ धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः॥ उदाराचारसंपन्नः सर्वभूतहितश्च कः॥ वीर्यवांश्च वदान्यश्च कश्चापि प्रिय
दर्शनः॥ जितक्रोधो महात्मा कश्च द्युतिमान्कोनसूयकः॥ संजातरोषात्कस्माच्च देवताअपि बिभ्यति॥ क उदारः समर्थश्च त्रैलो
क्यस्यापि रक्षणे॥ कः प्रजानुग्रहकरः को निधिर्गुणसंपदां॥ समग्रा रूपिणी लक्ष्मीः कमेकं संश्रिता नरं॥ अग्न्यानलसूर्ये
न्दुशक्रोपेंद्रसमश्च कः॥८॥ एतदिच्छाम्यहं श्रोतुं त्वत्तो नारद तत्वतः॥ देवर्षे त्वं समर्थोसि ज्ञातुमेवंविधं नरं॥ कालत्रय
ज्ञस्तच्छ्रुत्वा वाल्मीकिनोदितं वचः॥ श्रूयतामित्युपामंत्र्य तमृषिं प्रत्यभाषत॥ बहवो दुर्लभाश्चैव त्वयि ते कीर्तिता गुणाः॥१०॥
कस्मिन्नपि न लोके स्मिन्गुणाएते सुदुर्लभाः॥ देवेष्वपि न पश्यामि किंचिदेभिर्गुणैर्युतं॥ श्रूयतां तु गुणैरेभिर्युक्तो नरचं
द्रमाः॥ इक्ष्वाकुवंशप्रभवो रामो नाम गुणाकरः॥ एतैरभ्यधिकैश्चैव गुणैर्युक्तो महाद्युतिः॥ नियतात्मा महासत्वो द्युतिमान्धृ
तिमान्वशी॥ बुद्धिमान्नीतिमान्वाग्मी श्रीमाञ्छत्रुनिबर्हणः॥ विपुलांसो महाबाहुः कंबुग्रीवो महाहनुः॥ महोरस्को महेष्वासो मह
तेजा गूढजत्रुररिंदमः॥ आजानुबाहुः सुशिरा बलवान्सत्यविक्रमः॥ समः समविभक्तांगः स्निग्धवर्णः प्रतापवान्॥
विशालाक्षः पीनवक्षा लक्ष्मीवान्शुभलक्षणः॥ धर्मज्ञः सत्यसंधश्च जितक्रोधो जितेंद्रियः॥ मनस्वी ज्ञानसंपन्नः शुचिर्वीर्य

राव
॥१॥

समन्वितः॥ रक्षिता सर्वलोकस्य धर्मस्य परिरक्षिता॥ सर्ववेदांगविच्चैव सर्वशास्त्रविशारदः॥ सर्वशास्त्रार्थतत्वज्ञो नीतिमान्प्रीति
मानभवत्॥ सर्वलोकप्रियः साधुरदीनात्मा बहुश्रुतः॥ सर्वदानुगतः सद्भिः समुद्र इव पर्वणि॥२०॥ स सत्यः ससमः सौम्यः सचै
कप्रियदर्शकः॥ रामः सर्वगुणोपेतः कौसल्यानंदवर्धनः॥ समुद्र इव गांभीर्ये स्थैर्ये च हिमवानिव॥ विष्णुना सदृशो वीर्ये
सोमवत्प्रियदर्शनः॥ कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः॥ धनदस्य समस्त्यागे सत्येष्वनुपमः सदा॥ राममार्यगुणै
र्युक्तं प्रियं दशरथः सुतं॥ यौवराज्येन संयोक्तुमियेष समहाद्युतिः॥ तस्याभिषेकसंभारान्दृष्ट्वा कैकेयवंशजा॥ पूर्वदत्तवरा
राज्ञा वरमेनमयाचत॥ विवासनं च रामस्य भरतस्याभिषेचनं॥ स सत्यवचनाद्राजा धर्मपाशेन संयुतः॥ विवासयामा
स सुतं रामं दशरथः प्रियं॥ स जगाम वनं वीरः प्रतिज्ञामनुपालयन्॥ पितुर्वचननिर्देशात्कैकेय्याः प्रियकारणात्॥ तं
यांतमनुजो धीमान्भ्रातरं राममग्रजे॥ लक्ष्मणो नाम विनयादनुवव्राज वीर्यवान्॥ सर्वलक्षणसंपन्ना भार्या चैनमनुव्रता॥
अनुवव्राज वैदेही सीता नाम शुभव्रता॥ रूपयौवनमाधुर्यशीलाचारसमन्विता॥३०॥ वसौ सानुगता रामं निशाकर मि
व प्रभा॥ पौरैरनुगतो दूरं पित्रा दशरथेन च॥ शृंगवेरपुरे पुत्रं गंगाकूले व्यसर्जयत्॥ सोतीत्य वनदुर्गाणि सरितश्च सरांसि
च॥ गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियं॥ गुहेन सहितो रामो लक्ष्मणेन च सीतया॥ चित्रकूटं ययौ शैलं भरद्वाज
स्य शासनात्॥ रम्यमावसथं कृत्वा तत्र रामः सलक्ष्मणः॥ उवास सीतया सार्धं वल्कलाजिनसंवृतः॥ श्रीमद्भिस्तैस्त्रिभि
सार्धं चित्रकूटे रराज सः॥ अधिष्ठितो यथा मेरुः श्रीविश्रवणशंकरैः॥ चित्रकूटं गते रामे पुत्रशोकार्दितः सदा॥ राजा दशरथः

वाल्मी॰रामा॰बा॰
॥२॥

स्वर्गमगमद्विलपन्सुतं॥ गते तस्मिंस्तु भरतो वसिष्ठप्रमुखैर्द्विजैः॥ प्रचोदितोपि राज्याय नैछद्राज्यं महायशाः॥ मृतेपि पितरि धर्मात्मा रा
ज्यत्वे सपुरस्कृतः॥ राज्यनेत्यपरित्यज्य रामं द्रष्टुमुपागतः॥ पादुके चास्य राज्याय न्यासं दत्वा पुनः पुनः॥ निवर्तयामास ततो भरतं भर
ताग्रजः॥ स काममनवाप्यैव गृहीत्वा रामपादुके॥४०॥ नंदिग्रामेकरोद्राज्यं रामागमनकांक्षया॥ आशंकमानश्च पुनः पौरजानप
दागमं॥ रामोपि हित्वा तं शैलं प्रययौ दंडकं वनं॥ विराधं राक्षसं हत्वा शरभंगं ददर्श ह॥ सुतीक्ष्णं चाप्यगस्त्यं च महेंद्रं भ्रातरं तथा॥
अगस्त्यवचनाच्चैव जग्राहैंद्रं धनुस्तथा॥ आलक्ष्य परमप्रीतस्तूणौ चाक्षयसायकौ॥ वसतस्तत्र रामस्य वने वनचरैः सह ऋषी
भ्यः कामरूपिभ्यो ऋषयोप्यागमन्भयात्॥ रामं कमलपत्राक्षं चारण्ये चारशोभिणी॥ महेंद्रमिव दुर्धर्षं बाणखड्गधनुर्धरं॥ तेन तत्र मह
भ्रात्रा जनस्थाननिवासिनी॥ विरूपिता शूर्पनखा राक्षसी कामरूपिणी॥ ततः शूर्पनखा वाक्यादागतान्सर्वराक्षसान्॥ खरं च दू
षणं चैव रक्षस्त्रिशिरसमेव च॥ निजघान रणे राम एकस्तान्सर्वराक्षसान्॥ तेषामनुबलं चैव सहस्राणि चतुर्दश॥ ततो ज्ञाति
वधं श्रुत्वा रक्षस्त्रैलोक्यविश्रुतः॥ नाम्ना तु रावणो नाम कामरूपी महाबलः॥ राक्षसाधिपतिः शूरो रावणः क्रोधमूर्छितः॥५०॥
सहायं वरयामास मारीचं नाम राक्षसं॥ वार्यमाणोपि बहुशो मारीचेन स रावणः॥ न विरोधो बलवता क्षमो रावण तेन च॥ राव
अनादृत्य तु तद्वाक्यं रावणः कालचोदितः॥ जगाम सहमारीचो रामाश्रमपदं ततः॥ तेन मायाविना दूरमपवाह्य नृपात्मजौ॥ ॥२॥
रावणोतरमासाद्य सीतां सुरसुतोपमां॥ जहार भार्यां रामस्य हत्वा गृध्रं जटायुषं॥ गृध्रं तु निहतं दृष्ट्वा तां भार्यां चैव दुर्लभां॥

राघवः शोकसंतप्तो विललापाकुलेंद्रियः॥ ततः स तत्र काकुत्स्थो दग्ध्वा तत्र जटायुषं॥ कबंधं ददृशे भूयो दनोः पुत्रं मह
बलं॥ तस्मतेनैव कोपेन कबंधं घोरदर्शनं॥ निहत्य काष्टैरदहत्सोभूद्दिव्यवपुस्तदा॥ कथयामास रामस्य श्रवणा
शबरीं ततः॥ शबरीं धर्मनिपुणामभिगछद्रघूद्वह॥ तस्यैव वचनाद्रामो लक्ष्मणेन सहानघ॥ अभ्यागछन्महाते
जाः शबरीं शत्रुसूदनः॥ शबर्या पूजितः सम्यग्रामो दशरथात्मजः॥ पंपातीरे हनुमता वानरेण स संगतः॥६०॥ हनु
मद्वचनाच्चैव सुग्रीवेण समागतः॥ सुग्रीवस्य च तत्सर्वं रामो शंसन्महाबलः॥ सुग्रीवस्य च रामस्य श्रुत्वा वाक्यं महा
त्मनः॥ चक्रे वानरराजेन वैरानुकथनं महत्॥ रामेनिवेदितं सर्वं प्रणयाद्दुःखितेन च॥ वालिनश्च बलं तत्र कथया
मास वानरः॥ प्रतिज्ञातं तु रामेण तदा वालिवधं प्रति॥ रामेण बलवीरेण सुग्रीवः शंकितोभवत्॥ रामो संप्रत्ययेद्दृष्ट्वा
सुग्रीवो वानराधिपे॥ पादेन दुंदुभेः कायं चिक्षेप तान्नयोजनं॥ बिभेद च ससप्त तालांश्च शरेणानतपर्वणा॥ गिरिरेसातं
लं चैव जनयंस्तस्य विस्मयं॥ ततः प्रीतमनास्तस्य कर्मणा तेन सोभवत्॥ सुग्रीवो वानरश्रेष्ठः परं हर्षमवाप्य च॥
ततो वानरराजेन कृत्वा सख्यं महाबलः॥ प्रत्यहे जनयामास तदान्योन्यस्य वै मिथः॥ समर्थयौ ततः हत्वा वानर
वानरपुंगवो॥ किष्किंधीं रामसुग्रीवौ जग्मतुस्तौ गुहां तथा॥ ततो गर्जद्धरिवरः सुग्रीवो मेघनिःस्वनः॥ तेन

वाल्मी॰ राम॰ बा॰
॥३॥

नारदेन महता निर्जगाम हरीश्वरः ॥७०॥ ततः सुग्रीववचनाद्धत्वा वालिनमाहवे ॥ सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत् ॥ स
च सर्वान् समानीय वानरान् वानरर्षभः ॥ दिशः प्रस्थापयामास दिदृक्षुर्जनकात्मजाम् ॥ ततो गृध्रस्य वचनात् संपातेर्हनुमान् बली ॥ शतयोजनविस्तीर्णं पुप्लुवे लवणार्णवम् ॥ तत्र लंकां समासाद्य पुरीं रावणपालितां ॥
ददर्श सीतां ध्यायन्तीमशोकवनिकां गताम् ॥ निवेदयित्वाभिज्ञानं प्रवृत्तिं च निवेद्य च ॥ समाश्वास्य च वैदेहीं मर्दयामास तोरणम् ॥
पंच सेनाग्रगान् हत्वा सप्त मन्त्रिसुतानपि ॥ शूरमक्षं च निष्पिष्य ग्रहणं समुपागमत् ॥ अस्त्रेणोन्मुक्तमात्मानं
ज्ञात्वा पैतामहाद्वरात् ॥ मर्षयन् राक्षसान् वीरो यन्त्रिणस्तान् यदृच्छया ॥ ततो दग्ध्वा पुरीं लंकामृते सीतां च मैथिलीम् ॥ रामाय प्रियमाख्यातुं पुनरायान्महाकपिः ॥ सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणम् ॥ न्यवेदयदमेयात्मा दृष्टा सीतेति तत्त्वतः ॥
ततः सुग्रीवसहितो गत्वा तीरं महोदधेः ॥ समुद्रं क्षोभयामास शरैरादित्यसन्निभैः ॥ दर्शयामास चात्मानं समुद्रः सरितां पतिः ॥ समुद्रवचनाच्चैव नलं सेतुमकारयत् ॥ तेन गत्वा पुरीं लंकां हत्वा रावणमाहवे ॥ रामः सीतामनुप्राप्य परां व्रीडामुपागमत् ॥ ...

वाल्मी॰ राम॰ बा॰ ॥३॥

नारदेन महतानिर्जगामहरीश्वरः ॥७०॥ ततः सुग्रीववचनाद्धत्वावालिनमाहवे ॥ सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत् ॥ स
च सर्वान्समानीय वानरान्वानरर्षभः ॥ शतयोजनविस्तीर्णं पुप्लुवेमकरालयं ॥ ततो लंकां समासाद्य पुरीं रावणपालितां ॥
ददर्श सीतां ध्यायन्तीमशोकवनिकागतां ॥ निवेद्य चाप्यभिज्ञानं प्रवृत्तिं विनिवेद्य च ॥ गृहीताप्रत्यभिज्ञानेमर्दयामास ते
कृतान् ॥ पंच मंत्रिसुतान् हत्वा पुंचसेनाग्रगानपि ॥ कुमारमक्षं निष्पिष्य ग्रहणं समुपागमत् ॥ अस्त्रात् हि मुन्यचात्मानं
ज्ञात्वा पैतामहान्वरान् ॥ मर्षयद्राक्षसान्वीरो यन्त्रिणां तायदृच्छया ॥ ततो दग्ध्वा पुरीं पुनर्दृष्ट्वा च मैथिलीं ॥ समाश्वास्य च
वैदेहीं पुनरायान्महाकपिः ॥ सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणं ॥ निवेदयामास तेदा दृष्टा सीतामयेति वै ॥
ततः सुग्रीवसहितो गत्वा तीरं महोदधेः ॥ समुद्रं क्षोभयामास शरैरादित्यसन्निभैः ॥ दर्शयामास चात्मानं समुद्रोरा
घवस्य च ॥ समुद्रवचनाच्चैव नलः सेतुमकारयत् ॥ तेन गत्वा पुरीं लंकां राक्षसेंद्रं बिभीषणं ॥ कर्मणा तेन महता देवा
इंद्रपुरोगमाः ॥ सदेवर्षिगणास्तत्र मा राघवं तेऽभ्यपूजयन् ॥ यथा परमसंतुष्टाः पूजितः सर्वदैवतैः ॥ कृतकृत्यस्तदा रा
मो विज्वरः समपद्यत ॥ देवेभ्यः सवरान्प्राप्य रामः सीतामवाप्य च ॥ पुष्पके च समारुह्य नंदिग्राममुपागतः ॥ नं
दिग्रामे जटां छित्वा भ्रातृभिः सह राघवः ॥ रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवान् ॥ ईजे च विविधैर्यज्ञैर्हत्वा
तं लोककंटकं ॥ सीतया सहितः श्रीमान् रेमे च मुदितः सुखी ॥ पालयामास चैवेमाः पितृवन्मुदिताः प्रजाः ॥ लंका

शर्व
॥३॥

अयोध्याधिपतिः श्रीमान् राजा दशरथात्मजः ॥ हृष्टः प्रमुदितो लोकः हृष्टपुष्टः सधार्मिकः ॥ निरामयो निरोगश्च दुर्भिक्षा
यासवर्जितः ॥ न पुत्रमरणं केचित्सश्यंति स्म नराः क्वचित् ॥ नार्यश्चाविधवा नित्यं पतिशुश्रूषणे रताः ॥ न वातजं भयं किंचि
न्नाप्सु मज्जंति जंतवः ॥ न चाग्निजं भयं किंचिद्यथा कृतयुगे तथा ॥ न तु स्वराष्ट्रे विधवा नानाथास्तत्र नाबुधाः ॥ न दुर्गतो न
कृपणो नव्याध्यर्तोऽभवेन्नरः ॥ अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः ॥ गवां शतसहस्राणि बहूनि सहितास्यति ॥ ब
हून्यश्वांश्च राज्ञः स राघवो वै करिष्यति ॥ चातुर्वर्ण्यं च लोकेस्मिन्स्वधर्मे स्थापयिष्यति ॥ दशवर्षसहस्राणि दशवर्षशता
नि च ॥ रामो राज्यमुपास्यासौ विष्णुलोकं गमिष्यति ॥ स सर्वगुणसंपन्नः श्रीमान् जितशासनः ॥ यन्मां पृच्छसि वाल्मीकि राम एभिर्गुणैर्युतः ॥
नारदस्य वचः श्रुत्वा वाल्मीकिरिदमब्रवीत् ॥ देवर्षे यत्त्वया प्रोक्ता गुणाः पुरुषदुर्लभाः ॥ तेषां तु समवायस्त्वं संप्रति राममाश्रितः ॥
इदमाख्यानमायुष्यं यशस्यं बलवर्धनं ॥ यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते ॥ इदं पठन्सदा ध्यायन्पुण्यश्रवणकीर्तनं
सपुत्रपौत्रप्रवरो नरः कृच्छ्राद्विमुच्यते ॥ रामायणमशेषं च तेन च श्रावितं भवेत् ॥ यद्वेदविद् पर्यध्ये पठेच्छ्रद्धासमन्वितः ॥
पठन्द्विजो वागृषभत्वमीयात्क्षत्रान्वयो भूमिपतित्वमीयात् ॥ वणिग्जनः पुण्यफलत्वमीयाच्छूद्रो हि शूद्रोऽपि महत्त्वमीयात् ॥
॥ ॥१००॥ ॥ ॥ इत्यार्षे रामायणे बालकांडे नारदवाक्यं नाम संक्षेपरामायणं नाम प्रथमः सर्गः ॥ ॥ ॥छ॥
नारदस्याथ तद्वाक्यं श्रुत्वा वाक्यविशारदः ॥ वाल्मीकिः शिष्यसहितो विस्मयं परमं ययौ ॥ मनसैव च रामाय पूजां चक्रे
महामुनिः ॥ तं चापि शिष्यसहितो नारदं प्रत्यपूजयत् ॥ यथावत्पूजितस्तेन देवर्षिर्नारदस्ततः ॥ तमापृच्छ्याभ्य

पूजितो जगाम त्रिदिवान्वयं॥ स मुहूर्तं गते तस्मिन्देवलोकाय नारदे॥ जगाम तमसातीरं वाल्मीकिर्मुनिसत्तमः॥ स तु तीरं
समासाद्य तमसाया महामुनिः॥ शिष्यमाह स्थितं पार्श्वे दृष्ट्वा तीर्थमकर्दमं॥ निःशङ्करमिदं तीर्थं भारद्वाज निशामय॥ पुण्यं चैव
प्रसन्नं च सज्जनानीय यथा मनः॥ इदं तीर्थं समं सौम्य सुजलं सूक्ष्मवालुकं॥ अस्मिन्नेवावगाहिष्ये तीर्थे हि तमसाजले॥
वल्कलं त्वमिहादाय शीघ्रमेह्याश्रमात्पुनः॥ यथा कालात्ययो न स्यात्तथा साधु विधीयतां॥ स गुरोर्वचनाच्छीघ्रं पु
नरागम्य चाश्रमात्॥ आनीय वल्कलं तस्मै गुरवे प्रत्यवेदयत्॥ स शिष्यहस्तादादाय परिधाय च वल्कलं॥ अवगाह्य
जले स्नात्वा जप्त्वा जप्यं च वाग्यतः॥१०॥ तर्पयित्वा च विधिवत्तोयेन पितृदेवताः॥ निरीक्ष्यमाणो विचरन्सर्वतस्तम
सावनं॥ ततः स तमसातीरे विचरं तमभीतवत्॥ ददर्श क्रौंचयोस्तत्र मिथुनं चारुदर्शनं॥ तस्मात्तु मिथुनादेकमाग
त्यानुपलक्षितः॥ जघान बद्धानुशयो निषादो मुनिसन्निधौ॥ तं शोणितपरीतांगं चेष्टमानं महीतले॥ दृष्ट्वा क्रौं
ची तु रावार्त्तं करुणं खे परिभ्रमा॥ तत्र तथा निहतं दृष्ट्वा निषादेनांडजं वने॥ मुनेः शिष्यसहायस्य कारुण्यं समजायत॥
ततः करुणवेदित्वा धर्मात्मा स द्विजोत्तमः॥ निशाम्य करुणं क्रौंचीं रुदतीं तां जगाविदं॥ मा निषाद प्रतिष्ठां त्वमगमः शा
श्वतीः समाः॥ यत्क्रौंचमिथुनादेकमवधीः काममोहितं॥ तस्येदमुक्त्वा वचनं चिंताभूत्तस्य नेतरं॥ शाकुनं शोचता ॥४॥
ह्येवं किमेतद्व्याहृतं मया॥ सुहूर्तमिव च ध्यात्वा वाक्यं तत्स विनिश्चयं॥ शिष्यमाह स्थितं पार्श्वे भारद्वाजमिदं

वचः॥ पादैश्चतुर्भिः संयुक्तमभिद्वाक्यं समाक्षरैः॥ शोचतोक्तं मया यस्मात्तस्माच्छ्लोको भवत्विति॥२०॥ शिष्योथ तस्य तच्छ्रुत्वा
मुनेर्वाक्यमनुत्तमं॥ तथेति प्रतिजग्राह गुरोः प्रीतिं प्रदर्शयन्॥ स भाषमाण एवाथ शिष्येण सहितस्तदा॥ तमेव चिंत
यन्नर्थमाश्रमायन्यवर्त्तत॥ तमन्वयाद्द्वितीयात्मा भारद्वाजो महामुनिः॥ कलशं पूर्णमादाय पृष्ठतो ऽनुजगाम ह॥ स प्र
विश्याश्रमपदं शिष्येण सह धर्मवित्॥ उपविष्टः कथाश्चान्याश्चकार ध्यानमास्थितः॥ आजगाम ततो ब्रह्मा लो
ककर्त्ता स्वयं प्रभुः॥ चतुर्मुखो महातेजा द्रष्टुं तमृषिपुंगवं॥ वाल्मीकिरथ तं दृष्ट्वा सहसोत्थाय वाग्यतः॥ प्रांजलिः
प्रणतो भूत्वा तस्थौ परमविस्मितः॥ पूजयामास चैवैनं पाद्यार्घ्यासनवंदनैः॥ प्रणतो विधिवच्चैनं दृष्ट्वा नामयमव्ययं
व्ययं॥ अथोपविश्य भगवानासने परमार्चिते॥ वाल्मीकये थासनं संदिदेशानंतरं ततः॥ उपविष्टे ततस्तस्मिन्सा
क्षाल्लोकपितामहे॥ तद्गतेनैव मनसा वाल्मीकिर्ध्यानमास्थितः॥ शोचन्निव मुहुः क्रौंचीं ततः श्लोकमिमं पुनः॥
जगावंतर्गतमना भूत्वा शोकपरायणः॥ हतं पापात्मना कष्टं व्याधेनानात्मबुद्धिना॥ यस्तु चारुरवं क्रौंचमेवं पीतत्र
कारणात्॥ तमुवाच ततो ब्रह्मा प्रहसन्मुनिसत्तमं॥ महर्षे यदयं प्रोक्तस्त्वया क्रौंचवधाश्रयः॥ श्लोक एवास्त्वयं बध
स्तव वाक्यस्य शोचतः॥ त्वच्छंदादेव ते ब्रह्मन्प्रवृत्तेयं सरस्वती॥ रामस्य चरितं कृत्स्नं कुरु त्वमृषिसत्तम॥
धर्मात्मनो गुणवतो लोके रामस्य धीमतः॥ रामस्य वृत्तं प्रथय यथा ते नारदाच्छ्रुतं॥ रहस्यं च प्रकाशं च यद्वृत्तं तस्य
धीमतः॥ रामस्य ससहायस्य राक्षसानां च सर्वशः॥ वैदेह्याश्चैव यद्वृत्तं प्रकाशं यदि वा रहः॥ तत्राप्यविदितं सर्वं वि

वाल्मी० रामा० बाल०
॥५॥

तं ते भविष्यति ॥ स दारेण सराष्ट्रेण राज्ञा दशरथेन यत् ॥ आसितं भाषितं चेष्टितं यच्चाप्यनुष्ठितं ॥ न ते वागनृतं काचिदत्र
काव्ये भविष्यति ॥ कुरु रामकथां पुण्यां श्लोकबद्धां मनोरमां ॥ यावत्स्थास्यंति गिरयः सरितश्च महीतले ॥ तावद्रामायणक
था लोकेषु प्रचरिष्यति ॥ तावदूर्ध्वगतिश्च त्वं मल्लोकेषु निवत्स्यसि ॥ ४० ॥ इत्युक्त्वा भगवान्ब्रह्मा तत्रैवांतरधीयत
ततः सशिष्यो वाल्मीकिर्विस्मयं परमं ययौ ॥ तस्य शिष्यास्ततः सर्वे जगुः श्लोकमिमं तदा ॥ मुहुर्मुहुः प्रीयमाणाः प्राहु
श्च भृशविस्मिताः ॥ समाक्षरैश्चतुर्भिर्यः पादैर्गीतो महात्मना ॥ सोनुव्याहरणाद्भूयः शोकः श्लोकत्वमागतः ॥ त
स्य बुद्धिरभूत्तत्र वाल्मीकेरथ धीमतः ॥ कृत्स्नं रामायणं श्लोकैरीदृशैः करवाण्यहं ॥ धर्मज्ञानार्थसंबंधं बहुचि
त्रार्थविस्तरं ॥ समुद्रइव रत्नाढ्यं लोकश्रुतिरसायनं ॥ उदारवृत्तार्थपदैर्मनोहरैस्ततः स रामस्य चकार कीर्ति
मान् ॥ समाक्षरैः श्लोकशतैर्यशस्विनो यशस्करं काव्यमुदारधीर्मुनिः ॥ ४६ ॥ ॥ इत्यार्षे रामायणे बालकां
डे ब्रह्मागमनं नाम द्वितीयः सर्गः ॥ ॥ प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवानृषिः ॥ चकार चरितं चित्रं विचि
त्रपदमर्थवत् ॥ पवित्रं वैष्णवं दिव्यमिदमाख्यानमुत्तमं ॥ वेदैश्चतुर्भिः संमितमितिहासं पुरातनं ॥ श्रावयामास वै वि
प्रान् सुव्रतान्नियतेंद्रियान् ॥ धौम्यमौद्गल्यकुशिकान्साण्डिषेणान्सकोहलान् ॥ इक्ष्वाकुवंशदायादौ मुनिवेषौ कुशी
लवौ ॥ धन्यं यशस्यमायुष्यं स्वर्ग्यं स्वस्त्ययनं महत् ॥ कृत्वा च तत्ततः कीर्तिं राघवस्य महात्मनः ॥ इहैवार्थश्च धर्मश्च सर्ग
निखिलेनोपलभ्यते ॥ दंडनीतिश्च विपुला त्रयी वार्त्ता च कृत्स्नशः ॥ य इदं शृणुयान्नित्यं यश्चेदं परिकीर्तयेत् ॥ इह भोग ॥५॥

नराः प्राप्य देवैर्गच्छति शुश्रुतां ॥ इक्ष्वाकूणामिदं चैव जनकस्य च धीमतः ॥ पुत्रस्यास्य च देवर्षेः कीर्तनं समुदाहृतं ॥ अ
श्वमेधावसाने च राघवस्य महात्मनः ॥ कथितं त्वृष्टिजननमिदमाख्यानमादितः ॥ यो धर्मार्थसंयुक्तं पापानां पावनं
शुभं ॥ आदिकांडमिहप्रोक्तं विस्तरश्चास्य कथ्यते ॥ प्रथमं नारदप्रश्नो नदीगमनमेव च ॥ ब्रह्मणो दर्शनं चैव
वरप्राप्तिश्च पुष्कला ॥ श्लोकानां परिमाणं च यत्रैतत्परिकीर्त्यते ॥ अयोध्यावर्णनं चैव राज्ञो दशरथस्य च ॥ अमात्य
वर्णनं चैव कोसल्यायाश्च वर्णनं ॥ पुत्रार्थश्च नरेंद्रस्य मंत्रणं समुदाहृतं ॥ अश्वमेधक्रिया चैव वरप्राप्तिश्च पुष्कला ॥ भाग
र्थिनां च देवानामागमः समुदाहृतः ॥ रावणस्य वधोपायमंत्रणं समुदाहृतं ॥ अंशावतरणं चात्र सुराणां समुदाहृतं ॥ दिव्य
पायसोत्पत्तिः पुत्रजन्म नृपस्य च ॥ कोसल्यायां च रामस्य कैकेय्यां भरतस्य च ॥ यमयोश्च सुमित्रायां संभवः समु
दाहृतः ॥ वानराणां च सर्वेषामुत्पत्तिः परिकीर्तिता ॥ राज्ञो दशरथस्येह विश्वामित्रेण संगमः ॥ प्रदानं चैव रामस्य रक्ष
णार्थे महाक्रतोः ॥ लक्ष्मणानुगमश्चैव विद्याप्राप्तिश्च पुष्कला ॥ अनंगाश्रमवासश्च ताटकावनदर्शनं ॥ ताटका
याश्च निधनमस्त्रलाभश्च कीर्त्यते ॥ सिद्धाश्रमनिवासश्च सत्ररक्षणमेव च ॥ सुबाहोर्निधनं चात्र मारीचस्य च द
र्शनं ॥ विश्वामित्रस्य चैवर्षेः स्ववंशपरिकीर्तनं ॥ गंगायाः प्रभवश्चैव पवित्रः परिकीर्तितः ॥ दिव्यगर्भावपतनं कार्तिके
यस्य संभवः ॥ विशालस्य च राजर्षेर्वंशस्य परिकीर्तनं ॥ अहल्याशापमोक्षश्च मिथिलायाश्च दर्शनं ॥ दर्शनं य
ज्ञवाटस्य मैथिलस्य च दर्शनं ॥ २० ॥ चरितं चैव कार्त्स्न्येन कौशिकस्य महात्मनः ॥ कथितं चात्र रामस्य शतानंदे

वाल्मी॰ रामा॰ बा॰
॥६॥

नधीमता॥ धनुषोपि दर्शनं चैव कन्यायाश्च निवेदनं॥ राज्ञो दशरथस्येह जनकस्य च संगमः॥ सीतादीनां च कन्यानां विवाहः परिकी-
र्तितः॥ वधूर्गृहीत्वा च पुनर्यानं दशरथस्य च॥ समागमश्च रामस्य जामदग्न्येन धीमता॥ जामदग्न्यस्य तत्रोक्तानां बधश्चात्रानुकीर्तितः॥
अयोध्यां संप्रवेशश्च प्रवासो भरतस्य च॥ अयोध्यावासिनां चैव प्रमोदः परिकीर्तितः॥२५॥ इत्येतत्प्रथमे कांडमादिकांडमिहो-
च्यते॥ सर्गाश्चैव चतुःषष्ठिः श्लोकानां चैव कीर्त्यते॥ द्वे सहस्रे शतान्यष्टौ श्लोकाः पंच दशैव तु॥ बाले च यौहि यत्रोक्ता राघवस्य
महात्मनः॥ अतःपरं द्वितीयं तदयोध्याकांडसंज्ञितं॥ यत्राभिषेकसंकल्पो व्याघातश्चैव कीर्त्यते॥ कैकेय्या नुनयश्चैव वृद्धो
कौशल्यादशरथस्य च॥ वनप्रयाणं रामस्य लक्ष्मणानुगतिस्तथा॥ विषादः प्रकृतीनां च तथैव च विसर्जनं॥ निषादाधिपसंवा-
दः सूतस्य च विसर्जनं॥३०॥ गंगायाश्चैव संतारो भरद्वाजस्य दर्शनं॥ भरद्वाजस्य चानुज्ञा चित्रकूटस्य दर्शनं॥ वास्तु-
कर्मनिवेशश्च चित्रकूटे महागिरौ॥ उपावृत्ते सुमंत्रे च पुराशोको महागमः परः॥ स्वशापकथनं चैव स्वर्गप्राप्तिर्नृपस्य च॥
भरतागमनं तूर्णं तथा राजगृहादपि॥ रामप्रसादनार्थं च भरतस्य महात्मनः॥ गमनं कीर्त्यते वासो भरद्वाजस्य चाश्रमे॥
दर्शनं चैव रामस्य पितुश्च सलिलक्रिया॥ प्रसादनं च रामस्य बंधुभिः परिकीर्तितं॥ जाबालेर्यत्र वाक्यानि वामदेवस्य
चोभयोः॥ इक्ष्वाकूणां च वंशस्य कीर्तनं समुदाहृतं॥ अप्रतिग्रहणं च रामस्य गमने कोशलान्प्रति॥ पादुकाहरणं चैव
भरतस्य विसर्जनं॥ नंदिग्रामे प्रवेशश्च मातॄणां च विसर्जनं॥ अयोध्यां संप्रवेशश्च शत्रुघ्नस्य तथैव च॥ कांडं
द्वितीयमिदमुक्तं अयोध्याकांडसंज्ञितं॥ अशीतिसंख्यया सर्गाः श्लोकानां चात्र कीर्त्यते॥ त्रीणि श्लोकसहस्राणि
नव श्लोकशतानि च॥ श्लोकानां द्विशते चैव भूयः श्लोकाश्च सप्ततिः॥ अतः कांडं तृतीयं तु आरण्यकमिति स्मृतं॥४०॥

रावे
॥६॥

यत्र रामो महाबाहुः दंडकं प्रविशद्वनं॥ अनसूयासमस्या च अंगरागस्य चार्पणं॥ विराधदर्शनं चैव वधश्च समुदाहृतः॥ ऋ-
षीणां दर्शनं चैव मैथिल्या याश्च सांत्वनं॥ शरभंगाश्रमप्राप्तिर्महेंद्रस्य च दर्शनं॥ सुतीक्ष्णस्याश्रमप्राप्तिः संवादः सहसी-
तया॥ मंदकर्णैश्च कथितं यत्र शत्रुविसर्जनं॥ इल्वलस्य संवादः कीर्तनं च दुरात्मनः॥ अगस्त्याश्रमवासश्च तथा संपरिकी-
र्तितः॥ दर्शनं पंचवट्याश्च जटायोश्चैव दर्शनं॥ जनस्थाननिवासश्च शिशिरस्य च वर्णनं॥ स्मरणं भरतस्याथ
कैकेय्याश्चावगर्हणं॥ संवादः शूर्पणख्याश्च विरूपकरणं तथा॥ खरस्य चैव घोषो दूषणत्रिशिरोवधः॥ लंका-
प्रवेशो राक्षस्याः शूर्पणख्याः प्रकीर्तितः॥ सीताया लोभनं चैव रावणस्यानुशासितं॥ मारीचाश्रमसंप्राप्ती रावणस्य
दुरात्मनः॥ मारीचश्चैव मृगो भूत्वा वैदेहीं समलोभयत्॥ लोभयित्वा च वैदेहीं राघवस्यापकर्षणं॥ मारीचस्य वध
श्चैव लक्ष्मणस्य विगर्हणं॥५०॥ सीताया हरणं चैव सौमित्रेश्चात्र संगमः॥ जटायुषो वधश्चात्र सीतायाश्चाश्रम
विशनं॥ लक्ष्मणस्य च संवादो राघवेण महात्मना॥ हृतां च जानकीं मत्वा विलापो राघवस्य च॥ जटायोर्दर्शनं चैव
सत्कारश्च महात्मनः॥ गृध्रराजस्य रामेण कृता चैव जलक्रिया॥ कबंधस्य वधः प्रोक्तः स्वर्गप्राप्तिश्च पुष्कला॥
कबंधस्य च वाक्येन सुग्रीवान्वेषणे परं॥ शबरीदर्शनं चैव पंपायां परिदेवनं॥ इति कांडं तृतीयं तु आरण्यकमि-
ति स्मृतं॥ सर्गाणां तु शतं चैव सर्गाश्चैव चतुर्दश॥ चत्वारि हि सहस्राणि श्लोकानां कीर्तितानि च॥ शतं चैवात्र विज्ञेयं

वाल्मी॰रामा॰बा॰
॥८७॥

श्लोकाः पंचाशद्देव तु॥ अतः कांडं चतुर्थं तु किष्किंधकमिति स्मृतं॥ ऋष्यमूकगिरिप्राप्तौ राघवस्य महात्मनः॥ हनुमद्दर्शनं चैव सं
वादश्चैव कीर्त्यते॥ आरोहणं च शैलस्य ऋष्यमूकस्य कीर्तितं॥ रामसुग्रीवसख्यं च वालिपौरुषकीर्तनं॥ सप्ततालविभेद
श्च सख्योत्सादनं तथा॥ वालिसुग्रीवयुद्धं च वालिनो वध एव च॥६०॥ अंतःपुरविलापश्च ताराकारुण्यमेव च॥ सुग्रीव
स्याभिषेकश्च करणं चाश्रमस्य च॥ विलापो राघवस्यात्र लक्ष्मणेन च सांत्वनं॥ प्रावृड्विलापश्चैवात्र शरद्वर्णनमेव च॥
विलापश्चैव शरदि समयस्य च लंघनं॥ सुग्रीवं प्रति रामस्य कोपो यत्र प्रकीर्तितः॥ रामस्य कोपं विज्ञाय लक्ष्मणस्य च सं
भ्रमः॥ प्रणामो लक्ष्मणस्याथ देशे नगमनं तथा॥ सुग्रीवस्य यथा चात्रागमने राघवाश्रमे॥ प्रसादनं च रामस्य वानराणां च
संग्रहः॥ पृथिव्या वर्णनं चैव सुग्रीवेण महात्मना॥ प्रस्थापनं वानराणामंगुलीयस्य चार्पणं॥ हनुमत्प्रभृतीनां च
विंध्यपर्वतलंघनं॥ स्वयंप्रभागुहायाश्च प्रवेशोऽत्र ह कीर्तितः॥ अप्रवृत्तौ च वैदेह्या विषादगमनं महत्॥ प्रायोपवेश
नं चात्र वानराणां महात्मनां॥ दर्शनं चात्र संपातेर्गृध्रराजस्य धीमतः॥ निवेदनं च लंकायाः गृध्रराजेन धीमता॥
चतुर्थमेतत्संज्ञं तु किष्किंध्यमिति चोच्यते॥ सर्गाश्चैवात्र विज्ञेया चतुःषष्टिस्तु संख्यया॥७०॥ श्लोकानां द्वे सहस्रे च
अष्टौ श्लोकशतानि च॥ श्लोकानां च शतं त्वेयं पंचविंशतिरेव च॥ अतः परं प्रवक्ष्यामि कांडं सुंदरसंज्ञितं॥ हनुमत्प्लवनं
यत्र सुरसायाश्च दर्शनं॥ मैनाकस्य गिरेश्चैव दर्शनं परिकीर्तनं॥ निधनं सिंहिकायाश्च लंकादर्शनमेव च॥ प्रवेश
श्चैव लंकाया वर्णनं निश्चयस्तथा॥ मार्गणं चैव वैदेह्या रावणांतःपुरे शुभे॥ दर्शनं पुष्पकस्येह अपानस्य च वर्णनं॥ ॥८७॥

दर्शनं राक्षसेंद्रस्य रावणस्य दुरात्मनः॥ विचयः पुष्पकस्येह जानक्याश्चैव मार्गणं॥ अदर्शनेन वैदेह्याः शोकोपगमनं तथा॥ प्र
विश्याशोकवनिकां वैदेह्याश्चैव दर्शनं॥ प्रवेशो रावणस्येह राक्षसः प्रमदावनं॥ प्रलोभनं च सीताया रावणस्य च भर्त्सनं॥
तर्जनं राक्षसीनां च हनूमद्दर्शनं तथा॥ अभिज्ञानप्रदानं च सीतासंभाषणं तथा॥ चूडामणिप्रदानं च प्रतिसंदेश एव च॥
वनभंगश्च क्रूराणां राक्षसीनां च तर्जनं॥८०॥ किंकराणां वधश्चैव मंत्रिपुत्रवधस्तथा॥ सेनापतिवधश्चात्र अक्ष
स्य च वधस्तथा॥ कीर्तितं दुर्गयुद्धं च हनुमन्मेघनादयोः॥ ब्रह्मास्त्रेण च बंधो वै मारुतेः परमाद्भुतः॥ निवेदनं च दूत
स्य भर्त्सनं च हनूमतः॥ लांगूलदीपनं चैव लंकादाहस्तथैव च॥ सीताया दर्शनं चैव भूयः प्रत्यागमनमेव च॥
जांबवत्प्रमुखैश्चैव हरिभिः सह संगमः॥ तथा मधुवनप्राप्तिर्मधूनां च विलोपनं॥ दर्शनं देवमार्गस्य संगो मधु
वनस्य च॥ अंगदप्रमुखानां च हरीणां रामदर्शनं॥ हनूमतः परिष्वंगो राघवेण महात्मना॥ प्रवृत्तिश्चैव सीतायाः मणि
दानं तथैव च॥ लंकाया दर्शनं चैव दर्शनं रावणस्य च॥ सीताया दर्शनं चैव प्रतिसंदेश एव च॥ दुर्गकर्मविधानं च
राक्षसानां विचेष्टितं॥ अशोकवनिकाभंगं दुर्गस्य च विनाशनं॥ यत्रैतत्कथयामास हनूमान् राघवाय वै॥ यत्र सु
ग्रीवसहितो राघवः सहलक्ष्मणः॥ महता हरिसैन्येन प्रययौ दक्षिणामुखः॥९०॥ सर्वे च संहिता यत्र निविष्टाः सा
गरं प्रति॥ इत्येतत्संचयं कांडं सुंदरं परिकीर्तितं॥ सर्गाणामत्र संख्या च कांडे सुंदरसंज्ञिते॥ चत्वारिंशात्त्रयश्चैव स
र्गाश्च समुदाहृताः॥ श्लोकानां त्रिसहस्रं च चत्वारिंशाद्यपंच च॥ अतः परं तु षष्ठं च युद्धकांडमिति स्मृतं॥ यत्र रामे

महाबाहुः सागरं समुपस्थितः॥ यत्र लंकामभिगमिषुर्मंत्रयामास राघवः॥ प्राप्तं च राघवं श्रुत्वा मंत्रयामास रावणः॥ सम
र्थो यत्र रामेण ज्येष्ठमाह विभीषणः॥ मुच्यतां मैथिली राजन् स्वस्त्यस्तु नगरस्य नः॥ एतद्धि परमं श्रेयो विपरीतो नयो भ
वेत्॥ एवमुक्तो दशग्रीवः क्रोधसंरक्तलोचनः॥ जघान यत्र पादेन भ्रातरं वै विभीषणं॥ रावणं च परित्यज्य चतुर्भिः
सचिवैः सह॥ आगच्छद्राघवाभ्याशं गदापाणिर्विभीषणः॥ अभिषिक्तश्च रामेण लंकाराज्ये विभीषणः॥
सागरान्नोयमादेन प्रयतेन महात्मना॥ यत्र रामस्य संरंभः समुद्रस्य च दर्शनं॥ नलसेतुक्रिया चैव सागरानु
मते तथा॥१००॥ तरणं चैव घोरस्य सागरस्य महात्मनः॥ सुवेलासादनं चैव चारप्राप्तिर्धरे वच॥ शुकसारणवा
क्यं च वानरीकस्य दर्शनं॥ मंत्रणं राक्षसेंद्रस्य माया रामशिरःक्रिया॥ वाक्यानि सरमायाश्च सीताश्वासनमे
व च॥ यत्र माल्यवतो वाक्यं लंकायां युद्धमेव च॥ मंत्रणं राघवबले वराणां च प्रवेशनं॥ सुवेलारोहणं चैव तथा
लंकावरोधनं॥ समारंभश्च युद्धस्य द्वंद्वयुद्धप्रवर्त्तनं॥ सुमग्नयज्ञकोपाद्विवधो यत्रानुशब्दितः॥ रात्रियुद्ध
विधानं च शरबंधस्तथैव च॥ सुपर्णदर्शनं चैव अस्त्रबंधस्य मोक्षणं॥ धूम्राक्षस्य वधश्चैव तथैवाकंप
नस्य च॥ प्रहस्तस्य वधश्चैव प्रभंगो रावणस्य च॥ दुर्गकर्मविधानं च कुंभकर्णप्रबोधनं॥ दर्शनं कुंभ
कर्णस्य संप्रश्नो राघवस्य च॥ निर्याणं कुंभकर्णस्य वानराणां च संभ्रमः॥ सुग्रीवग्रहणं चैव प्रमोक्षश्चात्र
कीर्तनं॥ वधश्च कुंभकर्णस्य राघवात्समुदाहृतः॥ नरांतकवधश्चात्र देवांतकवधस्तथा॥ महोदरवधश्चैव

वधस्त्रिशिरसस्तथा॥ महापार्श्ववधश्चात्र अतिकायवधस्तथा॥ मेघनादास्त्रमोहश्च ससैन्यो राघवे तथा॥ ओषध्यान
यनाश्चापि प्रबोधश्च हनूमता॥ उल्काभिहारयुद्धं च वधः कुंभनिकुंभयोः॥ मकराक्षवधश्चात्र निर्गमो रावणे पुनः॥ माया
सीतावधश्चात्र मेघनादवधस्तथा॥ क्रोधश्च राक्षसेंद्रस्य तथा निष्क्रमणं महत्॥ रावणस्य च निर्याणं विरूपाक्षवधस्तथा॥
मत्तश्चापि वधश्चात्र उन्मत्तवधएव च॥ राघवस्य च वाक्यानि भर्त्सनं रावणस्य च॥ रामरावणयोश्चैव अस्त्रयुद्धं महात्म
नोः॥ लक्ष्मणस्य वधश्चैव विलापो राघवस्य च॥ ओषध्यानयनं चैव लक्ष्मणोत्थानमेव च॥ प्रदानं देवराजेन रथस्य चै
महात्मना॥ मातलेर्दर्शनं चैव शक्राकवाक्यभिवेदनं॥ संग्रामे राक्षसेंद्रस्य प्रभंगो रावणस्य च॥ सारथेर्भर्त्सनं चैव रावणे
न दुरात्मना॥ देवानां विस्मयश्चैव गगने दानवैः सह॥ द्वैरथं च महाघोरं सप्ताहक्षितिकंपनं॥१२०॥ वधश्च राक्षसेंद्र
स्यात्रि भुवनैकभुविश्रुतः॥ इति षष्ठमिदं कांडं युद्धकांडमितिश्रुतं॥ सर्गाणां तु शतं ज्ञेयं पंचसर्गास्तथैव च॥ कांडग्रं
थिस्तथा संख्या श्लोकानां चापि वर्ण्यते॥ चत्वार्येव सहस्राणि पंचश्लोकशतानि च॥ अतस्त्वभ्युदयं नाम सो
त्तरं प्रतिचक्षते॥ यत्र रावणदाराणां विलापः समुदाहृतः॥ विभीषणाभिषेकश्च सत्कारो रावणस्य च॥ हनू
मत्प्रवेशश्च मैथिल्याश्चैव दर्शनं॥ सीतायाभिगमश्चैव राघवेण समागमः॥१२५॥ भर्त्सनं चैव सीताया
राघवेण महात्मना॥ परित्यागं च वैदेह्यास्तथा चाग्निप्रवेशनं॥ अग्निप्रवेशे च तदा अदाहं परमाद्भुतं॥ ब्रह्मादीनां च
सर्वेषां देवानामिह दर्शनं॥ वृषध्वजस्य देवस्य दर्शनं चात्र कीर्त्यते॥ पितामहाद्दर्शनं चापि तु दर्शनमेव च॥

कैकेय्याश्चापनाशश्च तुष्टिर्दशरथस्य च ॥ राक्षसूदस्य संप्राप्तिर्हरीणां प्रतिजीवनं ॥ रत्नानां संविभागश्च राक्षसैर्दृष्टपूर्वधी
मता ॥ पुष्पकारोहणं चैव राघवस्य महात्मनः ॥ वानराणां च सर्वेषां राक्षसानां तथैव च ॥ प्रस्थियाने च कथितं विस्तरेणाम हा
त्मना ॥ भरद्वाजाश्रम प्राप्ति ऋक्षे दर्शनमेव च ॥ नंदिग्रामप्रवेशश्च गुरूणां चैव दर्शनं ॥ अयोध्यायां प्रवेशश्च व्रतं
स्यच समापनं ॥ अभिषेकश्च रामस्य प्रमोदो नगरस्य च ॥ यौवराज्यप्रदानेच भरतस्य महात्मनः ॥ मुनीनामिह
संप्राप्तिरुत्पत्तिश्चैव रक्षसां ॥ त्रैलोक्यविजयाख्यानमहल्याकीर्त्तनं तथा ॥ सीताविवासनं चैव लक्ष्मणेन म
हात्मना ॥ वाल्मीकाश्रमसंप्राप्तिर्मैथिल्याश्चैव कीर्त्यते ॥ कुशीलवसमुत्पत्तिः शिक्षा कुक्षुत्वहृध्यये ॥ लवणस्य
वधश्चात्र शत्रुघ्नेन प्रकीर्तितः ॥ शंबुकस्य वधश्चात्र कुंभयोनिसमागमः ॥ अलंकारस्य संप्राप्तिः श्वेतोपाख्या
नमेव च ॥ अश्वमेधसमारंभो गीतश्रवणमेव च ॥ काव्यस्य गाने विज्ञेयः स पुत्रौ तौ कुशीलवौ ॥ वाल्मीकेश्चै
व वाक्यानि विख्यापो राघवस्य च ॥ रसातलप्रवेशश्चैव देव्याः परमाद्भुतः ॥ राघवस्य च संरंभो दर्शनं परमेष्ठिनः ॥
॥१४॥ कालदुर्वाससोः प्राप्तिः सत्यागो लक्ष्मणस्य च ॥ सुहृदां चैव पौराणां वानराणां महात्मनां ॥ महाप्रस्थानम
मने स्वर्गप्राप्तिश्च पुष्कला ॥ इत्याभ्युदयिके कांडे संभविष्यमिहोत्तरं ॥ नवतिः संख्यया सर्गाश्लोकाश्चात्र कीर्त्यते ॥ त्रीणि
श्लोकसहस्राणि नव श्लोकशतानि च ॥ षष्टिश्लोकास्तथा ते याः कांडेस्मिन्परिकीर्तिताः ॥ सर्गाणां षट्शतानीह
विंशतिश्चैव संख्यया ॥ इत्येतद्रामसंबंधमाख्यानमृषिसंस्तुतं ॥ चतुर्विंशतिसाहस्रं सर्वपापभयापहं ॥ आ

ख्यानं वैष्णवं दिव्यं कृतं वाल्मीकिनास्वयं ॥ धन्यं यशस्यमायुष्यं पुत्रीयं पुष्टिवर्धनं ॥ पठेदिमां पर्वणि यः समाहितः
कथां शुचिर्दाशरथेः समाहितः ॥ विमुच्यते सौकलुषेण मानवः सुखं स गच्छेत्परमं तोष्य सद्गतिं ॥ ॥१५॥ ॥
॥ इत्यार्षे रामायणे बालकांडे सप्तकांडानुक्रमणिका संपूर्णा ॥ ३ ॥ ॥ श्रुत्वा पूर्वं काव्यबीजं देवर्षेर्नारदात्पुनः ॥
लोकादन्विष्य भूयश्च चरितं चरितव्रतः ॥ उपस्पृश्योदकं सम्यङ्मुनिस्थित्वा कृतांजलिः ॥ तपोबलेन ज्ञानविष्य
चरितं भरितेजसः ॥ जन्म रामस्य सुमहद्वीर्यं सर्वानुकूलतां ॥ लोकस्य प्रियतां क्षांतिं सौम्यतां सत्यवाक्यतां ॥ मि
थिलागमनं चैव धनुषश्चैव भेदनं ॥ रामरामविवादश्च गुणं दशरथस्य च ॥ नानाचित्रकथाश्चान्या विश्वामित्र
महामुनेः ॥ तथाभिषेकं रामस्य कैकेय्या दुष्टभावतां ॥ व्याघातश्चाभिषेकस्य राघवस्य विवासनं ॥ राज्ञः शोकं वि
लापश्च शोकं मरणमेव च ॥ प्रकृतीनां विषादं च तथैव च विसर्जनं ॥ दंडकारण्यगमनं सुतीक्ष्णेन समागमं ॥ अनसू
यासमस्यां च अंगरागस्य चार्पणं ॥ शरभंगाश्रमेथ्यासं वासवस्य च दर्शनं ॥ अगस्त्याश्रमवासश्च अगस्त्याद्वि
सर्जनं ॥ समागमे विराधेन वासं पंचवटे तथा ॥ हासं शूर्पनखायाश्च विरूपकरणं तथा ॥ वधः खरत्रिशिरसोः क
थनं रावणस्य च ॥१०॥ मारीचस्य विनाशं च वैदेह्याहरणं तथा ॥ जटायोर्निधनं चैव कबंधस्य वधं तथा ॥ शबर्या
दर्शनं चैव पंपाया दर्शनं तथा ॥ विलापं चैव पंपायां राघवस्य महात्मनः ॥ ऋष्यमूकाभिगमनं सुग्रीवेण समागमं ॥
मत्स्ययोत्पादनं सख्यं वाली सुग्रीव विग्रहं ॥ वालिप्रमथनं राज्ये सुग्रीव प्रतिवेदनं ॥ तारा विलापसमयं वर्षारात्रिनिवासनं ॥

कोपं राघवसिंहस्य बलानामुपसंग्रहं ॥ दिशः प्रस्थापनं चैव पृथिव्याश्च निवेदनं ॥ अंगुलीयप्रदानं च तथैवबिलदर्श
नं ॥ प्रायोपवेशनं चैव संपातेश्चैव दर्शनं ॥ पर्वतारोहणं चैव सागरस्य च लंघनं ॥ सिंहिकादर्शनं चैव लंकामलयनिदर्श
नं ॥ रात्रिप्रवेशो लंकायां चिंताहनुमतस्तथा ॥ आपानभूमिगमनं मवरोधस्य दर्शनं ॥ अशोकवनिकायानं सीता
याश्चापि दर्शनं ॥ राक्षसीदर्शनं चैव रावणस्य च दर्शनं ॥ संभाषणं च मैथिल्याः अभिज्ञानस्य चार्पणं ॥ मणि
प्रदानं सीताया वृक्षभंगं तथैव च ॥ राक्षसीविद्रवं चैव किंकरीणां निबर्हणं ॥ २० ॥ अमात्यपुत्रनिधनं सेनापति
वधं तथा ॥ अक्षस्य निधनं चापि निर्याणं इंजितस्तथा ॥ ग्रहणं वानरेंद्रस्य लंकादाहाभिमर्शनं ॥ प्रतिप्रयाणमे
वापि मधूनां भक्षणं तथा ॥ संगमं च समुद्रस्य नलसेतोश्च बंधनं ॥ तरणं च समुद्रस्य रोदलंकोपरोधनं ॥ वि
भीषणेन संसर्गवधोपायनिवेदनं ॥ कुंभकर्णस्य च वधं मेघनादवधं तथा ॥ रावणस्य विनाशं च सीतावाप्तिस्त
थैव च ॥ विभीषणाभिषेकं च पुष्पकारोहणं तथा ॥ अयोध्यायाश्च गमनं भरतेन समागमं ॥ रामाभिषेकाभ्युदय
हरिरक्षोविसर्जनं ॥ सीतायाश्च परित्यागं प्रकृतीनां चिरंजनं ॥ अनागतं च यत्किंचिद्रामस्य वसुधातले ॥
प्राप्तराज्यस्य रामस्य चरितेयत्र धीमतः ॥ अभ्यागमं च पीणां च शत्रुघ्नश्च विसर्जनं ॥ वने प्रसूतिं सीतायाश्च रामे
ण स्मरणेव धं ॥ काव्यदूर्वासयोः प्राप्ति लक्ष्मणस्य विसर्जनं ॥ स्थापयित्वा सुतान् राज्ये अथ रामो दिवं गतः ॥ नैके ॥१०॥
क्ष्य दशरितस्त्सर्वं तपोयोगबलेन च ॥ ३० ॥ ददर्श दैवं प्रत्यक्षं पाण्यामलकं तथा ॥ दृष्ट्वा चानंतरं चक्रे रामस्य

चरितं महत् ॥ धर्मकामार्थसंयुक्तं पुण्यश्रवणकीर्त्तनं ॥ श्रुतिं चैव यथा कीर्यं काव्यसागरमद्भुतं ॥ कृत्वावे
दमशेषेण काव्यं रामायणाह्वयं ॥ चिंतयामास कश्चेदं लोकेस्मिन्प्रथयिष्यति ॥ अथ चिंतयतस्तस्य महर्षे
र्भावितात्मनः ॥ तदा जगृहतुः पादौ मुनिवेषधरावुभौ ॥ वाल्मीकिशिष्यौ तरुणौ रूपौदार्यगुणान्वितौ ॥ कुशीलवा
विति ख्यातौ सीतारामांगसंभवौ ॥ सतौ मूर्ध्न्युपाघ्राय वाल्मीकिर्भगवान्रृषिः ॥ उवाचेदं तदा वाक्यं प्रणतावग्रतः स्थि
तौ ॥ आर्षं रामायणं काव्यमिदं तावन्मया कृतं ॥ गृह्यतामनियोगेन पुण्यश्रवणकीर्त्तनं ॥ पौलस्त्यवधसंयुक्तं धर्मका
मार्थसंयुतं ॥ पाठे गेये च मधुरं प्रमाणैस्त्रिभिरन्वितं ॥ तंत्रीगीतैश्च मधुरैरन्वितं सप्तभिः स्वरैः ॥ जातिभिः स
प्तभिर्युक्तं श्रोत्रश्रुतिमनोहरं ॥ शृंगारवीरबीभत्सरौद्रहास्यभयानकैः ॥ करुणाद्भुतशांतैश्च युक्तं काव्य
रसैरपि ॥ ४० ॥ एवमुक्त्वा तु तौ वाल्मीकिर्भगवानृषिसत्तमः ॥ सम्यग्ग्राहयामास स काव्यं रामकथाश्रयं ॥ वादिधेयं
ततस्ताभ्यां कृते तत्र विशेषतः ॥ पुंण्यं रामायणं काव्यं तदानो मुनिरब्रवीत् ॥ गायतामिदमाख्यानं भवद्भ्या
मृषिसंसदि ॥ राजर्षीणां पुंण्यस्तानां साधूनां च समागमे ॥ गुरुणैवमनुज्ञातौ नतसौ देवरूपिणौ ॥ कुशीलवौ
राजपुत्रौ प्रकृत्या मधुरस्वरौ ॥ यथोपदिष्टमृषिणा सन्निधौ ब्रह्मवादिनां ॥ तयोश्रुत्वा भवत्प्रीतः सेंद्राश्च सुरस
त्तमाः ॥ गंधर्वाप्सरसश्चैव पन्नगाश्च महर्षयः ॥ नैकदाचित्समेतानामृषीणां देवरूपिणौ ॥ काव्यं रामाय

णमध्येसहितावभ्यगायतां॥ श्रृण्वतां तु तदा काव्यमभवीण्हर्षसंभवः॥ सहसोभून्महांछब्दः साधुसाध्विति शीसतां॥
सुप्रीतमनसश्चैव मुनयो धर्मवत्सलाः॥ सर्वाभुभ्रातरौ तत्र गायंतौ तौ कुशीलवौ॥५०॥ अहोभावानुगं काव्यमहो
गीतमविश्वरं॥ अहो भगवतास्म्यग्रामस्य चरितं महत्॥ चिरवृत्तमपि ह्येतत्प्रत्यक्षमिवदर्शितं॥ संस्कृतं म
धुरं चैव समाक्षरपदक्रमं॥ अयोकाराधिमौवापि सम्यगस्य कुशीलवौ॥ कुमारौ देवगर्भाभौ नरुणौ मधुरस्वरौ॥
अहो श्राव्यमहोस्वाद्य महोगीतमविश्वरं॥ युक्तं च मधुरं चैव परयास्वरसंपदा॥ पदद्वन्तसमायुक्तं तालतानसम
न्वितं॥ संरक्तं चापि रक्तं च परया स्वरसंपदा॥ एवं प्रशस्यमानौ तौ श्लाघ्यमानौ महर्षिभिः॥ भूयो रक्ततरं
साधु मधुरं चाप्यगायतां॥ ताभ्यां प्रीतो मुनिः कश्चित्सानीय कलशीं ददौ॥ कश्चिद्वनफलं स्वादु वल्कलं कश्चि
दीप्सितं॥ एवं पूर्वमिदं काव्यं मुनिभिः प्रतिपूजितं॥ बीजभूतं मनुष्याणां कवीनामुपजीवनं॥ प्रशस्यमानौ
तावेवं कदाचिद्देवरूपिणौ॥ राजधानी पुरांतौच समीपे ह्यभ्यगायतां॥ अथाश्वमेधे रामोपि तावुपश्रुत्य गाय
तौ॥ सत्कृत्यैवानयामास पुरुषैराप्तकारिभिः॥ नाविदं जगतुस्तत्र काव्यं रामप्रचोदितौ॥ कर्मांतरे क्षुविप्राणां रा
मलक्ष्मणसैनिधौ॥६०॥ शत्रुघ्नभरतादीनां मंत्रिणां च महीक्षितां॥ वसिष्ठात्रिपुरोगाणां सन्निधौ ब्रह्मवादि
नां॥ रामस्तत्रासने शुभ्रे मृदुस्तरणसंवृते॥ उपविश्य तु सुश्राव तद्रामचरितं महत्॥ आर्षरामायणे साधेंश्चात

भिर्भ्रातृभिः॥ पौरजानपदैश्चैव वृतः शतसहस्रशः॥ दृष्ट्वाथ रूपसंपन्नौ तावुभौ वीणिनौ ततः॥ उवाच लक्ष्मणं रामश्च
सर्वांश्चैव सभासदः॥ श्रूयतामिदमाख्यानमनयोर्देववर्चसोः॥ विचित्रार्थपदं सम्यग्गायितोर्मधुरस्वरं॥ इमौ हि बालौ नृप
लक्षणान्वितौ कुशीलवौ चैव तपोवनाश्रयौ॥ ततः पुनः राघवसंप्रचोदितं वगायतां काव्यमिदं यथाक्रमं॥ स चापि
रामः सहितैः समाहितैर्बभूव तत्रार्पितचेतनस्तदा॥ ॥६६॥ ॥इत्यार्षे रामायणे बालकांडे काव्योपसंक्षेपः॥४॥ ॥श्री॥
सागरी नाम महीयेषामासीद्वीर्यार्जिताखिला॥ आमनोः पुण्यकीर्तेर्नारानाममितंतेजसां॥१॥ सगरः पूर्वजो येषां सागरो
येनखानितः॥ षष्टिं पुत्रसहस्राणि यं यांतं पृष्ठतोन्वयुः॥ इक्ष्वाकूणामिदं तेषां वैरोकीर्तिविवर्धनं॥ निबद्धं पुण्यकी
र्तेर्नारामायणमिति श्रुतं॥ तदिदं श्रूयतामार्षं पुण्यं पापभयापहं॥ धर्मकामार्थसंयुक्तं श्रुतिस्मृत्युपबृंहितं॥ कोशलानाम
मुदितः स्फीतो जनपदो महान्॥ निविष्टः सरयूतीरे पशुधान्यसमृद्धिमान्॥ अयोध्या नाम तत्रासीन्नगरी लोकविश्रुता॥
मनुना मानवेंद्रेण यत्नेन परिनिर्मिता॥ आयता दशचद्वेच योजनानि महापुरी॥ श्रीमती त्रीणि विस्तीर्णा नानासंस्थानशो
भिता॥ सुविभक्तांतरद्वारा सुविभक्तमहापथा॥ शोभिता राजमार्गेण जलसंसक्तरेणुना॥ नानावणिग्जनोपेता नाना
रत्नविभूषिता॥ महाशालान्विता दुर्गउद्यानप्रवरैर्युता॥ दुर्गगंभीरपरिखा नानायुधसमन्विता॥ कपाटतोरणप्रभा
उपेता धान्विभिः सदा॥ राजा दशरथो नाम महात्मा राष्ट्रवर्धनः॥ तां पुरीं पालयामास स्वपुरीमिव वासवः॥ दृढद्वारप्रतोलीका
सुविभक्तांतरायणा॥ नानायंत्रायुधवती नानाशिल्पिगणायुता॥ शतघ्नीपरिघोपेता मुच्छ्रितध्वजतोरणा॥ नानारत्नचया

कीर्णांधनधान्यसमन्वितां॥ देवतायतनैश्चैवविमानैरिवशोभितां॥ सभोद्यानप्रपाभिश्चरुचिराभिरलंकृतां॥ प्रविभक्तमहाह
र्म्यांनरनारीगणान्वितां॥ विधिक्षूराढ्यपुरुषैराकीर्णाममरोपमैः॥ अरोहमिवरत्नानांप्रतिष्ठानमिवश्रियः॥ महाप्रासादशिखरैः
शैलाग्रैरिवशोभितां॥ विमानचयसंबाधांभित्त्यैवामरावतीं॥ अष्टापदपटोलेख्यैरम्यामालिखितामिव॥ नानाचित्रचयै
श्चित्रांहृष्टपुष्टजनैर्युतां॥ अविच्छिन्नांनरगृहासमभूमिनिवेशनां॥ मृदंगवेणुवीणानांरम्यैःशब्दैर्विनादितां॥ नित्यो
त्सवसमाजाढ्यांनित्यहृष्टजनायुतां॥२०॥ ब्रह्मघोषस्वनवतींधनुस्वननिनादितां॥ वरान्नपानसलिलांशालितंदुलशा
जनां॥ धूपमाल्यहविर्गंधैर्हृद्यैश्चाप्यधिवासितां॥ लोकपालोपमैःशूरैःसर्वशास्त्रार्थपारगैः॥ गुप्तांयोधशतैश्चापिना
गैर्भोगवतीमिव॥ स्वयंचैवेंद्रकल्पेनपुरींदेवपुरोपमां॥ गुप्ताभिक्ष्वाकुनाथेनराज्ञादशरथेनच॥ वराग्निमद्भिर्गुणव
द्भिरन्वितांद्विजोत्तमैर्वेदषडंगपारगैः॥ सहस्रदैःसत्यतपोदयान्वितैर्महर्षिकल्पैर्यतिभिर्यथामलभिः॥२४॥ ॥इत्यार्षे
रामायणेबालकांडेअयोध्यावर्णनंनामप्रथमःसर्गः॥५॥ ॥पुर्यांतस्यामयोध्यायांवेदवेदांगपारगः॥ दीर्घदर्शी
महातेजाःपौरजानपदप्रियः॥ इक्ष्वाकूणामतिरथोयज्वाधर्मरतांवरः॥ महर्षिकल्पोराजर्षिस्त्रिषुलोकेषुविश्रुतः॥
बलवान्विजितामित्रोनीतिमान्विजितेंद्रियः॥ धनधान्यैश्चविभवैःशक्रवैश्रवणोपमः॥ आदिराजोमनुरिवप्रजा ॥१२॥
नांपरिरक्षिता॥ राजादशरथोनामबभूवत्रिदशोपमः॥ तेनसत्याभिधानेनत्रिवर्गमनुपश्यता॥ पालितासापुरीश्रे
ष्ठाराज्ञेणेवामरावती॥ हृष्टपुष्टजनेतस्मिन्पुरेनैवाबहुश्रुतः॥ कश्चिद्दासीन्नरोनापिकश्चिदन्यायवृत्तिमान्॥

नचाश्रितनयःकश्चिद्दासीत्तत्रजनःपुरे॥ नचाप्यासीदसंतुष्टःकुटुंबीतत्रकश्चन॥ नकदर्यःकश्चिद्दासीन्नानृतीनशठोपिवा
नमानीनचसंरंभीननदोषोनकुत्सितः॥ नामहात्मानपिशुनोनपरस्वोपजीवकः॥ नवावर्षसहस्रायुःनामयीनब
हुश्रुतः॥ नरास्वदारनिरतानार्यश्चासन्नृपभिवृतः॥ सुव्रतावृत्तिमंतश्चनराआसंस्तथास्त्रियः॥१०॥ नाकुंडलीनाम
कुटीनास्रग्वीनाविलेपिनी॥ तत्रकुप्रकृतिर्नासीद्दरिद्रोवाप्युरोनमे॥ नामृष्टभूषणधरोनचाप्यासीदतिष्टभुक्॥ ना
हस्ताभरणोपेतानानृतीनचनास्तिकः॥ नानाहिताग्निर्नायज्वाविप्रोनाप्यसहस्रदः॥ कश्चिद्दासीत्त्वयोध्यायांसद्वृ
त्तिरहितोजनः॥ स्वकर्मनिरताश्चासन्सर्वेतत्रद्विजातयः॥ यज्ञाध्ययननित्याश्चविरताश्चप्रतिग्रहात्॥ नाना
स्तिकोनानृतवाक्नकश्चित्क्रोधनोनरः॥ नासूयकोनचाशक्तोनाशुचिस्तत्रयोप्यभूत्॥४ नामृष्टपुंड्रःचारदा
नासुगंधोनचान्नृजुः॥ नदुःखीपुरुषःकश्चिन्नचासीदनलंकृतः॥ नचचातुर्यमाधुर्यस्त्रीलाचारगुणान्वितः॥
नार्यश्चासन्नयोध्यायाम्मृष्टाभरणवाससः॥ नानात्मवान्नचक्रूरोनविरूपोनचालसः॥ कश्चिद्दासीदयोध्यायां
नाश्रीमान्नामहासत्वान्॥ नदीनोनापिचोद्विग्नोनातुरोनभयातुरः॥ द्रष्टुंशक्योह्ययोध्यायांनापिराजन्नभक्तिमान्
वर्णश्रेष्ठान्पूजयंतःपितृदेवातिथींस्तथा॥ आसंदीर्घायुषस्तत्रनराःसत्यपरायणाः॥२०॥ ब्रह्मचर्यचरन्क्षत्रवैश्याः॥ क्षत्र
मनुव्रताः॥ शूद्राश्चैवापिवर्णांस्त्रीन्शुश्रूषंतोनसूयच॥ नयोनिसंकरश्चापितत्रनाचारसंकरः॥ एवमिक्ष्वाकुनाथेनपा
लितासाभवत्पुरी॥ यथापुरस्तान्मनुनामानवेंद्रेणभूरियं॥ योधानामग्निकल्पानांसंयुगेष्वनिवर्तिनां॥ गुप्तापुरी

कीर्णां धनधान्यसमन्वितां॥ देवतायतनैश्चैव विमानैरिव शोभितां॥ सभोद्यानप्रपाभिश्च रुचिराभिरलंकृतां॥ प्रविभक्तमहाह
र्म्यां नरनारीगणान्वितां॥ विधिच्छूराढ्यपुरुषैराकीर्णाममरोपमैः॥ प्ररोहमिव रत्नानां प्रतिष्ठानमिव श्रियः॥ महाप्रासादशिखरै
शैलाग्रैरिव शोभितां॥ विमानचयसंबाधां भिंद्रस्येवामरावतीं॥ अष्टापदपदालेख्यै रम्यामालिखितामिव॥ नानाचित्रचयै
श्चित्रां हृष्टपुष्टजनैर्युतां॥ अविच्छिन्नां नरस्त्रीहासमभूमिनिवेशनां॥ मृदंगवेणुवीणानां रम्यैः शब्दैर्विनादितां॥ नित्यो
त्सवसमाजाढ्यां नित्यहृष्टजनायुतां॥२०॥ ब्रह्मघोषस्वनवतीं धनुस्वननिनादितां॥ वरान्नपानसलिलां शालितंदुलभो
जनां॥ धूपमाल्यहविर्गंधैर्हृद्यैश्चाप्यधिवासितां॥ लोकपालोपमैः शूरैः सर्वशास्त्रार्थपारगैः॥ गुप्तां योधवरैश्चापि ना
गैर्भोगवतीमिव॥ स्वयं चैवेंद्रकल्पेन पुरीं देवपुरोपमां॥ गुप्ताभिक्ष्वाकुनाथेन राज्ञा दशरथेन च॥ वराग्निमद्भिर्गुणव
द्भिरन्वितां द्विजोत्तमैर्वेदषडंगपारगैः॥ सहस्रदैः सत्यतपोदयान्वितैर्महर्षिकल्पैर्यतिभिर्यतात्मभिः॥२४॥ ॥ इत्यार्षे
रामायणे बालकांडे अयोध्यावर्णनं नाम प्रथमः सर्गः॥५॥ ॥ पुर्यां तस्यामयोध्यायां वेदवेदांगपारगः॥ दीर्घदर्शी
महातेजाः पौरजानपदप्रियः॥ इक्ष्वाकूणामतिरथो यज्वा धर्मभृतां वरः॥ महर्षिकल्पो राजर्षिस्त्रिषु लोकेषु विश्रुतः॥
बलवान्निजितामित्रो नीतिमान्विजितेंद्रियः॥ धनधान्यैश्च विभवैः शक्रवैश्रवणोपमः॥ आदिराजो मनुरिव प्रजा
नां परिरक्षिता॥ राजा दशरथो नाम बभूव त्रिदशोपमः॥ तेन सत्याभिधानेन त्रिवर्गमनुपश्यता॥ पालिताभूत्पुरीश्रे
ष्ठा शक्रेणेवामरावती॥ हृष्टपुष्टजने तस्मिन्पुरे नैवाबहुश्रुतः॥ कश्चिदासीन्नरो नापि कश्चिदन्यायवृत्तिमान्॥ ॥१२॥

न चाश्रितनयः कश्चिद्दासीत्तत्र जनः पुरे॥ न चाप्यासीदसंतुष्टः कुटुंबी तत्र कश्चन॥ न कदर्यः कश्चिदासीन्नानृती न शठोपि वा
न मानी न च संरंभी नन्नरो सो न कुत्सितः॥ नामहात्मा न पिशुनो न परस्वोपजीवकः॥ नवावर्षसहस्रायुः नामयी नव
दुःश्रुतः॥ नरास्वदारनिरता नार्यश्चासन्नृपभिव्रताः॥ सुव्रताह्यमितस्त्र नरा आसंस्तथाश्रियः॥१०॥ नाकुंडली नाम
कुटी नास्रग्वी नाविलेपिनी॥ न तत्र कुप्रकृतिर्नासीद्दरिद्रो वाप्युरोनमे॥ नामष्टभूषणधरो न चाप्यासीद्दनिष्टभुक्॥ ना
हस्ताभरणोपेता नानृती न च नास्तिकः॥ नानाहिताग्निर्नायज्वा विप्रो नाप्यसहस्रदः॥ कश्चिदासीत्त्वयोध्यायां सद्वृ
त्तिरहितो जनः॥ स्वकर्मनिरताश्चासन्सर्वे तत्र द्विजातयः॥ यज्ञाध्ययननित्याश्च विरताश्च प्रतिग्रहात्॥ नाना
स्तिको नानृतवाक्न कश्चिज्ज्ञो धनो नरः॥ नासूयको न चाशक्तो नाशुचिस्तत्र योध्यभूत्॥ नामष्टकुंडः चाद्दान
नासुगंधो न चानृजुः॥ न दुःखी पुरुषः कश्चिन्नवासीदनलंकृतः॥ न च चातुर्यमाधुर्यस्त्रीलाचारगुणान्वितः॥
नार्यश्चासन्नयोध्यायां मृष्टाभरणवाससः॥ नानात्मवान्न च क्रूरो न विरूपो न चालसः॥ कश्चिदासीदयोध्यायां
नाश्रीमान्नामहासत्वान्॥ न दीनो नापि चोद्विग्नो नातुरो न भयातुरः॥ द्रष्टुं शक्यो ह्ययोध्यायां नापि राजन्यभक्तिमान्
वर्णश्रेष्ठान्पूजयंतः पितृदेवातिथींस्तथा॥ आसन्दीर्घायुषस्तत्र नराः सत्यपरायणाः॥२०॥ ब्रह्मचर्यचरन्क्षत्रं वैश्याः क्षत्र
मनुव्रताः॥ शूद्राश्चैवापि वर्णांस्त्रीन्शुश्रूषंतो नसूयच॥ न योनिसंकरश्चापि तत्र नाचारसंकरः॥ एवमिक्ष्वाकुनाथेन पा
लितासाभवत्पुरी॥ यथापुरस्तान्मनुना मानवेंद्रेण भूरियं॥ योधानामग्निकल्पानां संयुगेष्वनिवर्तिनां॥ गुप्तापुरी

वाल्मी॰ रामा॰ बा॰
॥१३॥

सहस्त्रैः सा सिंहैरिव गिरेर्गुहा ॥ कंबोजदेशजैश्चैव हयैर्हरिहरोपमैः ॥ विंध्यपर्वतजैश्चैव नागैर्हैमवतैस्तथा ॥ सत्ववीर्यगुणो
पेतैः शूरैरचलसंनिभैः ॥ एद्धा जनकुलोद्भूतैर्भद्रमंद्रमृगान्वयैः ॥ सा पुरी बहुभिः कीर्णा नदासीद्द्विपहस्तिभिः ॥ सा योज
ने द्वे भूमेः सा सत्यनामा प्रकाशते ॥ सा पुरी यत्र राजासीत्सुरा दशरथोनघः ॥ सा सत्यनाम्नी दृढतोरणार्गला गृहैर्मह
द्भिर्भिर्वेश्मशतैरलंकृता ॥ पुरीसको द्यानवती मनुत्तमा सको राजेंद्रो नृपतिर्व्यपालयत् ॥ २८ ॥ ॥ इत्यार्षे रामाय
णे बालकांडे राजपुरीवर्णनं नाम सर्गः ॥ ६ ॥ ॥ छ ॥ ॥ मंत्रिणामृत्विजौ चैव तस्यास्तामृषिसत्तमौ ॥
वसिष्ठो वामदेवश्च वेदवेदांगपारगौ ॥ अष्टौ वंश्ये बभूवश्च तस्यामात्या महीपतेः ॥ शुचयश्चानुरक्ताश्च नित्यं
प्रियहितेरताः ॥ धृष्टिर्जयंतो विजयः सिद्धार्थो थार्थसाधकः ॥ अशोको धर्मपालश्च सुमंत्रश्चाष्टमोभवत् ॥
ह्रीमंतो विनयोपेताः नीतिज्ञा विजितेंद्रियाः ॥ मतिमंतस्त्ववहिताः राजनिर्देशकारिणः ॥ तेजःक्षमावयःप्रा
प्तास्मितपूर्वाभिभाषिणः ॥ अलुब्धा धृतिमंतश्च सत्यधर्मपरायणाः ॥ नैषामविदितं किंचित्स्वेषु चैव परेषु
च ॥ चिकीर्षितं कृ चिद्राज्ञो मित्रोदासीनविद्विषां ॥ ६ ॥ धर्माचारविवेकज्ञाः सर्वत्र समदर्शिनः ॥ कोशसंग्रह
णे युक्तास्तथा बल्येपरिग्रहे ॥ पुत्रेपि च प्राप्तदोषे धर्मतो दंडपातिताः ॥ अद्रोग्धारश्च धर्मेण शत्रोरपि ॥१३॥
कृतागसः ॥ आगतज्ञानविज्ञानाः पित्र्येनामहोचिताः ॥ रक्षितारश्च वर्णानां नित्यं विषयवासिनां ॥

कोशसंग्रहणेयुक्ता ब्रह्मस्वस्यापिहिंसकाः ॥ अतीक्ष्णदंडा नेतारः पराक्रमबलपौरुषे ॥ परस्परेणाविरुद्धाः प्रीति
मंतः प्रियंवदाः ॥ परापवादविरता गुणज्ञानच गर्विताः ॥ १० ॥ आर्यवेषासुमनसो नचसंदिग्धनिश्चयाः ॥ नरेंद्रवचना
सक्तचेतसस्तत्परायणाः ॥ स्वगणे सुपरिख्याता नामरूपगुणान्वयैः ॥ परराज्येपि विख्याता नयबुद्धिगुणाश्रुभिः ॥
आसंस्तदानुसेरकाः सर्ववर्णाः स्वकर्मभिः ॥ नासीत्पुरेवा राष्ट्रेवा तस्करो नाशुचिर्नरः ॥ न दुष्टः कश्चिदप्यासीत्परदा
राभिमर्शकः ॥ कृत्स्नमासीदनुद्विग्नं राष्ट्रं तैः परिपालितं ॥ प्रशांतमेवमासीन्नद्रां पुरवनानि च ॥ अमात्यैरीदृ
शैस्तैस्तु राजा दशरथोर्जितः ॥ धर्मतः पालयामास पृथिवीमनुरंजयन् ॥ अवेक्ष्यमाणश्चारेण महीं सूर्य इवां
शुभिः ॥ नाध्यगच्छत्क्वचित्किंचित् इक्ष्वाकुः शत्रुमात्मनः ॥ तैर्मंत्रिभिर्मंत्रहितेनिविष्टैर्वृद्धैर्द्विरागैः कु
शलैः समर्थैः ॥ सपार्थिवो दीप्तिमवापयुक्तैस्तेजोमयैर्गोभिरिवार्करेकः ॥ १७ ॥ ॥ इत्यार्षे रामायणे बालकांडे
अमात्यवर्णनं नाम सर्गः ॥ ७ ॥ ॥ छ ॥ तस्य धर्मप्रधानस्य धर्मज्ञस्य महात्मनः ॥ सुतार्थं तप्यमानस्य नासी
द्वंशकरः सुतः ॥ तस्य चिंतयतो बुद्धिरुत्पन्नेयं महात्मनः ॥ सुतार्थं वाजिमेधेन किमर्थं न यजाम्यहं ॥ सु
निश्चितां मतिं कृत्वा यष्टव्ये वसुधाधिपः ॥ मंत्रिभिः सह संमंत्र्य तैः स्वामिहितकारिभिः ॥ ततोब्रवीदिदं
वाक्यं सुमंत्रं मंत्रिसत्तमं ॥ शीघ्रमानय सर्वांश्च वसिष्ठप्रमुखान्गुरून् ॥ एवमुक्तो नृपतिना सुमंत्रो वाक्य

मब्रवीत्‌॥ नरेंद्र श्रूयतां तावत्पुराणे यन्मया श्रुतं॥ सनत्कुमारो भगवान्पुरा कथितवान्कथाः॥ भविष्यं विदुषां मध्ये
तव पुत्रसमुद्भवं॥ अस्ति ह कश्यपसुतो विभांडक इति श्रुतः॥ ऋष्यशृंग इति ख्यातस्तस्य पुत्रो भविष्यति॥ स वने नि
त्यसंवृद्धो मुनिपुत्रो वनेचरः॥ नान्यत्संज्ञास्यते किंचिन्मानवं पित्रवर्जितं॥ तस्य नूनं ब्रह्मचर्यं भविष्यति महात्मनः॥
लोकेषु प्रथितं चोग्रं तपस्तस्य भविष्यति॥ तपोरतस्य तस्यैवं कालः समभिवर्त्तते॥ अग्निं शुश्रूषमाणस्य पितरं च
यशस्विनं॥ एतस्मिन्नेव काले तु लोमपादः प्रतापवान्‌॥ अंगेषु प्रथितो राजा भविष्यति महाबलः॥ तस्य व्यतिक्र
मणाद्भविष्यति दारुणा॥ अनावृष्टिर्जनपदे क्षयाय बहुवार्षिकी॥ अनावृष्ट्यां तु यां जातदासपरिक्षितः॥
ब्रक्ष्यति ज्ञानिनो विप्रान्‌ अनावृष्टिप्रतिक्रियां॥ एवं तं श्रुतदृष्टार्थं लोकवृत्तांतवेदिनः॥ ममाज्ञां दातुमर्हं
ति यथावत्स्वामेदियं॥ ते तमाज्ञापयिष्यंति श्रुतिवेदांतवेदिनः॥ विभांडकसुतं राजन्‌ सर्वोपायैरिहानय॥ आ
नाय्य च महाराजा ऋष्यशृंगमृषेः सुतं॥ प्रयच्छास्मै सुतां शांतां विधिना सुसमाहितः॥ तेषामेतद्वचः श्रुत्वा स रा
जा चिंतयिष्यति॥ केनोपायेन वै शक्यमिहानेतुमिति प्रभुः॥ स निश्चयं यदा राजा स्वयं नाधिगमिष्यति॥ तदामा
त्यान्समाहूय प्रतिवक्ष्यति निश्चयं॥ पुरोहितं जनांश्चान्यान्मंत्रनिश्चयकोविदान्‌॥ ते चापि दृष्टप्राने वास्य प्रतिप
त्स्यंति निश्चयं॥ पुरोहितममात्यांश्च प्रेषयामास यत्नतः॥ आनयध्वं महाभागामृष्यशृंगं सुसत्कृतं॥ २०॥ ते ॥१५॥
तु राज्ञो वचः श्रुत्वा व्यथिता विक्लवाननाः॥ न गच्छेम ऋषेर्भीता अनुनेष्यंति ते नृपं॥ वक्ष्यंति चिंतयित्वा ते तस्यो

पायान्वर्धसंनतः॥ वयं तमानयिष्यामो न च दोषो भविष्यति॥ २२॥ वेश्याभिर्मुनिवेषाभिरानेष्यामो ऋषेः सुतं॥ लोभयित्वाभ्युपा
येन स्वां पुरीं पितुराश्रमात्‌॥ भविष्यति ततो वृष्टिस्तस्य राज्ञो महात्मनः॥ तस्यास्यागमनाद्देव मुनिपुत्रस्य धीमतः॥
ततः स राजा विधिवत्कन्यां तस्मै प्रदास्यति॥ स्वकीं दुहितरं भार्यां रूपौदार्यगुणान्वितां॥ एवं स तस्य जामाता भविष्यति
महायशाः॥ लोमपादस्य राजर्षेः ऋष्यशृंगः प्रतापवान्‌॥ राज्ञो दशरथस्यापि स पुत्रानभिकांक्षितान्‌॥ विधास्यति महा
यज्ञे हविर्हुत्वा हुताशने॥ सनत्कुमाराद्वचनमिति वै संश्रुतं मया॥ ऋषिमध्ये कथितं तत्तथा तदिति मे मतं॥ अथ हृ
ष्टो दशरथः सुमंत्रं प्रत्यभाषत॥ तस्य पुण्यात्मनः साधोर्ब्रह्मचर्यव्रतस्य च॥ आनीतिर्ऋष्यशृंगस्य विस्तरेण ममोच्यतां॥
मृगैः सार्धं प्रवृत्तस्य कौमारब्रह्मचारिणः॥ ३०॥ सुमंत्रो नोदितो राज्ञा प्रोवाचेदं वचस्तदा॥ आनीतिर्ऋष्यशृंगस्य येनो
पायेन मंत्रिभिः॥ लोमपादं तमूचुस्ते सहामात्याः पुरोहिताः॥ उपायोत्र निरपायो यो स्माभिः परिचिंतितः॥ ऋष्यशृंगो
वनचरस्तपस्स्वाध्यायने रतः॥ अनभिज्ञः स नारीणां विषयाणां सुखस्य च॥ इंद्रियार्थैरभिरतैर्नरचित्तप्रमाथिभिः॥ पुर
मावाहयिष्यामः क्षिप्रं च प्रविधीयतां॥ गणिकास्तत्र गच्छंतु रूपवत्यः स्वलंकृताः॥ उपायज्ञाः कलाज्ञाश्च वैशिको दारनि
षिताः॥ रहस्युपेत्य ता एवमानयंतु शुभव्रतं॥ लोभयित्वा यथायोगं ये नोपायेन राज्यते॥ श्रुत्वा तथेदं तै राजा प्रत्युवा
च पुरोहितं॥ मंत्रिणश्च स धर्मात्मा तथा चक्रुश्च ते तदा॥ वारमुख्याः समानीता रूपवत्यः स्वलंकृताः॥ प्रत्यूचुर्मुन
यः सर्वे तमानयतु सुंदरीः॥ ताश्च सर्वाभिनंभीता इदमूचुः पुरोहितान्‌॥ गच्छामः सहिताः सर्वा नाथाश्रमानिवेशिताः॥

तस्मात्त्वाश्रमः कार्यो येन गच्छाम वै सुखं ॥ तासां श्रुत्वा वचः सर्वे शिल्पिनश्चक्रुरुत्तमं ॥४०॥ नाव्याश्रमं महत्पुण्यं ना
नापुष्पसमन्वितं ॥ शर्कराक्षीरसंयुक्तं फलं चैव सुवर्तितं ॥ घृतक्षीरविमिश्रं च नानाफलसमन्वितं ॥ मोदकं च फ
लाकारं तेषु वृक्षेषु निर्मितं ॥ तीर्थं मधूदकं कृत्वा तासां वाक्यप्रचोदिताः ॥ वृक्षे वृक्षे सुविन्यस्तं वल्कलं क्षौमयो
जितं ॥ एवं नाव्याश्रमं कृत्वा शिल्पिनस्ते न्यवेदयन् ॥ ततस्ताभ्यो मंत्रिवरा ददुर्नाव्याश्रमं पुनः ॥ वारमुख्याश्च ता
गत्वा वने प्रतिभयं महत् ॥ ऋषिपुत्रस्य धीरस्य नित्यमाश्रमवासिनः ॥ पितुः सन्नित्यसंदिष्टो नातिचक्राम आश्र
मात् ॥ आश्रमस्याविदूरस्थाः यत्नं कुर्वंति दर्शने ॥ विभांडकभयोद्विग्ना लतागुल्मसमावृताः ॥ चारयित्वा तु तमृ
षिमाश्रमादभिनिर्गतं ॥ तस्य संदर्शने नष्टा ऋषिपुत्रांतिकं ततः ॥ न तेन जन्मप्रभृति दृष्टपूर्वं वने चरः ॥ स्त्री
वा पुमान्वा यच्चान्यत्सर्वं नगरराष्ट्रकं ॥ ऋते पितुरृषिश्रेष्ठात्सं जगाम यदृच्छया ॥ वैभांडिकिस्तत्र ताश्च प्रा
पश्यद्वै वरांगनाः ॥ ततः कदाचित्तं देशमाजगाम यदृच्छया ॥५०॥ स तु दृष्ट्वा तु चार्वंग्यस्तास्तदा तनुमध्यमाः ॥
नाश्चित्रवेषाभरणा गायंत्यो मधुरस्वराः ॥ तं देशमुपसंगम्य जातकौतूहलो मुनिः ॥ विभांडकसुतो जिष्णु
स्तस्थौ विस्मितमानसः ॥ ऋषिपुत्रमुपागम्य मनोज्ञा निमृदुं मृदुः ॥ कस्त्वं किं वर्तसे चेह ज्ञातुमिच्छा ॥१९५॥
महे वयं ॥ एकश्च विजने घोरे वने चरसि शंसवत् ॥ अदृष्टपूर्वास्तास्तेन कामरूपधरास्त्रियः ॥ हार्दात्तस्य मति
र्जाता ख्यातुं पितरं ततः ॥ विभांडको नाम पिता पुत्रस्तस्याहमौरसः ॥ ऋष्यशृंग इति ख्यातो नाम कर्म च

मे भुवि ॥ इहाश्रमपदोऽस्माकं समीपे शुभदर्शनाः ॥ करिष्ये तिथिपूजां वः सर्वेषां विधिपूर्वकं ॥ ऋषिपुत्रवचः श्रुत्वा सर्वा
सामभवन्मतिः ॥ तस्याश्रमपदं द्रष्टुं जग्मुः सर्वाश्च तत्र ह ॥ गतानां तत्र वै पूजां चक्रे वैभांडिकिस्तदा ॥ इदमर्घ्य
मिदं पाद्यमिदं मूलफलं च नः ॥ प्रतिगृह्य तु तां पूजां सर्वा एव समुत्सुकाः ॥ गीतमाधुर्यभाषिण्यो जहसुश्चाय ते द्रु
णाः ॥ ऋषिशापभयोद्विग्ना गमनाय मतिं दधुः ॥६०॥ अथैनमूचुः परितास्ताः सर्वाः समाना इदं वचः ॥ फलान्याश्रम
जातानि यदि रोचंति वै द्विज ॥ अस्माकमपि मुख्यानि फलानीमानि संति वै ॥ प्रतिगृह्णातु भद्रं ते भक्षये तानि मा चि
रं ॥ अथास्मै प्रददुः स्वादून्मोदकान्फलसन्निभान् ॥ अन्यांश्च विविधान्भक्षान्मधूनि मधुराणि च ॥ तान्यास्वाद्य
स तेजस्वी फलानीति स मन्यत ॥ अनास्वादितपूर्वाणि वने वननिवासिना ॥ ततस्तं तु समालिंग्य सर्वा हर्षसमु
त्सुकाः ॥ परिसस्वजिरे चैनं पीनैरुरसिजैः सुखैः ॥ आपृच्छ च तदा विप्रं व्रतचर्यां निवेद्य च ॥ स्वमाश्रमपदं
तेस्य व्यपदिश्याविदूरतः ॥ गच्छंति स्मापदेशेन भीतास्तस्य पितुः स्त्रियः ॥ तासु प्रतिगतास्वेव ऋष्यशृंगः समु
त्सुकः ॥ अस्वस्थहृदये सत्त्वं दुःखं स्म परिवर्तते ॥ स स्मरन्नथ तं देशं स जगाम स्त्रियस्तदा ॥ तदुक्ते नैव मनसा
न निद्रामभिगच्छति ॥ अथ सायंतकालेन न्यवर्तत विभांडकः ॥ तदाश्रमं विलोक्यैव पुत्रं चास्वस्थमानसं ॥ पुत्रं च
क्रोधताम्राक्षः कोऽयागत इहाश्रमं ॥७०॥ एवं पृष्टस्तदा तेन ऋष्यशृंगः स गद्गदं ॥ ब्रूते स्म पितरं पूज्यं भोः पितः
श्रूयतां वचः ॥ तदाश्रमपदं प्राप्ताः शुभयो ब्रह्मचारिणः ॥ शिखाविशिष्टा मुनयः प्रदीप्तानलतेजसः ॥ ते भ्योदद

पितः पाद्यमर्घ्यं चैव महामुने ॥ नेमौ तस्य जिरे स्नेहात्त्रीण्या वै ब्रह्मचारिणः ॥ गायंतः स कुमाराणि मनोज्ञानि मुहुर्मुहुः ॥
क्रीडन्निवाङ्गनाकारे स्त्रीणां नर्नयन च वेष्टितैः ॥ अब्रवीद्भगवान्श्रुत्वा ऋष्यशृंगो वचस्तदा ॥ रक्षांसि तेन रूपेण तपसो नाशयन॥
विश्रंभ स्त्रोनेक तथ्यस्तेषु पुत्रकदाचन ॥ एवमुक्त्वा ऋष्यशृंगः समाश्वास्य च काश्यपः ॥ उषित्वा रजनीमेकामरण्ये सज
गाम ह ॥ अथापरे हनि तदा आजग्मुर्वै पुनस्ततः ॥ मनोज्ञा रूपवत्यश्च हृष्टास्ताश्चारुमध्यमाः ॥ ताश्च दृष्ट्वा समायांत
कश्यपस्यात्मजात्मजे ॥ प्रत्युद्गम्याब्रुवन् सर्वाः प्रहसंत्य इदं वचः ॥ एह्याश्रमपदं रम्यं पश्य च समपिनः प्रभो ॥ तत्राप्ये
कविधि श्रीमान्विशेषेण भविष्यति ॥ श्रुत्वा तु वचनं तासां सर्वासां हृदयंगमं ॥ ८० ॥ गमनाय मतिं चक्रे तं च निन्यु
स्तदा स्त्रियः ॥ ततश्चानीयमाने वै तस्मिन्विप्रे महात्मनि ॥ प्रविष्टः स हसा देवो भगवान्पाकशासनः ॥ विभांडके
श्च ब्रह्मर्षिराजगाम स्वमाश्रयं ॥ वन्यमूलफलं प्राप्य भारार्त्तः सो विशङ्कितः ॥ शून्यमावसथं दृष्ट्वा पुत्रदर्शनलाल
सः ॥ परिश्रांतस्तथैवासीद्रुत्वा पादधावनं ॥ चुक्रोश ऋष्यशृंगेति सर्वतः स विलोकयन् ॥ न चापश्यत्सुतं तत्र
काश्यपो भगवानृषिः ॥ स स्वाश्रमान्निश्चक्राम तमन्वेष्टुं सुतं ततः ॥ निष्क्रम्य च वनात्तस्मान्नेददर्श च काश्यपः ॥
ग्रामांश्च परिपृच्छ गोकुलानि च सर्वशः ॥ कश्चैष विषयः सौम्यः ग्रामाश्च बहुगोकुलाः ॥ ऋषेर्वचनमाकर्ण्य
सर्वे ते गोपजीविनः ॥ कृतांजलिपुटो भूत्वा विनयेनाचचक्षिरे ॥ अंगेषु प्रथितो राजा लोमपाद इति श्रुतः ॥ तेनाभिरक्ष
क्षितं सर्वे ग्रामा ह्येते सगोकुलाः ॥ पूजार्थमृष्यशृंगस्य विभांडकसुतस्य वै ॥ एवमुक्तस्तु स मुनिर्दृष्ट्वा ध्यानेन चक्षुषा ॥ भ

विप्रमेतद्ज्ञात्वा च भीतास्तास्तन्यवर्त्तत ॥ ९० ॥ ऋषिपुत्रोपि धर्मात्मा नीयमानवरमास्थितः ॥ मेघनादेन महता कृत्वा सतिमिरं तथा ॥
महाजलौघवर्षेण राजधानीमुपाययौ ॥ वर्षेणोपगतं विप्रं विषये स्वे नराधिपः ॥ मेने प्रत्युद्गतश्चैव शिरसाभिप्रणम्य
तं ॥ अर्घ्यं च प्रददौ तस्मै पूजां कृत्वा तु राजा स्वतः ॥ वव्रे प्रसादं विप्रेंद्रान्मा विप्रं मन्युराविशत् ॥ अंतःपुरं प्रवेश्यैनं कन्यां दत्वा
यथाविधिः ॥ शांतं शांतेन मनसा राजा हर्षमवाप सः ॥ एवं स न्यवसत्तत्र सर्वकामैस्तु पूजितः ॥ ऋष्यशृंगो महातेजाः शांत
या सह वीर्यवान् ॥ संपूज्यमानो परया मुदान्वितो महर्षिपुत्रो नरदेवसद्मनि ॥ उवास तस्मिन्स ह शांतया सुखी पु
रे महेंद्रस्य यथा बृहस्पतिः ॥ ९६ ॥ ॥ इत्यार्षे रामायणे बालकांडे ऋष्यशृंगाभिगमनं नाम षष्ठमः सर्गः ॥ ६ ॥
भूय एव च राजेंद्र शृणु मे वचनं हितं ॥ यथा स देवप्रवरः कथयामास धर्मवित् ॥ इक्ष्वाकूणां कुले जातो भविष्यति
सुधार्मिकः ॥ नाम्ना दशरथो वीरः श्रीमान्सत्यप्रतिश्रवः ॥ सख्यं तस्यांगराजेन भविष्यति महात्मनः ॥
कन्या तस्य महाभागा शांता नाम भविष्यति ॥ अपुत्रस्त्वंगराजो वै लोमपाद इति श्रुतः ॥ स राजानं दशरथं
प्रार्थयिष्यति भूमिपः ॥ अनपत्योस्मि धर्मात्मन् कन्येयं मम दीयतां ॥ शांतां शांतेन मनसा पुत्रार्थं वरवर्णिनीं ॥ त
तो राजा दशरथो मनसाभिविचिंत्य तत् ॥ दास्यते तां तदा कन्यां शांतामंगाधिपाय सः ॥ प्रतिगृह्य तु तां कन्यां
स राजा विगतज्वरः ॥ नगरं यास्यति क्षिप्रं प्रहृष्टेनांतरात्मना ॥ कन्यां नाम ऋष्यशृंगाय प्रदास्यति स वीर्यवान् ॥

वाल्मी॰ राम॰ बा॰ ॥१२॥

सत्युप्रतिश्रवो राजा सचस्तु ध्रोभविष्यति ॥ तं च राजा दशरथो यशस्कामः कृतांजलिः ॥ ऋष्यशृंगं द्विजश्रेष्ठं वरयिष्यं
ति धर्मवित् ॥ यज्ञार्थं प्रसवार्थं च स्वर्गार्थं च नरेश्वरः ॥ लप्स्यते च स तं कामं द्विजमुख्याद्विशांपतिः ॥ सुताश्चास्य भवि
ष्यंति चत्वारो मिततेजसः ॥१०॥ वंशप्रतिष्ठानकराः सर्वलोकेषु विश्रुताः ॥ एवं स देवप्रवरः पूर्वं कथितवान्कथां ॥
सनत्कुमारो भगवान्पूर्वं देवयुगे प्रभुः ॥ सत्वमेत्रवचो नूनं तमानय सुसत्कृतं ॥ स्वयमेव महाभाग सबल्लवा
हनः ॥ सूतस्य वचनं श्रुत्वा राजा संपूर्णमानसः ॥ अनुमंत्र्य वसिष्ठं च सूतवाक्यं निवेद्य च ॥ वसिष्ठेनाभ्यनुज्ञातो
राजा दशरथस्तदा ॥ सांतःपुरः सहामात्यः प्रययौ यत्र स द्विजः ॥४॥ वनानि सरितश्चैव व्यतिक्रम्य शनैः शनैः ॥ व्य
तिचक्राम तं देशं यत्रासौ मुनिपुंगवः ॥ लोमपादपुरं प्राप्य प्रविवेश सुपूजितः ॥ तत्रास सादराजा तु लोमपा
दनिवेशनं ॥ ऋषिपुत्रं ददर्शासौ दीप्यमानमिवानलं ॥ ततो राजा लोमपादः पूजां तस्य चकार ह ॥ सखित्वात्त
त्र राज्ञश्च प्रहृष्टेनांतरात्मना ॥ स एवं सत्कृतस्तेनावसंस्तत्र नरर्षभः ॥ सप्ताष्टौ दिवसान्राजा ततो वचनमब्र
वीत् ॥ शांता तव सुता वीर सह भर्त्रा विशांपते ॥ मदीयं नगरं यातु कार्यं हि महदुद्यतं ॥२०॥ तथेति राजा संश्रु
त्य गमनं तस्य धीमतः ॥ लोमपादो गमद्कृ ऋषिपुत्राय धीमते ॥ सख्यं संबंधिकं चैव तत्सर्वं प्रत्यवेदयत् ॥
अयं राजा दशरथो सखा मे दयितः सुहृत् ॥ अपत्यार्थं मया मानेन दत्तेयं वरवर्णिनी ॥ याचमानस्य मे ब्रह्मन्शांता
प्रियतरा मम ॥ सोयं ते श्वशुरो विप्र यथैवाहं तथा नृपः ॥ शरणं त्वामनुप्राप्तः पुत्रार्थं द्विजसत्तम ॥ पुत्रकाम ॥११॥

मिमं तात सफलं कर्तुमर्हसि ॥ तारये नमितो गत्वाशां तया सह भार्यया ॥ ऋषिपुत्रोथ तद्बुद्ध्वा तथेत्याह नृपं तदा ॥
गच्छेति विप्रवचनाद्राज्ञोवाच ततो नृपं ॥ नृपेण चाभ्यनुज्ञातः प्रययौ सह भार्यया ॥ तावन्योन्यं चकृतां लिपुष्प
चाश्लिष्योरसि विश्व ॥ गमने मतिमाधत्त राजा दशरथस्तदा ॥ सोनुज्ञातो दशरथस्तेन राज्ञा महीपतिः ॥ प्रय
यौ स्वां पुरीं वीरः शांतामादाय सत्वरं ॥ ततो राजा प्रहृष्टात्मा प्रेषयामास वै तदा ॥ क्रियतां नगरं सर्वं शीघ्रमेव स्वलंकृतं ॥ ततः प्रहृष्टाः पौ
रास्ते श्रुत्वा राजानमागतं ॥३०॥ तथा चक्रुश्च तत्सर्वं राज्ञा यत्प्रेषितं तदा ॥ ततः स्वलंकृतं राजा नगरं प्रविवेश ह ॥ शंखदुंदुभि
निर्घोषैः पुरस्कृत्य द्विजर्षभं ॥ ततः प्रमुदिताः सर्वे दृष्ट्वा वै नागरा द्विजं ॥ प्रवेश्यमानं सत्कृत्य नरेंद्रेणेंद्रकर्मणा ॥ अंतःपु
रं प्रवेश्यैनं पूजां कृत्वा तु शास्त्रतः ॥ कृतकृत्यं तदात्मानं मेने तस्योपगमात्प्रभुः ॥ अंतःपुराणि सर्वाणि दृष्ट्वा शांतां तथागतां ॥
सह भर्त्रा विशालाक्षीं प्रत्यनंदन्मुदायुतां ॥ संपूज्यमाना सुतिभिर्यथा राजा विशेषतः ॥ उवास तत्र स सुखं किंचित्कालं
द्विजर्षभः ॥ उपास्यमानः शुश्रूषैः शांतया प्रियरूपया ॥ अरुंधत्या यथा युक्तो वसिष्ठो ब्रह्मणः सुतः ॥ ॥२६॥ ॥ इ
त्यार्षे रामायणे बालकांडे ऋष्यशृंगागमनं नाम सर्गः ॥९ ॥ अथ काले बहुतिथे कस्मिंश्चित्सुमनोहरे ॥ व
संते समनुप्राप्ते राज्ञो यष्टुं मनोगमत् ॥१॥ ततः प्रसाद्य शिरसा तं विप्रं देववर्णिनं ॥ यज्ञार्थं वरयामास संतानार्थं च बु
द्धिमान् ॥ तथेति स च राजानमुवाच प्राप्तसत्क्रियः ॥ संभाराः संभ्रियंतां ते साहाय्याश्च द्विजातयः ॥ ततो राजाब्र

वा॰श्री॰राम॰बा॰
११८॥

बीक्षतं ब्राह्मणान् सपुरोहितान् ॥ क्षिप्रमानय धर्मज्ञ यज्ञार्थं मम सुव्रत ॥ वेदविद्याव्रतस्नातान् यत्कर्म सुनिष्ठितान् ॥ सु
नभाष्यविदश्चैव वेदवेदांगपारगान् ॥ गृहमेधिनो दरिद्रांश्च वृद्धानपि कवृत्तिणः ॥ श्रोत्रियांश्चाविदित्वा स्तांस्तान्सत्कृत्य
समुपानय ॥ श्रुत्वा राज्ञोथ वचनं सुमंत्रस्त्वरितस्तदा ॥ आनयामास तान् सर्वान् ब्राह्मणान् वेदपारगान् ॥ सुयज्ञं वा
मदेवं च जाबालिमथ काश्यपं तथा ॥ पुरोहितं वसिष्ठं च तथैवान्यान् द्विजातयः ॥ तान्पूजयित्वा धर्मात्मा राजा दशरथस्तदा ॥
इदं धर्मार्थसहितं श्लक्ष्णं वचनमब्रवीत् ॥ मम लालप्यमानस्य पुत्रार्थं नास्ति मे सुतः ॥ तदर्थं हयमेधेन यक्ष्यामीति मति
र्मम ॥ तदर्थं यष्टुकामो हि हयं पूर्वेण कर्मणा ॥ ऋषिपुत्रप्रभावेन कामं प्राप्स्याम्यहं द्विजाः ॥ ततः साध्विति तद्वाक्यं ब्रा
ह्मणाः प्रत्यपूजयन् ॥ वसिष्ठप्रमुखाः सर्वे पार्थिवस्य मुखाच्च्युतं ॥ ऋष्यशृंगपुरोगास्ते प्रत्यूचुर्नृपतिं ततः ॥ संभाराः
संभ्रियंतां ते तुरगश्च विमुच्यतां ॥ सर्वथा प्राप्स्यसे पुत्रान् चतुरोमितविक्रमान् ॥ यस्य ते धार्मिकी बुद्धिरियं पुत्रार्थमा
गता ॥ ततः प्रीतोभवद्राजा श्रुत्वा तद्द्विजभाषितं ॥ अमात्यांश्चाब्रवीत्तत्र हर्षवेगाकुलाक्षरं ॥ गुरूणां वचनाच्छीघ्रं सं
भाराः संभ्रियंतु मे ॥ समर्थाधिष्ठितश्चाश्वः सोपाध्यायो विमुच्यतां ॥ शांतयश्चापि कल्प्यंतां तत्र कर्मे यथाविधि ॥
शक्यमाप्तुं यथा यज्ञं तत्सर्वं संविधीयतां ॥ सरय्वाः सरितः पारे यज्ञभूमिर्विधीयतां ॥ नापचारो भवेद्राष्ट्रे यथास्मि
न्कुरुपुंगव ॥ छिद्रं हि मृगयंते तु विद्वांसो ब्रह्मराक्षसाः ॥ विघ्ने तु तस्य यज्ञस्य कर्ता सद्यो विनश्यति ॥ तद्यथाविधिपू

रा॰ बा॰
११८॥

र्वं मे क्रतुरेष समाप्यते ॥ तथा विधानं क्रियतां समर्थैः सर्वकर्मणि ॥२०॥ तथेति तद्वचः श्रुत्वा मंत्रिणः प्रत्यपूजयन् ॥ पा
र्थिवेंद्रस्य तत्सर्वं तथाज्ञां प्रत्यपालयन् ॥ ततो द्विजास्ते धर्मज्ञा वर्धयित्वा च तं नृपं ॥ अनुज्ञातास्तदा राज्ञा प्रतिजग्मु
र्यथागतं ॥ गतेषु द्विजमुख्येषु मंत्रिणोपि नराधिपः ॥ विसर्ज्य सर्वान् स्वं वेश्म प्रविवेश महाद्युतिः ॥ प्रजार्थं समभिप्रेतं निद
र्नं चाप्यमन्यत ॥२४॥ ॥ इत्यार्षे रामायणे बालकांडे वसिष्ठवाक्यं नाम दशमः सर्गः ॥ ॥६४॥ ॥
॥ पुनः प्राप्ते वसंते तु पूर्णः संवत्सरोभवत् ॥ अभिवाद्य वसिष्ठं तु न्यायतः प्रत्यपूजयत् ॥ अब्रवीन्मधुरं वाक्यं प्रस
वार्थं द्विजोत्तमं ॥ यज्ञः संस्क्रियतां शीघ्रं यथाशास्त्रं सुनिश्चितं ॥ यथा न विघ्नः क्रियते यज्ञांगेषु न किंचन ॥ भवान्
स्निग्धसुहृन्मह्यं गुरुश्च परमो भवान् ॥ वोढव्यो भरता चैव भारो यज्ञस्य चानघ ॥ तथेति च स राजानमब्रवीद्द्विज
सत्तमः ॥ करिष्ये सर्वमेवैतद्भवतो यदभीप्सितं ॥ ततोब्रवीद्द्विजान् वृद्धान्यज्ञकर्मसुनिष्ठितान् ॥ स्थापत्ये चैव ह स्था
र्थं तां वृद्धाः परमधार्मिकाः ॥ कर्मांतिकान् शिल्पकारान् खनकान्वर्धकानपि ॥ गणकाः शिल्पिनश्चैव तथैव नटनर्तका
न् ॥ ततोब्रवीच्छास्त्रविदः पुरुषान्सुबहुश्रुतान् ॥ यज्ञकर्म समीहंतां भवंतो राजशासनात् ॥ इष्टकाश्च बहुसा
हस्री शीघ्रं चाह्रियतां द्विजान् ॥ उपकार्याः क्रियंतां च राज्ञो बहुगुणान्विताः ॥ ब्राह्मणावसथाश्चैव क्रियंतां शतशः
शुभाः ॥ भक्ष्यान्नपानैर्बहुभिः समुपेताः सुनिष्ठिताः ॥ तथा पौरजनस्यापि कर्तव्या बहुविस्तराः ॥१०॥ आवासा बहुभि

ब्रुवन्ति सर्वेऽपि तथा जानपदस्य च … सत्कृत्य तथा … सर्वे च यथा

श्चाना: सर्वकामै: सुपूजिता: ।। तथा जानपदस्येह कर्तव्यं बहुभोजनं ।। दातव्यमन्नं विधिवत्सत्कृत्य न तु पीडया ।। सर्वे वर्णा य
थापूजां प्राप्नुवन्ति सुसत्कृता: ।। नावमान: प्रयोक्तव्य: कामक्रोधवशात् क्वचित् ।। यज्ञकर्मसु येऽव्यग्रा: पुरुषा: शिल्पिनस्तथा ।।
पूजा कार्या विशेषेण तेषामप्यनुपूर्वश: ।। यथा सर्वं सुविहितं न किंचित्परिहीयते ।। तथा भवंत: कुर्वंतु प्रीतिस्निग्धेन चेतसा ।।
ततः सर्वे समागम्य वसिष्ठमिदमब्रवीत् ।। यथोक्तं तत्करिष्यामो न किंचित्परिहास्यते ।। तत: सुमंत्रमाहूय वसिष्ठो वाक्य
मब्रवीत् ।। निमंत्रयस्व नृपतीन् पृथिव्यां ये च धार्मिका: ।। ब्राह्मणान् क्षत्रियान् वैश्यान् शूद्रांश्चापि सहस्रश: ।। समा
नयस्व सत्कृत्य सर्वदेशेषु मानवान् ।। मिथिलाधिपतिं शूरं जनकं दृढविक्रमं ।। निष्ठितं सर्वशास्त्रेषु तथा वेदेषु निष्ठि
तं ।। तमानय महाभागं स्वयमेव सुसत्कृतं ।। पूर्वसंबंधिकं ज्ञात्वा ततो वाक्यं ब्रवीमि ते ।। तथा काशिपतिं शूरं सततं प्रियवा
दिनं ।।२०।। वयस्यं राजसिंहस्य तमानय यशस्विनं ।। तथा केकयराजानं वृद्धं परमधार्मिकं ।। श्वशुरं राजसिंहस्य सपुत्रं त्व
मिहानय ।। अंगेश्वरं तथा स्निग्धं लोमपादं सुसत्कृतं ।। सुव्रतं देवसंकाशं स्वयमेवानुमानय ।। प्राच्यांश्च सिंधुसौवीरान्
सुराष्ट्रेयांश्च पार्थिवान् ।। दाक्षिणात्यान् नरेंद्रांश्च सर्वानानय मा चिरं ।। अतिस्निग्धाश्च ये चान्ये पि राजान: पृथिवीश्व
रा: ।। तानन्यानय वै क्षिप्रं सानुरागान्सबांधवान् ।। वसिष्ठवाक्यं तच्छ्रुत्वा सुमंत्रस्त्वरितस्तदा ।। व्यादिशत्पुरुषां
स्तत्र राज्ञामानयने बहून् ।। स्वयमेव च धर्मात्मा प्रययौ राजशासनात् ।। सुमंत्र: प्रयतो भूत्वा समानेतुं महीक्षित: ।।
ततः कर्मांतिका: सर्वे वसिष्ठाय महात्मने ।। सर्वं निवेदयंति स्म यज्ञे यानुपकल्पितान् ।। तत: प्रीतो द्विजश्रेष्ठ

स्तान्सर्वान्पुनरब्रवीत् ।। अवज्ञया न दातव्यं कस्यचिल्लीलयापि वा ।। अवज्ञया कृतं हन्याद्दातारं नात्र संशय: ।। ततः कैश्चिदहोरात्रैरुपायाता महीक्षित: ।। रत्नान्यादाय सुबहून् राज्ञो दशरथस्य ह ।। त
या हि यद्दत्तं तद्दातुर्दोषमावहेत् ।। ततः केश्चिदहोरात्रे रूपाया ता महीक्षित: ।। रत्नान्यादाय सुबहू राज्ञो दशरथस्य ह ।। त
तो वसिष्ठ: सुप्रीतो राजानमिदमब्रवीत् ।।२१।। उपायाता नरव्याघ्र राजानस्तव शासनात् ।। मया पि सत्कृता: सर्वे
यथार्हं पूजिताश्च ते ।। यथावत्सेवितं सर्वं पुरुषै: स्वै: समाहितै: ।। संप्राप्ते विभवे हि ष्टोयज्ञे संभारसंभृते ।। सर्वका
मैरुपहृतैरुपपन्नं समंततः ।। क्रियतां वचनान्मह्यं ऋष्यशृंगस्य चैव हि ।। शुभे दिवसनक्षत्रे निर्यातु जगतीपति: ।।
ततो वसिष्ठप्रमुखा: सर्व एव द्विजातय: ।। अश्वमेधं पुरस्कृत्य यथाकर्मारभंस्तथा ।।३६।। ।। इत्यार्षे रामायणे
बालकांडे यज्ञारंभो नामैकादश: सर्ग: ।। ।।१४।। ।। अथ संवत्सरे पूर्णे प्राप्ते तस्मिंस्तुरंगमे ।। सरय्वा
उत्तरे कूले राज्ञो यज्ञो भ्यवर्धत ।। ऋष्यशृंगं पुरस्कृत्य कर्म चक्रुर्द्विजर्षभा: ।। अश्वमेधे महायज्ञे राज्ञस्तस्य महात्मन: ।।
कर्म कुर्वंति विधिवद्याजका वेदपारगा: ।। यथाविधि यथान्यायं परिक्रामंति शास्त्रत: ।। प्रवर्ग्यं शास्त्रत: कृत्वा तथैवोपस
दं द्विजा: ।। चक्रुश्च विधिवत्सर्वं तथैवोद्दिष्टकर्म ते ।। अभिपूज्य ततो हृष्टा: सर्वे चक्रुर्यथाविधि ।। सवनानि यथा
न्यायं सोमाय वै सोमसन्नमा: ।। नानाकृतमभून्नत्र संमितं वापि किंचन ।। दृश्यते ब्रह्मवत्सर्वं क्रमयुक्तं च चक्रिरे ।।
न तेष्वहस्सु श्रांतो वा क्षुधितो वा दृश्यते क्वचित् ।। नाविद्वान् ब्राह्मणस्तत्र नाशतानुचरो द्विजः ।।
तथा शतसहस्रश: ।। न स्त्रियज्ञे तपो दृष्टा नानादेशनिवासिन: ।। नाविद्वान् ब्राह्मणस्तत्र नागतानुचरो द्विज: ।।

नानाहिताग्निर्नायज्वा नाव्रतीप्रतितो न च ॥ ब्राह्मणानां सहस्राणि शतानि च महामखे ॥ पृथग्भुभुजिरे नानि स्वादूनि विविधानि च ॥
ह्लक्ष्मपात्रीषु नेकासु राजतीषु च सर्वशः ॥ द्विजातयो न्नपानानि तत्र भुंजीत सत्कृताः ॥ न ते षद्सु वर्णेषु क्षुधिते दृश्यते क चित्
नाविद्वान्नाश्रमस्थः कश्चिद्दृश्यते तत्र वे तदा ॥ अनाथाः भुंजते नित्यं नाथवंतेऽप्यभुंजते ॥ तापसा भुंजते चापि भुंजते श्रम व
णा अपि ॥ अनाथानां तथा स्त्रीणां बालवृद्धस्य चैव हि ॥ बुभुक्षितानां दीनानां सुतृप्ति रूपलक्ष्यते ॥ दीयतां दीयता
मन्नं वासांसि विविधानि च ॥ यथोचितं समाख्यातैः कर्म चक्रुरतंद्रिताः ॥ अन्नपानं च सुबहु दृश्यते पर्वतोपमं ॥
दिवसे दिवसे तत्र भक्ष्यं तु विधिवत्तदा ॥ अन्नं हि रसवत्स्वादु प्रशंसंति द्विजर्षभाः ॥ अहोस्म तृप्त्या भद्रं वदंति
स्म शृण्वते भृशं ॥ अलंकृताश्च राजानो ब्राह्मणान्पर्यसेवयन् ॥ सुप्रीतमनसः सर्वे सुमृष्टमणिकुंडलाः ॥ क
र्मांतरे तु संप्राप्ते हेतुवादान्बहूंस्तदा ॥ प्राहुः सुवाग्मिनो धीराः परस्परजिगीषवः ॥ ऋष्यशृंगादयो मंत्रैः शिक्षा
क्षर समन्वितैः ॥ आह्वानं चक्रिरे तत्र शक्रादीन्विबुधोत्तमान् ॥ यापितिभिर्मधुरैः स्निग्धैः मंत्राह्वानैर्यथार्हतः ॥
होतारो जुहुयामासुर्हविर्भागान्दिवौकसः ॥२०॥ दिवसे दिवसे चक्रुः संसरे कुशलैर्द्विजाः ॥ सर्वकर्म यथावत्तद्यथा
शास्त्रेण नोदितं ॥ नाषडंगविदत्रासीन्नाव्रतो न बहुश्रुतः ॥ सदस्यास्तत्र वै राज्ञो नावादकुशला द्विजाः ॥ प्राप्ते यूपो
च्छ्रये तस्मिन्षड्बैल्वाः खादिरास्तथा ॥ तथा पर्णमयाश्चैव षडन्ये विश्वसंमताः ॥ श्लेष्मातकमयस्त्विग्ध देवदारुमयस्त
था ॥ द्वावेतौ तत्र विहितौ बाहुव्यामपरिग्रहौ ॥ कारिताः सर्व एवैते शास्त्रज्ञैर्यज्ञकोविदैः ॥ महोछ्रायपरीणाहा

सर्व
॥२०॥

यूपोन्यः सर्वकांचनः ॥ अश्वाश्रयः सर्व एव श्लक्ष्णा रूपसमन्विताः ॥ आच्छादितास्ते वासोभिः कुशलैः शिल्पकर्मणि ॥ सर्वैश्च
राजसिंहस्य संचितः कुशलैर्द्विजैः ॥ गरुडो रुक्मपक्षो वै त्रिगुणो ह्यष्टादशात्मकः ॥ नियुक्तास्तत्र पशवस्तास्ता उद्दिश्य
देवताः ॥ जलेचराः स्थलचरा अंतरिक्षचरास्तथा ॥ पतंगाः पक्षिणश्चैव तथा वनचराश्च ये ॥ ऋषभाः सर्व एवैते नियु
क्ताः शास्त्रतस्तथा ॥ पशूनां त्रिशतं तत्रासीद्यूपेषु नियतं सदा ॥ अस्य चाधः कृतश्चासीडुरुडः कांचनेष्टकः ॥ अश्वरत्नं
चावभृथे प्रोक्षितं वैश्वदैविकं ॥ स यज्ञो ववृधे तत्र राज्ञो दशरथस्य च ॥ कौसल्या तं हयं तत्र परिचर्य समन्विता ॥ वि
षाणैर्विशशासैनं त्रिभिः परमया मुदा ॥ पतत्रिणा तदा सार्धं तदा मूले समाविशत् ॥ अवसद्रजनीमेकां कौसल्या धर्म
काम्यया ॥ होताध्वर्युस्तथोद्गाता सत्यः हस्तमयोजयन् ॥ महिष्याः परिवृत्यं च तामवावृत्तथापरं ॥ स त्रिणस्तस्य तु वपा
मुद्धृत्य नियतेंद्रियाः ॥ ऋत्विजस्तु सुसंपन्नाः श्रपयां चक्रिरे हयं ॥ हयस्य यानि चांगानि तानि सर्वाणि ते द्विजाः ॥
अग्नौ प्रास्यंति विधिवत्समस्तं वै हयं तदा ॥ प्लक्षशाखासु यज्ञानामन्येषां क्रियते हविः ॥ अश्वमेधस्य चैतस्य
वेतसो भाग इष्यते ॥ अहोऽश्वमेधः संख्यातः कल्पसूत्रेषु वै द्विजः ॥ चतुष्टोय स्तथाहस्तस्य प्रथमं परिकल्पितं ॥
उक्थ्यं द्वितीयं संख्यातमतिरात्रं तथोत्तरं ॥ विवरास्तत्र बहवो विहिताः शास्त्रदर्शनात् ॥ ज्योतिष्टोमायुषी
ते व अतिरात्रौ विनिर्मितौ ॥ अभिजिद्विश्वजिच्चैव अप्तोर्यामो महाक्रतुः ॥४०॥ प्राचीमध्वर्यवे राजा दि

रांस्फीतां ददौ तदा॥ दक्षिणे ब्रह्मणे होत्रे प्रतीचीं समदाद्दिशं॥ उद्गात्रे च ततो दीचीं दक्षिणैषा विनिर्मिता॥ अश्वमेधे म
हायज्ञे पुराकल्पे स्वयंभुवा॥ ऋत्विंस्ते च तदा न्यायतः पुरुषर्षभः॥ ऋत्विग्भ्यः प्रददौ राजा ध्वरांता क्रतुवर्धनः॥ ऋत्वि
जो थाब्रुवन् सर्वे राजानं गतकल्मषं॥ भवानेव मही स्फीतां एका रा सितुमर्हसि॥ विप्रा आभवरां जौ दूअ स्मकं तथिमा
वह॥ न भूम्या कार्यमस्माकं अहो क्तः पालनेवयं॥ रतास्वाध्यायकरणे वयं नित्यं हि भूमिप॥ निष्क्रयं किंचनेर स्त्रैव अस्मभ्यं
दातुमर्हसि॥ गवां रातसहस्राणि दशातेभ्यो ददन्नृपः॥ दशकोटिः सुवर्णस्य रजतस्य चतुर्गुणं॥ ऋत्विजस्ते ततः सर्वे अ
ददुः सहिताव सु॥ ऋष्यश्रृंगाय महिते वसिष्ठाय च धीमते॥ ततस्ते न्यायतः कृत्वा प्रतिभागं द्विजोत्तमाः॥ दीनां धकृप
णांतांश्च प्रधानो चकलत्रिणां॥ स्त्रीणां हतप्रवीराणां प्रधानी बालपुत्रिणां॥ आधिकर्शितगात्राणां गुर्वर्थं चाभि
याचतां॥५०॥ यतिभिक्षूणां दरिद्राणा परिरोद्ध निवासिनां॥ सुप्रीतमनसः सर्वे प्रत्यूचुर्मुदितास्तदा॥ ततस्तु सर्वं चोके
भ्यो हिरण्यस्य समुच्चयान्॥ कोटी रातं सुवर्णस्य कुलस्योद्वाहनं शुभं॥ ततः प्रीतमना राजा प्राप्य यज्ञमनुत्तमं॥ स्वर्यं
पापापहं चैव दुष्प्रापं सर्वपार्थिवैः॥ ततो ब्रवीद्दृष्यश्रृंगं राजा दशरथस्तदा॥ पुत्रानिच्छाम्यहं विप्र कुलस्योद्वाहनान्
शुभान्॥ तथेति च स राजानमुवाच द्विजसत्तमः॥ भविष्यंति सुता राजंश्चत्वारस्ते कुलोद्वहाः॥ लोकपालोपमा वी
राः परदर्पविनाशनाः॥५६॥ ॥ इत्यार्षे रामायणे बालकांडे यज्ञकार्यकथनं नाम द्वादशः सर्गः॥ ॥
॥ ऋष्यश्रृंगस्तु मेधावी राजानं पुनरब्रवीत्॥ इष्टिं करोमि पुत्रीयां भवतः पुत्रकारणे॥ ततः प्रचक्रमे ताभिः

राम ॥२९॥

ऋषिपुत्रसमृद्धये॥ दीप्ताग्नाव जुहोद्धव्यं विधिदृष्टेन कर्मणा॥ ततो देवाः सगंधर्वाः सिद्धाश्च ऋषिभिः॥ सह भागः प्रति
ग्रहार्थं वै पूर्वमेव समागताः॥ अश्वमेधे महायज्ञे राज्ञस्तस्य महात्मनः॥ ब्रह्मा सुरेश्वरः स्थाणुस्तथा नारायणः प्रभुः॥ च
त्वारो लोकपालाश्च देवतानां च मातरः॥ यज्ञास्तथैव सर्वे च वेदाश्च सहितास्तथा॥ इंद्रश्च भगवांस्साक्षान्मरुद्गण
वृतः प्रभुः॥ आजगाम महायज्ञे राज्ञो दशरथस्य च॥ देवांस्तानागतान्सर्वान्ब्रवीद्द्विजसत्तमः॥ प्रसादः क्रि
यतां राज्ञः प्रसवार्थं हि देवताः॥ राजायं धार्मिको विद्वान्कृतविद्यः परंतपः॥ प्राप्तवानश्वमेधं च श्रद्धात्मागतकल्म
षः॥ पुत्रार्थं तप्यते चैव दीर्घकालं महाद्युतिः॥ प्रयच्छत सुतान्तस्मै चतुरः कुलवर्धनान्॥ तं तथेत्यब्रुवन् देवा द्विज
मुखं कृतांजलिं॥ भवान्मान्यश्च पूज्यश्च राजा चायं विशेषतः॥१०॥ लप्स्यते च परं कामं पुत्रार्थं द्विजसत्तम॥ इष्टिर्हि
विधिवत्प्राप्ता राज्ञा दशरथेन वै॥ ते थात मुक्त्वा देवास्तु सर्व एवं महाद्युतिं॥ अब्रुवन् लोककर्तारं ब्रह्माणं वचनं म
हत्॥ भगवंस्त्वत्प्रसादेन रावणो नाम राक्षसः॥ सर्वान्नो बाधते वीर्याद्धूधितुं तन्न शक्नुमः॥ त्वया तस्मै वरो दत्तः प्रीते
न भगवन्पुरा॥ देवदानवयक्षाणामवध्योस्मीति कामतः॥ मानयंतश्च तद्वाक्यं तस्य सर्वं क्षमामहे॥ उद्वेजयति लो
कांस्त्रीनुच्छ्रितान्द्वेष्टि दुर्मतिः॥ शक्रं सुरगणेत्री चैव स धर्षयितुमिच्छति॥ ऋषीन्स यक्षान्गंधर्वान्सुरान् ब्राह्मणां
स्तथा॥ नष्टैवैश्रवणस्य का लोकौ तद्वीर्यपीडित॥ जन्तोर्भिमालीतं दृष्ट्वा सागरोपि च कंपते॥ उत्सन्ने नोभयं तस्मा

द्रक्षसोभिमदर्शनात् ॥ वधार्थं तस्य भगवानुपायं वक्तुमर्हसि ॥ एवमुक्तः सुरैः सर्वैर्ब्रह्मा ध्यात्वा ततोऽब्रवीत् ॥२०॥ हन्तायं विहितस्त
स्य वधोपायो दुरात्मनः ॥ न च गंधर्वयक्षाणां देवतासुररक्षसां ॥ अवध्योस्मीति तेनोक्ते तथेत्युक्तं च तन्मया ॥ अवज्ञया हि रक्षे
स्तान्याहरेन्मानुषान्वरान् ॥ तेनासौ मानुषैर्वध्यो मृत्युर्नान्योस्य विद्यते ॥ तच्छ्रुत्वा तु प्रियं वाक्यं ब्रह्मणा समुदीरितं ॥ ग
न्धर्वर्षिसमायुक्ताः प्रहृष्टा वाक्यमब्रुवन् ॥ एतस्मिन्नंतरे विष्णुं विधिना सर्व एव ते ॥ देवता ब्रह्मणा सार्धं तेन स्तुस्तत्र समा
हिताः ॥ अब्रुवंस्ते तदा सर्वे सुराः संपूर्णमानसाः ॥ त्वां नियोक्ष्यामहे विष्णो लोकानां क्रियतो हितं ॥ तस्य ते तद्वचः श्रु
त्वा यत्कमूचुरिदं सुराः ॥ एष राजा दशरथो हयमेधेन दीक्षितः ॥ धर्मज्ञो गुणवाञ्श्लाघ्यः सत्यवादी दृढव्रतः ॥
अस्य भार्यासु तिसृषु ह्रीश्रीकल्पासु धीमतः ॥ विष्णो पुत्रत्वमागच्छ कृत्वात्मानं चतुर्विधं ॥ त्वं तत्र मा
नुषो भूत्वा प्रवृद्धं लोककंटकं ॥ राक्षसो रावणो नाम वीर्योत्सेकेन बाधते ॥ तमुल्बणं रावणमुग्रमाहवे प्रवृद्धदर्पं
त्रिदशेश्वरद्विषं ॥ तं रावणं विबुधगणस्य कंटकं पराक्रमाः दुष्प्रमानं भवानिति ॥३०॥ ॥ इत्यार्षे रामायणे बा
लकांडे रावणवधोपायो नाम सर्गः ॥१३॥ ॥१४॥ ॥ स नियुक्तः सुरैः सर्वैर्विष्णुर्नारायणस्तथा
च उपगम्य सुरांस्तत्वान्श्लक्ष्णं वचनमब्रवीत् ॥ क उपायो वधे तस्य राक्षसाधिपतेः सुराः ॥ यदहं तं समास्थाय निहन्या
मृषिकंटकं ॥ एवमुक्ताः सुराः सर्वे प्रत्यूचुर्विष्णुमव्ययं ॥ मानुषं रूपमास्थाय तद्रक्षो जहि कंटकं ॥ तेन तप्तेन तपसा तीव्र
दीर्घकालमरिंदम ॥ येन तुष्टोऽभवद्ब्रह्मा लोककृल्लोकपूजितः ॥ स तुष्टः प्रददौ तस्मै राक्षसाय वरं प्रभुः ॥ नाना

विधेभ्योपि तेभ्यो भयमन्यत्र मानुषात् ॥ स पूर्वं हि वरप्राप्तो राक्षसाधिपतिः प्रभो ॥ तस्मात्तस्य वधो दृष्टो मानुषेभ्यः परंतप
इत्येतद्वचनं श्रुत्वा सुराणां विष्णुरव्ययः ॥ पितरं रोचयामास तदा दशरथं नृपं ॥ अजस्य पुत्रो नृपतिस्तस्मिन्काले यदृच्छया ॥
याज्यते द्विजमुख्येन पुत्रार्थमरिसूदन ॥ तस्यैवं यजमानस्य पावकादतुलप्रभं ॥ प्रादुर्भूतं महद्भूतं महावीर्यं महाबलं ॥
कृष्णाजिनधरं कृष्णं रक्ताक्षं दुंदुभिस्वनं ॥ हरिस्निग्धेक्षणं रम्यं श्मश्रुप्रवरमूर्धजं ॥१०॥ शुभलक्षणसंपन्नं दि
व्याभरणभूषितं ॥ मेरुशृंगसमुत्सेधं दृप्तशार्दूलविक्रमं ॥ दिवाकरनिभाकारं दीप्तवह्निसमप्रभं ॥ तप्तजांबून
दमयीं राजतांनियतच्छदां ॥ दिव्यपायससंपूर्णां पात्रीं पत्नीमिव प्रियां ॥ प्रगृह्य विमलां दोर्भ्यां मयोमायामिवासुरीं
अब्रवीत्प्रसृतं वाक्यं इदं द्विजवरं तदा ॥ प्राजापत्यं नरं विद्धि मामिहाभ्यागतं स्वयं ॥ ततोऽब्रवीद्द्विजश्रेष्ठः प्राजाप
त्यं नरोत्तमं ॥ प्रयच्छ पात्रीं राज्ञे त्वं स्वयमेव समुद्यतां ॥ ऋषिपुत्रवचः श्रुत्वा प्राजापत्यो नरोत्तमः ॥ ददौ नृप
तये पात्रीं स्वयमेव समाहितः ॥ ततस्तं स नरं राजा प्रत्युवाच कृतांजलिः ॥ भगवन् स्वागतं तेस्तु किमहं करवाणि ते ॥
ततोऽन्यपवरं वाक्यं प्राजापत्यो नरोत्तमः ॥ राजन्नर्चयता देवान् सद्यः प्राप्तं फलं त्वया ॥ इदं तु नरशार्दूल पायसं देव
निर्मितं ॥ प्रजाकरं गृहाण त्वं धन्यमारोग्यवर्धनं ॥ भार्याणामनुरूपाणामश्नानीध्वमयच्छ वै ॥ तासु हि प्राप्स्यसे पु
त्रांस्त्वं यदर्थं यजसे नृप ॥२०॥ बाढमित्येव नृपतिः सुहृष्टः प्रतिपूज्य च ॥ अब्रवीत्तं महद्भूतं श्रेष्ठमात्मेहितेन च
ततः स भगवांस्तस्मै पात्रीपात्रं वराय वै ॥ नृपाय दत्वा तत्रैव क्षिप्रमंतरधीयत ॥ अदृश्यत क्षणाद्भूतं दीप्तवस्त्र

जगामह॥ गते तस्मिन्महाभूते विस्मयन्नपसत्तमः॥ जगाम स महातेजा राजा दशरथस्तदा॥ स्वयोन वज्रापितनतः संभूतो भूत
सत्तमः॥ नविज्ञातगतिस्तस्य येन मार्गेण संप्लुतः॥ ततो दशरथः प्राप्य पायसं देवनिर्मितं॥ बभूव परमप्रीतः प्राप्य वित्तमिवाधनः॥ सो
ऽन्तःपुरं प्रविश्यैव कौसल्यामिदमब्रवीत्॥ अर्हाण्यर्धं मितो देवी पुत्रीयं हितमात्मनः॥ अर्धादर्धं ददौ चापि कैकेय्यै स नराधि
पः॥ चतुर्भागं द्विधा कृत्वा सुमित्रायै ददौ तदा॥ प्रददौ चावशिष्टं च पायसं देवनिर्मितं॥ अनुचिन्त्य सुमित्रायै पुनरेव
पः॥ चतुर्भागं द्विधा कृत्वा सुमित्रायै ददौ तदा॥ प्रददौ चावशिष्टं च पायसं देवनिर्मितं॥ कृत्वा पुत्रीयमित्येव प्रहृष्टमनसोऽभवन्॥ अंतर्वत्न्यश्च ताः स
नराधिपः॥ ततः प्राप्य तु तत्सर्वं पृथक्पायसमुत्तमं॥ कृत्वा पुत्रीयमित्येव प्रहृष्टमनसोऽभवन्॥ ततः प्रादात्स विपुलं धनं बहुवि
धाः सर्वाश्च सुसमाहिताः॥२८॥ राजा संलक्ष्य धीरो हि प्रहसन्मुदितोऽभवत्॥ ततः प्रादात्स विपुलं धनं बहुवि
धं तदा॥ ऋष्यशृंगाय मेधावी राजा देवसमद्युतिः॥ प्रतिगृह्य च तत्सर्वं धनं द्विजवरस्तदा॥ श्वश्रूश्च प्रद
दौ गत्वा सर्वाभ्यः प्रीतिपूर्वकं॥ राज्ञस्ततोऽभ्यनुज्ञातः सर्वानेव प्रचक्रमे॥ प्रीतियुक्ते नमसा तेन राजा दशरथस्त
दा॥ स्वं स्वं राष्ट्रं यथाकामं गच्छंतु वसुधाधिपाः॥ प्रीतो ह मत्प्रभद्रं वः स्वस्ति प्राप्नुत मा चिरं॥ सर्वे सर्वतः प
श्यं तु कार्यं विषयरक्षणं॥ अष्टौ हि विषयाद्राजाम नकल्मैः प्रदृश्यते॥ तस्मात्स्वविषये रक्षा कर्तव्या भूतिमि
च्छता॥ यज्ञैर्नावाप्यते स्वर्गो रक्षणात्प्राप्यते यथा॥ यथा हि पुरुषः कुर्याच्छरीरे यत्नमुत्तमं॥ बुध्या च चेतमानस्तु
तथा राज्ये नराधिपः॥ अनागतविधानं च कर्तव्यं विषये नृपैः॥ आगमश्चापि कर्तव्यस्तदा दोषो न जायते॥ एवं सं
दिष्य राज्ञः स श्रुत्वा ते च नराधिपाः॥ अन्योन्यं संविदं कृत्वा प्रयाताः सर्वतो दिशं॥ समाप्तदीक्षानियमः

पत्नीगणसमन्वितः॥४०॥ संप्रहृष्टमना भूत्वा राजा दशरथस्तदा॥ गतेषु पार्थिवेंद्रेषु सभृत्यबलवाहनः॥ प्रविवे
श पुरीं श्रीमान्पुरस्कृत्य द्विजोत्तमान्॥४१॥ ॥ इत्यार्षे रामायणे बालकांडे यज्ञोत्सत्तिर्नाम सर्गः॥१४॥ ॥ ॥७॥
॥ ततः कालस्य महतो ऋष्यशृंगः सुपूजितः॥ शांतया प्रययौ सार्धं ब्राह्मणैश्च कृतात्मभिः॥ अन्वीयमानो राज्ञा वै
मानुयात्रेण धीमता॥ वसिष्ठेन च वीरेण तथा पौरजनेन च॥ यानेन महता शांता कंबलावनतेन च॥ गोभिः श्वे
तैः सुयुक्तेन प्रेष्यवर्गान्वितेन च॥ सर्वद्रव्यैः सुबहुमणिरत्नमजाविकैः॥ विविधैश्चाप्यलंकारैर्भूषिताश्रीरिवा
परा॥ मुदा च परयोपेता प्रययौ वरवर्णिनी॥ भर्तारमनु संरक्ता पौलोमीव पुरंदरं॥ उषित्वा सुखवासं च सर्वका
मैः सुपूजिता॥ लालिता ज्ञातिभिश्चापि तथा स्त्रीभिश्च सर्वशः॥ आनिता वनवासं च भर्तानु च सुशोभना॥ त
स्मिन्नमन्यते साधु तथा सुमुखिता सती॥ सा ततः पुरोन्नपश्चापि सोऽन्वगच्छन्महाव्रतः॥ ऋषिपुत्रं महाभागं शांतां चैवा
भिवाद्य द्विजौ सुतौ॥ ऋषिपुत्रस्य वचनात्ततो वासः प्रकल्पितः॥ सुखवासः सुगच्छेति सर्वकामैः सुपूजिताः॥ ततोऽभिवाद्य
द्विजौ सुतौ॥ ऋषिपुत्रस्य वचनात्ततो वासः प्रकल्पितः॥ विज्ञापयामास तदा निवर्तेतु भवानिति॥१०॥ ऋषिपुत्रवचः श्रुत्वा राजासौ तत्पुर
राजानं ऋषिपुत्रः प्रतापवान्॥ विज्ञापयामास तदा निवर्तेतु भवानिति॥ कौसल्यां च सुमित्रां च कैकेयीं च मनस्विनीं॥ सर्वाः सुहृष्टाः कु
सदा॥ उच्चैः प्रमुदितस्तत्र वचनं चेदमब्रवीत्॥ कौसल्यां च सुमित्रां च कैकेयीं च मनस्विनीं॥ सर्वाः सुहृष्टाः कु
रुत शांता दर्शनदुर्लभां॥ ततआलिंग्य सर्वास्ताः शांतां बाष्पविक्लेक्षणाः॥ ऊचुः स्वस्त्ययनं तस्य सभार्यस्य द्विज

वाल्मी·रामा·बा०
॥२४॥

स्वाहा॥ वायुश्चाग्निश्च सोमश्च पृथिवी सविता दिशः॥ वने रक्षंतु सततं त्वां भर्त्तृव्रतचारिणीं॥ श्वशुरः पूजनीयस्ते सहि
मान्यो विशेषतः॥ पूजाभिरनुकूलाभिरभिशुश्रूषणादिभिः॥ भर्त्ता च पूजनीयस्ते सर्वावस्थास्वनिंदिते॥ प्रिय
वादेन रहसि स्त्रीणां भर्त्ता हि दैवतं॥ प्रेषयिष्यामि राजानं कुशलार्थं तवान्वये॥ आश्वास्य स्त्रियं स प्रीति सोत्सु
का भूत्कदाचन॥ एवं शांतां समाश्वास्य मूर्ध्नि चाघ्राय चासकृत्॥ निववर्त ततः सर्वाः स्त्रियो राज्ञा प्रचोदिताः॥ प्रद
क्षिणं द्विजश्रेष्ठं कृत्वा राजा सवीर्यवान्॥ याति दिशासे निकान्काश्चित् ऋष्यशृंगाय धीमते॥ अभिवाद्य स राजा
नमुवाच द्विजसत्तमः॥ स्वस्ति तेस्तु महाराज धर्मेणाराधय प्रजाः॥२०॥ व्यवहारेषु ते धर्मः कर्त्तव्यो द्विजनि
त्यशः॥ धर्मं श्रयेथाः सर्वेषु कालेषु पुरुषर्षभ॥ एवमुक्त्वा तु राजा तं ययावृषिसुतस्तथा॥ तं यांतमनुवव्राज स्थि
तो निश्चलचक्षुषा॥ अदृश्योभूद्यदा विप्रस्तदा राजा न्यवर्त्तत॥ मनस्तस्मिन्समाधाय स्नेहभावसमन्वितं॥ प्रवि
ष्टश्च पुरीं राजा सभृत्यबलवाहनः॥ न्यवसत्तत्र मुदितः पुत्रजन्मप्रतीक्षकः॥ ऋष्यशृंगस्तु तेजस्वी प्रययौ क्रम
शस्तदा॥ लोमपादस्य नगरीं चंपां चंपकमालिनीं॥ श्रुत्वैव लोमपादोपि तमायांतं मुनिं तदा॥ स ब्राह्मणश्च
सहामात्यः प्रत्युद्गम्य तमब्रवीत्॥ स्वागतं ते द्विजश्रेष्ठ दिष्ट्यासि कुशली प्रभो॥ इहागतो महाभाग सभार्यश्च
सपरिच्छदः॥ पिता ते कुशली ब्रह्मन् प्राणिनो निलयाश्रमे॥ कुशलार्थं न व विभो सभार्यस्य विशेषतः॥ स्वले

श्री
॥२४॥

कृतं च नगरे कारयामास बुद्धिमान्॥ पूजार्थमृष्यशृंगस्य राजा हृष्टेन चेतसा॥ ऋष्यशृंगः प्रहृष्टस्तु सह राज्ञा पु
रोत्तमं॥ पुरोहितं पुरस्कृत्य पूजितः प्रविवेश ह॥३०॥ एवं संन्यवसत्तत्र द्विजपुत्रः प्रतापवान्॥ राज्ञा सांतःपुरेणैव पूज्य
मानो यथाक्रमं॥३१॥ ॥इत्यार्षे रामायणे बालकांडे ऋष्यशृंगगमनं नाम सर्गः॥१५॥ ॥६१॥ ॥ऋष्यशृंगे तु सं
प्राप्ते राजा ब्राह्मणमब्रवीत्॥ ऋषेर्गच्छ समीपं त्वं निवेदय यतव्रतं॥ आगतं परमोदारमृष्यशृंगं दुरासदं॥ ऋषये सुव्र
तायत्वं काश्यपस्यात्मसंभवे॥ अभिवाद्यैव शिरसा महत्कृते द्विजसत्तमं॥ प्रसाद्यश्च सुतार्थं मे सर्वावस्थो महामनाः॥
श्रुत्वैव राज्ञो वचनं तदा स द्विजसत्तमः॥ जगाम तत्र यत्रासौ वर्त्तते काश्यपात्मजः॥ प्रसाद्य च द्विजश्रेष्ठं शिरसाभिप्र
णम्य च॥ अब्रवीत्प्रस्तुतं वाक्यं राज्ञा यदभिनोदितं॥ पुत्रस्ते समनुप्राप्तो यज्ञे कृत्वा महात्मनः॥ पूर्वमेव च तत्सर्वं श्रु
त्वासौ बंधकं कृतं॥ यत्तत्कर्म च वैरास्तः कृतं दशरथस्य च॥ आयानि ग्रस्तु संबंधी राजा देवसमो हि सः॥ ततो महर्षिर्निर्वाची
रस्तस्य राज्ञो महात्मनः॥ श्रुत्वा तु वचनं तस्य द्विजस्य हि महायशाः॥ गमने मतिमाधत्त पुत्रस्यानयने तदा॥ स हि शिष्यै
र्वृतस्तत्र प्रयातो द्विजसत्तमः॥ लोमपादस्य नगरीं चंपां पुत्रदिदृक्षया॥ संपूज्यमानो धर्मात्मा ग्रामे घोषेश्च सर्वशः॥१०॥
पाद्यमर्घ्यमुपादाय नरास्तं समुपागमन्॥ किंकराः समुपातिष्ठन् रात्रिंदिनमतंद्रिताः॥ ऊचुः प्रणम्य शिरसा मुने
किं करवामहे॥ तानब्रवीत्स विप्रेंद्रः सर्वानेव समागतान्॥ किमर्थं क्रियते पूजां श्रोतुमिच्छामि तत्त्वतः॥ ततस्तु ऊचुर्महा
त्मानं संबंधी ते नराधिपः॥ तस्यार्थं क्रियते ब्रह्मन् त्वेतु नेमानसो ज्वरः॥ श्रुत्वा तु तेषां वचनं मनःप्रह्लादनं शुभं॥

प्रसादमकरोद्राज्ञः सहामात्यपुरस्सह। विभांडकवचः श्रुत्वा किं करोद्दृष्टमानसाः ॥ त्वरिताजग्मुरास्या नृराज्ञः प्रियहितेर
ताः॥ तच्छ्रुत्वा वचनं तेषां मुनिः प्रीतिविवर्धनं॥ मंत्रिमुख्यैः प्रसन्नात्मा प्रहृष्टः स्यन्नराधिपः॥ दृष्ट्वा तु मुनिशार्दूलं प्रणम्य च पुनःपुनः॥
अब्रवीत्स्वद्दृढं वाक्यं हर्षसंफुल्ललोचनः॥ अद्य मे सफलं जन्म दर्शनात्तव सुव्रत॥ तथेति च स राजानमुवाच द्विजस
त्तमः॥ मा ते भयं भूद्राजेंद्र प्रसन्नोस्मि तवानघ॥ ततः प्रसन्नो नृपतिः पुरस्कृत्य द्विजर्षभं॥ प्रविश्य नगरं श्रीमानन्वि
तं सर्व मंगलैः॥२०॥ स्वलंकृतं गृहं चैव वसावेशाय दारिद्रम॥ पुरोहितेन सहितः प्रयत्नाद्यार्थ्य समाहितः॥ अभिवाद्य
मुनिं चैव न्यायतः प्रत्यपूज्यच॥ तस्थुः प्रांजलयः सर्वे समासाद्य द्विजोत्तमं॥ ततः शांतां पुरस्कृत्य तास्त्रियः सम
लंकृतां॥ न्यवेदयंत विप्रायस्तुष्येयं तव मानद॥ प्रतिगृह्य तु तां शांतां समालिंग्य च धर्मवित्॥ अं
केनिवेश्य च तदा विस्मयं परमं गतः॥ प्रायश्चित्तं च कृतवान्पुत्रस्य द्विजसत्तमः॥ महर्षिः पूज्यमानश्च सपु
त्रश्चावनं ययौ॥२५॥ ॥ इत्यार्षे रामायणे वाल्मीकीये ऋष्यशृंगोपाख्यानं नाम सर्गः॥१६॥ ॥छ॥ ॥
॥स च चारोत्तमं धर्मं रंजयन्सुनयैः प्रजाः॥ इक्ष्वाकुवंशजः श्रीमान्दीप्तया धायिताश्रिया॥ यशसा रंजयल्लोकां
कान्कृतात्मा सर्व धर्मवित्॥ धर्ममेव च सत्यं च संपश्यन्जीवितं फलं॥ तिस्रो महिष्यो राज्ञो वै बभूवुस्तस्य धीमतः॥ ॥२५॥
गुणवत्यो तुरूपाश्च चारुप्रोष्ठपदोपमाः॥ सदृशी तत्र कौसल्या कैकेयी चाभवच्छुभा॥ सुमित्रा वाम

रूपश्च कश्यकरणी सुता॥ ततोस्य जज्ञिरे पुत्राश्चत्वारोमितविक्रमाः॥ रामलक्ष्मणशत्रुघ्ना भरताश्च महाबलाः॥ तेषां ज्येष्ठं
महाबाहुं वीरमप्रतिमौजसं॥ कौसल्याजनयामास विष्णुतुल्यपराक्रमं॥ कौसल्याशुशुभे तेन पुत्रेणामिततेजसा॥
अदितिर्देवराजेन यथा बल्लनिघातिना॥ सुहिर्देवैः सगंधर्वैर्याचितश्च महात्मभिः॥ पुत्रत्वं गच्छ विष्णो वै कृत्वात्मा
नं चतुर्विधं॥ रावणस्येह रौद्रस्य वधार्थं तु दुरात्मनः॥ विष्णुर्हि स महाभागः सुराणां शत्रुसूदनः॥ स हि वीर्यो
पपन्नश्च शीलवान्गुणवानपि॥ बभूव मानवे लोके गुणैर्दशरथाधिकः॥१०॥ अथ लक्ष्मणशत्रुघ्नौ जनि
तौ तौ सुमित्रया॥ उत्तमौ दृढभक्तौ तौ रामस्यानवमौ गुणैः॥ तावथास्त्रां च तुर्भागौ विष्णोः संपीडितावुभौ॥
चतुर्भागस्य तस्यार्धं एकैकस्या दृशौ ददातु॥ भरतो नाम कैकेय्यां जज्ञे सत्यपराक्रमः॥ साक्षाद्विष्णोश्चतुर्भागः
सर्वैः समुदितो गुणैः॥ तेदीप्तयशसः सर्वे महेष्वासा महर्षभाः॥ अपूरयन्वैते सर्वे पितुर्धर्मविशारदाः॥ स
चतुर्भिर्महाभागैः पुत्रैर्दशरथो वृतः॥ बभूव परमप्रीतो देवैरिव पितामहः॥ तेषां केतुरिव श्रेष्ठो रामो
रतिकरः पितुः॥ बभूव भूयो भूतानां स्वयंभूरिव धर्मतः॥ ते यदा ज्ञानसंपन्नाः सर्वे ज्ञादीर्घदर्शिनः॥
सर्वशास्त्रार्थविदुषो ह्रीमतः सत्यवादिनः॥ आसन्वेदविदः शूराः सर्वे शास्त्रार्थकोविदः॥ कृतविद्याः स

मर्थाश्च सर्वैः समुदितागुणैः॥ अथ राजा यथाकालं राजवर्यः कृताः शुभाः॥ सर्वेषामभवज्ज्यायस्तुल्य लक्षणव
र्चसः॥ जनकः श्वशुरो राजा रामस्य भरतस्य च॥ कुशध्वजसुताभ्यां च स्कभित्रानंदनोपतौ॥२०॥ तेषामतिशयो
लोके रामः सत्यपराक्रमः॥ स्वयंभूरिव भूतानां बभूव गुणवत्तरः॥ तस्य भार्या विशेषेण मैथिली जनकात्मजा
देवताभिः समा रूपे सीता श्रीरिव रूपिणी॥ प्रिया तु सीता रामस्य दाराः पितृकृता इति॥ गुणै रूप गुणैश्चा
पि पुनः प्रियतराभवत्॥ भर्त्ता तु तस्या द्विगुणं हृदये परिवर्त्तते॥ अनाख्यातमपि व्यक्तं माचष्टे हृदयं प्रियं॥
बाल्यात्प्रभृति च स्निग्धो लक्ष्मणो लक्ष्मिवर्धनः॥ सर्वाभिरामं रूपेण भ्राता भ्रातरमग्रजं॥ स च प्रियतर
स्तस्य प्राणेभ्यो परिसूदनः॥ लक्ष्मणो लक्षणोपेतो रामस्य रिपुयातिनः॥ मिष्टमन्नमुपासीत मश्नाति न
हि तं विना॥ प्रीतिर्न तस्य जायेत प्रीतिकाले पुतं विना॥ यदा हयमुपारूढो मृगयां याति राघवः॥ तदैनं पृष्ठ
तोन्वेति सधनुः परिपालयन्॥ भरतस्यापि शत्रुघ्नो राघवस्येव लक्ष्मणः॥ प्राणैर्बहुमतो नित्यं तस्या
पि स तथाभवत्॥ स तु केकयराजेन स्नेहात्प्रेषितेहयैः॥ अहोपनीतो धर्मात्मा नीतः स्वनगरं प्रति॥३०॥
कृतदाराः कृतास्त्राश्च सधनाः ससुहृज्जनाः॥ शुश्रूषमाणा पितरं वर्त्तते सनरोत्तमाः॥ रामश्च सीतया सा ॥२६॥
र्धं विजहार बहूनृतून्॥ मनस्वी तद्गतस्तस्या नित्यं हृदये स्थितः॥ तया स राजर्षिवराभिकामया

समेयिवानुत्तमराजकन्यया॥ अतीव रामः शुशुभे भिरामया विभुः श्रिया शक्र इवामराधिपः॥२३॥ ॥इत्यार्षे रा
मायणे बालकांडे पूर्वजन्मकथनं नाम सर्गः॥७॥ ॥छ॥ ॥पुत्रत्वं तु गते विष्णौ राज्ञस्तस्य महात्मनः॥
उवाच देवताः सर्वाः स्वयंभूर्भगवानिदं॥ सत्यसंधस्य वीरस्य सर्वेषां नो हितैषिणः॥ विष्णोः सहायान्सृजत बलिनः का
मरूपिणः॥ मायाविनश्च वीरांश्च वायुवेगसमाञ्जये॥ सूक्ष्मबुद्धिसमायुक्तान् विष्णोस्तुल्यपराक्रमान्॥ असंहा
र्यानुपायज्ञान् दिव्यसंहननान्वितान्॥ सर्वास्त्रगुणसंपन्नान् अमृतप्राश्यकोपनान्॥ अप्सरःसु च मुख्यासु गंध
र्वाणां तनूषु च॥ ऋषिपन्नगकन्यासु विद्याधरसुतासु च॥ किंनरीणां च देहेषु वानरीणां तथैव च॥ सृजध्वं ह
रिरूपेण हरितुल्यपराक्रमान्॥ ते तथोक्ता भगवता तत्प्रतिश्रुत्य शासनं॥ जनयन् देवगंधर्वाः पुत्रान्वानररूपि
णः॥ ऋषयश्च महात्मानः सिद्धाश्च सह किंनरैः॥ चारणाश्चासृजन्घोरान्वानरान्वनचारिणः॥ ते सृष्टाः ब
हुसाहस्राः दशग्रीववधोद्यताः॥ अप्रमेयबलाः शूराः वानराः कामरूपिणः॥ ते गजाचलसंकाशा वीर्यवंतो
महाबलाः॥ ऋक्षवानरगोपुच्छाः क्षिप्रमेवाभिजज्ञिरे॥१०॥ यस्य देवस्य यद्रूपं वेषस्तेजश्च तद्विधं॥ जज्ञेस
सदृशास्ते नरास्तस्य सुतस्तदा॥ गोलांगूलेषु चोत्पन्नाः केचित्सम्मितविक्रमाः॥ ऋक्षेषु च तथा घोरा वान
राः किंनरीषु च॥ शिला प्रहरणाः सर्वे सर्वे पादपयोधिनः॥ नखदंष्ट्रायुधाः सर्वे सर्वे वै कामरूपिणः॥ उत्साट्ये

युध्वगिरीन्भिंद्युःक्षोभान्तथाद्रुमान् ॥ क्षोभयेयुश्चवेगेनसमुद्रंसरितांपतिं ॥ दारयेयुःक्षितिंपादैराप्लवेयुर्नभस्तलं ॥
धुनुयुश्चवनानिद्रुमान्सजलानपिनोयदान् ॥ गृह्णीयुरपिनागेंद्रान्मत्तान्संजनितश्रमान् ॥ नर्दतोपितथायोन्निपा
तयेयुर्विहंगमान् ॥ ईदृशानांप्रसूतानांहरीणांकामरूपिणां ॥ शतंशतसहस्राणियूथपानांमहात्मनां ॥ ईदृशांकीर्ति
जन्मफुल्लकिंशुकरोचिषां ॥ तेप्रधानेषुयूथेषुहरीणांहरियूथपाः ॥ बभूवुर्यूथपश्रेष्ठास्तेचाप्यजनयन्सुतान् ॥
अन्येऋक्षरयोःपुत्राउपतस्थुःसहस्रशः ॥ अन्येनानाविधानृक्षान्काननानिनिषेविरे ॥ सूर्यपुत्रंचसुग्रीवंशक्र
पुत्रंचवालिनं ॥ भ्रातरावुपतस्थुश्चतेपिसर्वेहरीश्वराः ॥ तथादशग्रीववधेस्यमीभुवानिःशास्यसर्वंविहितंशतक्र
तुः ॥ मनुष्यलोकेप्रभुरंजसाययौदिदृक्षुरिक्ष्वाकुसुतंसुरेश्वरः ॥२७॥ ॥ इत्यार्षेरामायणेबालकांडेवा
नरोत्पत्तिर्नामसर्गः ॥१८॥ ॥ ॥छ॥ ॥ निर्वृत्तेतुक्रतौतस्मिन्हयमेधेमहात्मनः ॥ प्रतिगृह्यसुराभागंप्रति
जग्मुर्यथागतं ॥ प्रविवेशपुरींराजासभृत्यबलवाहनः ॥ तस्यपुत्रामहाभागाश्चत्वारोजज्ञिरेपृथक् ॥ गुणवंतो
नुरूपाश्चलोकपालोपमागुणैः ॥ कौसल्याजनयद्रामंराजर्षिवरलक्षणं ॥ साक्षाद्विष्णोस्तदर्धंहिपुत्रमिक्ष्वा
कुनंदनं ॥ अथलक्ष्मणशत्रुघ्नौजनितौतौसुमित्रया ॥ कैकयीजनयामासभरतंधर्मवत्सलं ॥ अथराजा
दशरथस्तेषांदारक्रियांप्रति ॥ चिंतयामासधर्मात्मासोपाध्यायःसबांधवः ॥ तस्यचिंतयतःकार्यमृषिमध्ये

महात्मनः ॥ एतस्मिन्नेवकालेतुविश्वामित्रइतिश्रुतः ॥ महर्षिरभ्ययाद्द्रष्टुमयोध्यायांनराधिपं ॥ तस्ययज्ञोथरक्षोभि
स्तदाविलुलुपेकिल ॥ मायावीर्यबलोन्मत्तैर्धर्मकामस्यधीमतः ॥ रक्षार्थंतस्ययज्ञस्यद्रष्टुमैच्छत्सपार्थिवं ॥ नहिशक्नोत्य
विघ्नेनससमाप्तुंमहाक्रतुं ॥ ततस्तेषांविनाशायउद्यतस्तपसोनिधिः ॥ विश्वामित्रोमहातेजाअयोध्यामभ्यगात्पुरीं ॥१०॥
सराज्ञोदर्शनाकांक्षीद्वाराध्यक्षमुवाचह ॥ शीघ्रमाख्यातमांप्राप्तंकौशिकंगाधिनःसुतं ॥ तस्यतद्वचनंश्रुत्वाराजवे
श्मप्रदुद्रुवुः ॥ संभ्रांतमनसःसर्वेतेनवाक्येननोदिताः ॥ तेगत्वाराजभवनंविश्वामित्रमृषिंततः ॥ प्राप्तमावेदया
मासुर्नृपतेर्धर्मदर्शिनः ॥ तेषांदशरथःश्रुत्वासोपाध्यायःसबांधवः ॥ प्रत्युज्जगामनृपतिर्ब्रह्माणमिववासवः ॥
सदृष्ट्वाज्वलितंलक्ष्म्याभीतस्तमृषिमागतं ॥ प्रणम्यप्रांजलिर्भूत्वाचक्रेचाभिप्रदक्षिणं ॥ सराजापूजितस्ते
नप्रत्युद्गम्यस्वयंतदा ॥ राज्ञश्चप्रतिगृह्यार्थंशास्त्रदृष्टेनकर्मणा ॥ कुशलंनामयंप्रीतःपप्रच्छवसुधाधिपं ॥ वसि
ष्ठेनसहागम्यप्रहसन्मुनिपुंगवः ॥ यथार्थंचार्चयंश्चैनंपप्रच्छानामयंततः ॥ ततोयथार्थमर्च्यैनंपूजयित्वास
मेयच ॥ सर्वैःप्रहृष्टमनसोराज्ञस्तस्यनिवेशनं ॥ विविशुःसहितास्तास्तानिषेदुश्चयथार्हतः ॥ उपविष्टायतेन
स्मैविश्वामित्रायधीमते ॥ वसिष्ठसहितोराजास्वयमेवमहायशाः ॥ पाद्यमर्घ्यंतथागांचविधिवत्सन्न्यवेदयत् ॥
अर्चयित्वाततोराजाविश्वामित्रमभाषत ॥ प्रांजलिःप्रयतोवाक्यमिदंप्रीतमनास्तदा ॥ यथामृतस्यसंप्राप्तिर्य

थावर्षमवर्षके ॥ यथ्वासदृशनारीभ्यः पुत्रजन्माप्रजस्यह ॥ यथेप्सितस्य संप्राप्तिरिष्टस्यागमनं यथा ॥ प्रनष्टस्य यथा
लाभे भवेद्धर्ममहोदयः ॥ हर्षनिर्हो नरश्रेष्ठस्तथाभ्यागमनाभव ॥ स्वप्नेय यथार्थलाभस्यान्म तस्य पुनरागमः ॥ ब्रह्मलो
कनिवासश्च कस्य चित्प्रीतिमावहेत् ॥ मुने तवागमस्तद्वत्सत्यमेव ब्रवीम्यहं ॥ यथाभिलषितं कार्यं किं ते कुर्मोभिकां
क्षितं ॥ पात्रभूतोसि मे विप्र चिरस्याभ्यागतोतिथिः ॥ त्वं हि राजर्षिकुलजस्तपोभिर्नियमैस्तथा ॥ ब्रह्मर्षित्व
मनुप्राप्तस्तस्मात्पूज्यतमोसि मे ॥ साक्षादिव ब्रह्मणो मे तवाभ्यागमनात्कृतः ॥ पूतोस्म्यनुगृहीतश्च तवाभ्या
गमनान्मुने ॥ अद्यमे सफलं जन्म जीवितं च सुजीवितं ॥ गंगाजलाभिषेकेण यथाप्रीतिर्भवेन्मम ॥ तथा तवागमे
पि प्रपरमप्रीतिमानहं ॥ ३० ॥ तदद्भुतमिदं ब्रह्मन् पवित्रं परमं मम ॥ शुभक्षेत्रगतश्चाहं तव संदर्शनेन वै ॥ स्वामि
हाभ्यागतं दृष्ट्वा प्रतिपूज्य प्रणम्य च ॥ यत्कार्यं येन चार्थेन प्राप्तोसि मुनिपुंगव ॥ कृतमित्येव तद्विद्धि मान्यो
सि हि भृशं मम ॥ स्वकार्ये हि विमृश्य त्वं कर्तुमर्हसि कौशिक ॥ भगवन्नास्य देयं मे तव प्रति हि विद्यते ॥ इति राम ॥२८॥
हृदयमनोनुगं तदा वेनरपतिनाभिहितं वचो निशम्य ॥ प्रथितगुणयशास्ततो महर्षिर्मुदितमना निजगा
द तं नरेंद्र ॥ ३५ ॥ ॥ इत्यार्षे रामायणे बालकांडे विश्वामित्रागमनो नाम सर्गः ॥१८॥ ॥ ॥छ॥
॥ तच्छ्रुत्वा नरसिंहस्य वाक्यमद्भुतविस्तरं ॥ हृष्टरोमा महातेजा विश्वामित्रोभ्यभाषत ॥ सदृशं राज

शार्दूल तवैतद्भुवि नान्यतः ॥ महावंशप्रसूतस्य वसिष्ठवशवर्तिनः ॥ यत्तु मे हृद्गतं कार्यं वाक्यं तस्य विनिश्चयं ॥ कुरु त्वं
नरशार्दूल धर्मस्समनुपालय ॥ अहं हि यज्ञमातिष्ठन् सिध्यर्थं पुरुषर्षभ ॥ तस्य विघ्नकरौ द्वौ मे राक्षसौ कामरूपि
णौ ॥ मारीचश्च सुबाहुश्च तस्मिंस्तौ राक्षसाधमौ ॥ तावभ्यकिरतं वेदिं मांसेन रुधिरेण च ॥ अवधूते तथाभूते त
स्मिन्नियमविस्तरे ॥ कृतश्रमो निरुत्साहस्तस्माद्देशादपाक्रमन् ॥ न च मे क्रोधमुत्स्रष्टुं बुद्धिर्भवति पार्थिव ॥
तथाभूतं हि तत्कर्म न कोपस्तस्य विद्यते ॥ ईदृशी यज्ञदीक्षा सा मम तस्मिन्महाक्रतौ ॥ त्वत्प्रसादादविघ्नेन
प्राप्स्येयं क्रियाफलं ॥ त्रातुमर्हसि मां राजन् शरणागतमागतं ॥ स्वपुत्रं राजशार्दूल रामं सत्यपराक्रमं ॥ का
कपक्षधरं वीरं ज्येष्ठं त्वं दातुमर्हसि ॥ शक्तो ह्येष मया गुप्तो दिव्येन स्वेन तेजसा ॥ ४० ॥ राक्षसा ये पिक
र्तारस्तेषामपि विनिग्रहे ॥ श्रेयस्यास्य प्रवक्ष्यामि बहुरूपमसंशयः ॥ त्रयाणामपि लोकानां येनाजेयो भ
विष्यति ॥ न च ते राममासाद्य स्थातुं शक्ताः कथंचन ॥ तेषां च रामान्नान्यो वै योद्धुमुत्सहते पुमान् ॥ वीर्यो
त्सिक्ता हि ते पापाः कालकूटसमाणे ॥ रामस्य राजशार्दूल न सहिष्यंति सायकान् ॥ न च पुत्रकृतं स्नेहं
कर्तुमर्हसि पार्थिव ॥ अहं ते प्रतिजानामि हतौ तौ राक्षसौ रणे ॥ अहं वेद्मि महात्मानं रामं राजीवलोचनं ॥ व
सिष्ठश्च महातेजा ये चान्ये तपसि स्थिताः ॥ यदि ते धर्मलाभं च यशश्च मनसि स्थितं ॥ अभिप्रेतं महाबाहुमा

वाल्मी॰रामा॰बाल॰ ॥२९॥

सजं दातुमर्हसि ॥ दशरात्रेण यज्ञस्य विघ्ना रामेण राक्षसाः ॥ हतव्या राजशार्दूलं मम यज्ञस्य वैरिणः ॥ यद्यभ्यनुज्ञां
काकुत्स्थे ददंति तव मंत्रिणः ॥ वसिष्ठप्रमुखाः सर्वे ततो रामं विसर्जय ॥ नात्येति कालः कालज्ञ यथायमेव कुरु राघव ॥ तथा
कुरुष्व भद्रं ते मा च शोके मनः कृथाः ॥ इत्येवमुक्त्वा धर्मात्मा धर्मार्थसहितं वचः ॥ २० ॥ विरराम महातेजा विश्वामित्रो महामु
निः ॥ इत्येवमुक्त्वा विरते मुनींद्रे जगाद भूयो रघुवंशकेतुः ॥ वक्षस्थले दंतमयूखजालैर्हारावलीं रम्यमिव प्रकुर्वन् ॥
॥२२॥ ॥ इत्यार्षे रामायणे बालकांडे विश्वामित्रवाक्यं नाम सर्गः ॥ २० ॥ ॥ ॥७॥ ॥ तच्छ्रुत्वा
राजशार्दूलो विश्वामित्रस्य भाषितं ॥ मुहूर्तमासीन्निश्चेष्टः सदीनमिदमब्रवीत् ॥ ऊनषोडशवर्षोयं रामो
राजीवलोचनः ॥ न युद्धयोग्यतामस्य पश्यामि सह राक्षसैः ॥ इयमक्षौहिणी पूर्णा यस्याः पतिरहं प्रभो ॥ तयापरि
वृतो युद्धं दास्यामि पिशिताशिनां ॥ इमे हि शूरा विक्रांताः भृत्याः शस्त्रविशारदाः ॥ अहं चैव धनुःपाणिर्गोप्तास
मरमूर्धनि ॥ यावत्प्राणा धरिष्यंति युध्येतो मे निशाचरैः ॥ बालो ह्ययं मनकिंपुन जानाति बलाबलं ॥ न चास्त्रपर
मयुक्तो न च बुद्धिविशारदः ॥ न चापि रक्षसां योग्यः कूटयुद्धा हि राक्षसाः ॥ विप्रयुक्तो हि रामेण मुहूर्तमपि
नोत्सहे ॥ जीवितुं नरशार्दूल न रामं नेतुमर्हसि ॥ नववर्षसहस्राणि मम जातस्य कौशिक ॥ दुःखेनोत्पादिताश्चे ॥२९॥
मे न रामं नेतुमर्हसि ॥ चतुर्णामात्मजानां हि प्रीतिरत्र यथा मम ॥ ज्येष्ठं धर्मप्रधानं हि न रामं नेतुमर्हसि ॥ यदि

वा राघवं ब्रह्मन् नेतुमिच्छसि सुव्रत ॥ चतुरंगबलोपेतं मया सार्धं च मुनय ॥ १० ॥ किंवीर्या राक्षसास्ते हि कस्य पुत्राः कथं च न
कथंप्रमाणाः के चैते राक्षसा मुनिपुंगव ॥ कथं च प्रतिकर्तव्यं तेषां रामेण राक्षसां ॥ मामकैर्वा बलैर्ब्रह्मन् मया वा कूटयोधि
नां ॥ सर्वं मे शंस भगवन् यथा तेषां महारणे ॥ स्थातव्यं दुष्टभावानां वीर्योत्सिक्ता हि राक्षसाः ॥ श्रूयतां हि महावीर्यो रा
वणो नाम राक्षसः ॥ साक्षाद्वैश्रवणभ्राता पुत्रो विश्रवसो मुनेः ॥ नरवव्वसो यज्ञविघ्नं तवाचरति दुर्मतिः ॥ नराकास्त
स्य संग्रामे वयं स्थातुं दुरात्मनः ॥ तस्मात्प्रसादं धर्मज्ञ कुरु त्वं मम पुत्रके ॥ मम चैवेमंदभाग्यस्य भवान् हि मम दैवतं ॥
देवदानवगंधर्वा यक्षाः पतगपन्नगाः ॥ न शक्ता रावणं सोढुं किं पुनर्मानुषा युधि ॥ महावीर्यवतां वीर्यमाददाति
सुवारितं ॥ तेन साधं न शक्तास्म संयुगे तस्य वा बलैः ॥ अथवा लवणं ब्रह्मन् यज्ञघ्नं मधुनः सुतं ॥ कथय स्वा
मर प्रख्ये नैव मोक्ष्यामि पुत्रकं ॥ सुंदोपसुंदयोश्चैव पुत्रौ वैवस्वतोपमौ ॥ यज्ञविघ्नकरौ ब्रूहि न ते दास्यामि पु
त्रकं ॥ मारीचश्च सुबाहुश्च विघ्नं वै कुरुतः सह ॥ तथापि न च मोक्ष्यामि पुत्रं रामं प्रसीद मे ॥ एतद्वचनमोवाचो
यो भाष्मिस सुतो मुनेः ॥ अन्यथा न तु पश्यामि भगवन् जयमात्मनः ॥ २२ ॥ ॥ इत्यार्षे रामायणे बालकांडे
दशरथवाक्यं नाम सर्गः ॥ २१ ॥ ॥ ६ ॥ ॥ तच्छ्रुत्वा वचनं तस्य स्नेहपर्याकुलाक्षरं ॥ समन्युः कौशिको
वाक्यं प्रत्युवाच महीपतिं ॥ करिष्यामि प्रतिज्ञाय प्रतिज्ञां हातुमिच्छसि ॥ राघवानामयुक्तोयं कुलस्यास्य

वाल्मी॰रामा॰बा॰

॥३०॥

विपर्ययः॥यदि त्वं रक्ष्यसे राजन्न गमिष्यामि यथागतं॥हीनप्रतिज्ञः काकुस्थ सुखी भव सबांधवः॥तस्य रोषप
रीतस्य विश्वामित्रस्य धीमतः॥चचाल वसुधा कृत्स्ना सुरांश्च भयमाविशत्॥क्रोधाभिभूतं विज्ञाय जगामच
महान्नृषिः॥धृतिमान्सुव्रतो धीमान्वसिष्ठो नृपमब्रवीत्॥इक्ष्वाकूणां कुले जातः साक्षाद्धर्म इवापरः॥धृति
मान्सत्यवान्वीरो न धर्मं हातुमर्हसि॥त्रिषु लोकेषु विख्यातो धर्मात्मेति यशोधन॥तेन नैतद्धि कृपया बुध्याष्ट
ष्ठतः कर्तुमर्हसि॥स्रष्टा धर्मस्य च स्वार्थं तपसो रक्षणाय च॥क्षत्रियाः क्षत्रियश्रेष्ठ तथा भवितुमर्हसि॥नान्यो
धर्मः क्षत्रियाणां रक्षणात्तात उच्यते॥स्वधर्मं प्रतिपद्यस्व न धर्मं हातुमर्हसि॥करिष्यामीति संश्रुत्य यत्तन्न
राजन्न कुर्वतः॥इष्टापूर्तं हरेद्धर्मं तस्माद्रामं विसर्जय॥१०॥कृतास्त्रमकृतास्त्रं वा नैनं धक्ष्यंति राक्षसा॥
गुप्तं कुशिकपुत्रेण ज्वलनेनामृतं यथा॥एष विग्रहवान्धर्म एष वीर्यवतां वरः॥एष बुध्याधिको लोके तपस
श्चपरायणी॥एषोस्त्रान्विविधान्वेत्ति त्रैलोक्ये सचराचरे॥नैनं दन्यः पुमान्वेत्ति न च वेत्स्यति कश्चन॥नदे
वानर्षयः कश्चिन्नासुरा न च राक्षसाः॥गंधर्वयक्षप्रवरा न किन्नरमहोरगाः॥अस्त्रैर्ह्यस्त्र कृशाश्वेन
परैः परमदुर्जयं॥कौशिकाय पुरा दत्तं यदा राजन्समन्वशात्॥नहि पुत्राः कृशाश्वस्य प्रजापतिसुतो ॥३०॥
पमाः॥नैकरूपा महात्मानो दीप्तिमंतो जयावहाः॥जया च सुप्रभा चैव दाक्षायिण्यौ सुमध्यमे॥तयोस्तु

यान्यपत्यानि शस्त्राणि परमदुर्जयं॥पंचाशतं सुतान्जज्ञे जया लब्धवरा पुरा॥वधाय परसैन्यानामक्षयान्कामरूपिणः॥सुप्र
भाजनयामास पुत्रान्पंचशतं वरान्॥सर्वास्त्राल्लब्धवान्वीर दुर्धर्षान्सुबलीयसः॥शस्त्राणामप्रधृष्याणामजेया
नां महौजसः॥तानि सर्वाण्यथैवेद विश्वामित्रो महायशाः॥१२॥सप्रयोगरहस्यानि ससंहाराणि राघव॥तानिदास्यत्यये
षेण रामायैष महामुनिः॥येरस्त्रैस्तानि रक्षांसि रामो जेष्यत्यसंशयं॥अनुग्रहार्थं रामस्य प्रजानां हितकारणात्॥
एवं वीर्यो महातेजा विश्वामित्रो महातपाः॥न रामगमने बुद्धिं विचाराद्रोक्रमर्हसि॥२३॥ ॥इत्यार्षे रामायणे वा
लकांडे वसिष्ठवाक्यं नाम सर्गः॥२२॥ ॥ ॥६०॥ ॥तथा वसिष्ठे ब्रुवति राजा दशरथः स्वतः॥प्रहृष्टव
दनो रामम जुहाव सलक्ष्मणं॥कृतस्वस्त्ययनो मात्रा पित्रा दशरथेन च॥पुरोधसा तथा वाभिर्मंगलैरभि
नंदितो॥ततो मूर्ध्नि समाघ्राय राजा दशरथः सुतो॥ददौ कुशिकपुत्राय विश्वामित्राय धीमते॥तं दृष्ट्वा देवगंधर्वाः
पुष्पवृष्टिं सुराददुः॥विश्वामित्रगतं दृष्ट्वा रामं राजीवलोचनं॥सपुष्पवृष्टिपटहध्वनिहासीद्दिहांबरे॥शंखदुंदु
भिघोषश्च प्रावाद्यत महास्वनः॥विश्वामित्रप्रयात्यग्रे ततो रामो महायशाः॥काकपक्षधरो धन्वी तं च सौमित्रि
रन्वगात्॥कलापिनौ धनुष्पाणी शोभमानौ महापथे॥विश्वामित्रं समन्वेतौ त्रिशीर्षाविव पन्नगौ॥बद्धगोधां
गुलित्राणौ खड्गवंतौ महाद्युती॥स्थाणुं देवमिवाचिंत्य कुमाराविव पावकी॥अध्यर्धयोजनं गत्वा सरय्वा द—

वाल्मी·रामा·बा·
॥३१॥

क्षिणेनटे ॥ रामेतिमधुरांवाणीं विश्वामित्रोभ्यभाषत ॥ गृहाण वत्ससलिलं मा भूत्कालस्य पर्यय ॥ मंत्रग्रामंगृ
हाणेदं बलामतिबलान्तथा ॥१०॥ नश्रमोनजरा तुभ्यंन रूपस्योपसंक्षयः ॥ नवीस्कृप्तंप्रमत्तंवाधर्षयिष्यंतिनै
र्ऋताः ॥ नवीह्वोःसदृशोवीर्येपृथिव्यांतवकश्चन ॥ भविष्यतिमहाबाहो त्रिषुलोकेषु कश्चन ॥ नसौभाग्ये नदाक्षि
ण्येनचबुध्दिविनिश्चये ॥ नोत्तरेप्रतिपत्तव्ये समस्तेभविता नते ॥ एतद्विद्याद्वयंनामगृहीत्वानास्तितेसमः ॥
बलामतिबलांचैव सर्वज्ञानस्यमातरौ ॥ क्षुत्पिपासेनते राममासाद्दूर्ध्वंभविष्यतः ॥ बलामतिबलांचैवप
ठितेरघुनंदन ॥ गृहाण सर्वलोकस्य मातरौ बहुमानद ॥ विद्याद्वयमधीयानःकीर्तिमिवातुलांभुवि ॥
पितामहसुतेह्येतेविद्येतेजोमयेशुभे ॥ दद्द्त्रोनवकाकुत्स्थप्रदातुंत्वंहि धार्मिकः ॥ कामंवहुगुण्याः सर्वे तद्दै
वितेनसंशयः ॥ तपोभिःसंसृतेह्येते बहुरूपेभविष्यतः ॥ ततोरामोजलिंकृत्वाप्रहृष्टवदनःशुचिः ॥ प्रति
जग्राहतेविद्येमहर्षेर्भावितात्मनः ॥ गुरुकार्याणिसर्वाणि प्रयुज्यकुशिकात्मजे ॥ ऊषुस्तांरजनींतत्रस
रय्वांससुखंत्रयः ॥२०॥ कथयंतःकथाश्चित्राः प्रीयमाणाःपरस्परं ॥ ॥इत्यार्षेरामायणेबालकांडेविद्या
प्रदानोनामसर्गः ॥२३॥ ॥छ॥ ॥ प्रभातायांतुशर्वर्यां विश्वामित्रो महानृषिः ॥ अभ्यभाषतकाकु
त्स्थौशयानौपर्णसंस्तरे ॥ कौसल्या सुप्रजाराम पूर्वासंध्या प्रवर्त्तते ॥ उत्तिष्ठत्वं महाभागकुरुष्वाह्निकाः

क्रियाः ॥ तस्यर्षेःपरमोदारं वचःश्रुत्वा मनोनुगं ॥ स्नात्वाकृताह्निकौवीरौ जेपतुःपरमंजपं ॥ कृताह्निकौमहावीर्यौ
विश्वामित्रमृषिंततः ॥ अभिवाद्यततोवीरौ गमनायोपतस्थतुः ॥ तौप्रयातौमहात्मानौदिव्यांत्रिपथगांनदीं ॥ ददृशातेत
सरय्वोसंयुगेपुण्यसंमते ॥ तत्राश्रमपदंपुण्यंमुनीनांभावितात्मनां ॥ बहुवर्षसहस्राणितत्र तेतेपिरे तपः ॥ तंदृष्ट्वा
परमप्रीतौराघवौपुण्यमाश्रमं ॥ ऊचतुर्मधुरंवाक्यंविश्वामित्रंमहामुनिं ॥ कस्यायमाश्रमःपुण्यःकोन्वस्मिन्वसते
पुमान् ॥ भगवन्श्रोतुमिच्छावःपरंकौतूहलंहिनौ ॥ तयोस्तद्वचनंश्रुत्वाविश्वामित्रोमहामुनिः ॥ अब्रवीच्छ्रूयतांवत्सौ
यस्यायंपूर्वमाश्रमः ॥ मूर्त्तिमान्नामकंदर्पः काममृस्कृच्यतेबुधैः ॥ सचकारतपोविघ्नंस्थाणुंयोगमनुत्तमं ॥
॥१०॥ कृतोद्वाहंतुदेवेशं अतिष्ठन्समरुद्गणं ॥ योगकामश्च दुर्मेधाः सोपध्यातोमहात्मनां ॥ अपध्यातस्यरुद्रे
णचक्षुषारघुनंदन ॥ व्यशीर्यंतस्यसहसानतोगात्राणिधीमतः ॥ तस्यांगान्यपतद्रामहिमवत्समीपतः ॥ अ
शरीरःकृतःकामः क्रोधात्तेनमहात्मना ॥ अनंगइतिविख्यातस्तदाप्रभृतिराघव ॥ सचांगविषयःश्रीमान्यत्रांगं
समुमोचह ॥ तस्यायमाश्रमःपुण्यस्तस्येमेमुनयःपुरा ॥ शिष्याधर्मपराधीरास्तेषांपापंहिविद्यते ॥ इहाद्यरज
नीराम वसामःशुभदर्शनं ॥ पुण्ययोःसरितोर्मध्येतरिष्यामःप्रपद्यवे ॥ इहकामाश्रमेरामवसामसुसु
खंनिशां ॥ तेषांसंवदतामेवंतयोर्दीर्घेणचक्षुषा ॥ विज्ञायपरमप्रीतामुनयोहृष्टमागताः ॥ अर्घ्यं

स्छ

शर्व
॥३१॥

वाल्मी०रामा०बाल० ॥३२॥

पाद्यमथातिथ्यं निवेद्य कुशिकात्मजे ॥ रामलक्ष्मणयोः पश्चादकुर्वन्नतिथिक्रियां ॥ सत्कारं परमं प्राप्य कथा-
भिरभिरंस्य च ॥ न्यवसंस्ते सुखं तत्र कामाश्रमपदे तदा ॥२०॥ ॥ इत्यार्षे रामायणे बालकांडे कामाश्रम-
निवासो नाम सर्गः ॥२४॥ ॥छ॥ ॥ ततः प्रभाते विमले कृताह्निकमरिंदमौ ॥ विश्वामित्रं पुरस्कृ-
त्य नद्यास्तीरमुपागतौ ॥ सर्व एव महात्मानो ऋषयः सूर्यवर्चसः ॥ उपतस्थुः शुभां नावं विश्वामित्रमथाब्रुव-
न् ॥ आरोहतु भवान्नावं राजपुत्रपुरस्सरः ॥ अरिष्टं गच्छ पंथानं मा भूत्कालस्य पर्ययः ॥ विश्वामित्रस्तथेत्युक्त्वा
तानृषीन्प्रत्यपूजयत् ॥ ततारसरितं पुण्यां सरयूं सागरंगमां ॥ राघवस्तु सरिन्मध्ये पप्रच्छ मुनिपुंगवं ॥ वारी-
णो भिद्यमानानां किमेष विमलो ध्वनिः ॥ राघवस्य वचः श्रुत्वा जातकौतूहलं वचः ॥ कथयामास धर्मात्मा त-
स्य शब्दस्य निश्चयं ॥ कैलासपर्वते राम मनसा निर्मितं सरः ॥ ब्रह्मणा रघुशार्दूल मानसं नाम तेन तत् ॥
तस्मात्सुसूता सरयूः सायोध्यामभ्यभावयत् ॥ सरःप्रसूता सरयूः पुण्या ब्रह्मसरश्च्युता ॥ शब्दोयं विपुल-
स्तस्य जाह्नवीमभिवर्त्तते ॥ वारिसंघर्षजो राम प्रणामं प्रयतः कुरु ॥ उभाभ्यां तावुभौ कृत्वा प्रणाममतिधा-
र्मिकौ ॥ तीरं दक्षिणमासाद्य जग्मतुर्लघुविक्रमौ ॥१०॥ अथानुपदमेवास्य वनं घोरमरिंदमौ ॥ तद्वनं घोरसं-
नादं दृष्ट्वा नरवरात्मजौ ॥ ततः समंतात्तद्वीक्ष्य आपृच्छेतां मुनिं तु तौ ॥ अहो वनमिदं घोरं भिल्लीकगण

रा० ॥३२॥

नादितं ॥ भैरवैश्च समाकीर्णं शकुनैर्दारुणैस्वरैः ॥ तयोस्तद्वचनं श्रुत्वा विश्वामित्रो महानृषिः ॥ श्रूयतां व=
त्स काकुत्स्थ यस्येदं भैरवं वनं ॥ शिवौ जनपदौ श्रीमान्पूर्वमास्तां नरोत्तम ॥ मालवश्च करूषश्च देवनिर्माणनिर्मितौ ॥
पुरा वृत्रवधे राम मलेन समभिप्लुतः ॥ क्षुधया च सहस्राक्षो ब्रह्महत्या यदाविशत् ॥ तमिंद्रं स्नपयः सर्वे सर्वे दे-
वगणैः सह ॥१५॥ स्नपयांचक्रुरमलैः सलिलैर्मलशुद्धये ॥ तस्यांतर्भूमौ मलं देवा दत्वा कारूषमेव च ॥ शरी-
रजं महेंद्रस्य ततो हर्षं प्रपेदिरे ॥ निर्मलो करूषश्चात्र शुचिरिंद्रो यदाभवत् ॥ ददौ देशस्य सुप्रीतस्तत्तावर-
मरिंदम ॥ इमौ जनपदौ ख्यातिं कृत्स्ने लोके गमिष्यतः ॥ मालवश्च करूषश्च ममांगसहचारिणौ ॥ साधु साधि-
ति तं देवाः शशंसुः पाकशासनं ॥२०॥ देशपूजां च तां दृष्ट्वा कृतां शक्रेण धीमता ॥ एवं जनपदौ श्रीनातुद्यका-
लमरिंदम ॥ मालवश्च करूषश्च संपन्नौ धनधान्यतः ॥ कस्यचित्त्वथ कालस्य यक्षी दुष्टप्रचारिणी ॥ बल-
नागसहस्रस्य धारयन्त्यनिशं युधि ॥ ताटका नाम भद्रं ते भार्या सुंदस्य धीमतः ॥ मारीचो राक्षसः पुत्रो यस्याः
शक्रपराक्रमः ॥ उत्सादयति सा नित्यमेतौ जनपदौ विभो ॥ मालवांश्च करूषांश्च यक्षी विहितभक्षिणी ॥ ए-
षा पंथा समासाद्य निवसत्यर्धयोजने ॥ अत एव न गंतव्यं ताटकाभवनं यतः ॥ एतत्ते सर्वमाख्यातं यथेदं दा-
रुणं वनं ॥ यक्षाद्युत्सादितं सर्वमुत्थाघुत्साधितेनया ॥२७॥ ॥ इत्यार्षे रामायणे बालकांडे ताटकावनदर्शनो नाम सर्गः ॥
॥ ॥ ॥ ॥२५॥ ॥छ॥ ॥

अथ तस्याप्रमेयस्य मुनेर्वचनमद्भुतं॥ श्रुत्वा पुरुषशार्दूलः प्रत्युवाच शुभां गिरं॥ अल्पवीर्या यदा यक्षाः श्रूयंते मु
निपुंगव॥ कथं नागसहस्रस्य धारयत्यबला बलं॥ तच्छ्रुत्वा वचनं तस्य विश्वामित्रोभ्यभाषत॥ वरदानान्महाबाहो यथैषा काम
रूपिणी॥ पूर्वमासीन्महान्यक्षः सुकेतुर्नाम धार्मिकः॥ अनपत्यः शुभाचारः स च तेपे महातपाः॥ पितामहस्तु सुप्रीतस्तस्य यक्ष
पतेस्तदा॥ कन्यारत्नं ददौ राम ताटकां नाम नामतः॥ ददौ नागसहस्रस्य बलं तस्याः पितामहः॥ न त्वेव पुत्रं यक्षाय ददौ ब्रह्मा म
हायशाः॥ वर्धमानां हितां राम रूपयौवनशालिनीं॥ कुंभपुत्राय सुंदाय ददौ भार्यां यशस्विनीं॥ कस्यचित्त्वथ कालस्य यक्षी पुत्रं व्य
जायत॥ मारीचं नाम दुर्धर्षं शापाद्राक्षसतां गतं॥ सोपत्य नियतं मोहादगस्त्यमृषिसत्तमं॥ ताटका सह पुत्रेण प्रधर्षयितुमिच्छ
ती॥ राक्षसत्वं भजस्वेति मारीचं व्याजहार सः॥ अगस्त्यः परमक्रुद्धस्ताटकां चापि शप्तवान्॥ पुरुषादी महायक्षी विकृता विकृ
तानना॥ २०॥ सुभरूपं परित्यज्य दारुणं रूपमास्थिता॥ सावेपापकृतामर्षा ताटका नाम राक्षसी॥ देशमुत्सादयत्येतदगस्त्या
चरितं सदा॥ एवं राघव दुर्वृत्तां यक्षीं परमदारुणां॥ गोब्राह्मणहितार्थाय जहि दुष्टपराक्रमां॥ नह्येनां शापसंसृष्टां कश्चि
दुत्सहते पुमान्॥ निहंतुं त्रिषु लोकेषु त्वामृते रघुनंदन॥ न च ते स्त्रीवधे त्वेव घृणा कार्या नरोत्तम॥ चातुर्वर्ण्यहितं
तात कर्तव्यं राजसूनुना॥ राज्यभारनियुक्तानामेष धर्मः सनातनः॥ तस्मात्त्वं जहि काकुत्स्थ अधर्मो ह्यस्या न विद्यते॥
श्रूयते हि पुरा राम विरोचनसुता भवत्॥ राक्षसी दीर्घजिह्वेति विख्याता कामरूपिणी॥ विकृतं सुमहत्सत्वा वक्त्रं को ॥ २२॥

लानलोपमं॥ जिघांसुः पृथिवीं सर्वां क्रमेण विनिपातिता॥ विष्णुना च पुरा राम शक्रतुल्यपराक्रमा॥ अनिच्छं लो
कमिच्छंती काव्यमाता निषूदिता॥ एवमन्ये दृपि पुरा राजभिर्धर्मचारिभिः॥ अधर्मनिरता नार्यो हताः पुरुषसत्तम॥
तस्मादस्या वधाद्राम प्राणिनः संतु निर्भयाः॥ २८॥ मुनेर्वचनमक्लीबं श्रुत्वा नृपवरात्मजः॥ राघवः प्रांजलिर्वाक्यं
प्रत्युवाच दृढव्रतं॥ पितुर्वचननिर्देशान्मया यन्मुनिसत्तम॥ वचनं कौशिकस्येति कर्तव्यमविशंकया॥ अनुशिष्टोस्म्ययोध्यायां
गुरुमध्ये महात्मना॥ पित्रा दशरथेनेवमनुरुध्येव तद्वचः॥ सोहं पितुर्वचः कुर्वन्शासनं ते महामुने॥ निःसंदेहं करिष्या
मि ताटकावधमुत्तमं॥ गोब्राह्मणहिते चैव यत्रास्यं च सुखावहं॥ तव चेवाप्रमेयस्य वचनं कृतमस्तु मे॥ एवमुक्त्वा ध
नुर्मध्ये बध्वा मुष्टिमरिंदमः॥ ज्याघोषमकरोत्तीव्रं दिशः शब्देन पूरयन्॥ तेन शब्देन वित्रस्तास्ताटकावनवासिनः॥
ताटका च सुसंरब्धा तेन शब्देन कोपिता॥ तं शब्दं भीमनिर्ह्रादं यक्षा कोपेन मूर्छिता॥ श्रुत्वा वाथ द्रुतं वेगाद्यत्र शब्दो
भिनिःसृतः॥ तां दृष्ट्वा राघवः क्रुद्धो विकृतां विकृताननां॥ प्रमाणेनातिवृद्धां च लक्ष्मणं वाक्यमब्रवीत्॥ यक्ष्या लक्ष्म
ण पश्यैतद्रूपं परमदारुणं॥ भिद्यते दर्शनेनास्या हृदयं कातरस्य च॥ ३०॥ एतां पश्य दुराधर्षां निर्भिन्नहृदयां
क्षितौ॥ शयानां शयने धन्ये धूतपापां मया हतां॥ एवं तस्य ब्रुवाणस्य ताटका क्रोधमूर्छिता॥ उद्यम्य बाहू गर्जंती
काकुत्स्थं समभिद्रुता॥ आपतंतीं तदा रामो विचकामाशनीमिव॥ शरेणोरसि विव्याध सा पपात ममार च॥ तां

अथतस्याप्रमेयस्यमुनेर्वचनमद्भुतं॥ श्रुत्वापुरुषशार्दूलःप्रत्युवाचशुभांगिरं॥ अल्पवीर्यायदायक्षाःश्रूयंतेमु
निपुंगव॥ कथंनागसहस्रस्यधारयत्यबलाबलं॥ तच्छ्रुत्वावचनंतस्यविश्वामित्रोऽभ्यभाषत॥ वरदानान्महाबाहोयत्येषाकाम
रूपिणी॥ पूर्वमासीन्महान्यक्षःसुकेतुर्नाधार्मिकः॥ अनपत्यःशुभाचारःसचतेपेमहातपाः॥ पितामहस्तुसुप्रीतस्तस्ययक्ष
पतेस्तदा॥ कन्यारत्नंददौरामताटकानामनामतः॥ ददौनागसहस्रस्यबलंतस्याःपितामहः॥ नत्वेवपुत्रंयक्षायददौब्रह्मामहा
यशाः॥ वर्धमानांहितांरामरूपयौवनशालिनीं॥ कुंभपुत्रायसुंदायददौभार्यांयशस्विनीं॥ कस्यचित्त्वथकालस्ययक्षीपुत्रंव्य
जायत॥ मारीचंनामदुर्धर्षंशापाद्राक्षसतांगतं॥ सोपेत्यनियतंमोहादगस्त्यमृषिसत्तमं॥ ताटकासहपुत्रेणप्रधर्षयितुमिच्छ
ति॥ राक्षसत्वंभजस्वेतिमारीचंव्याजहारसः॥ अगस्त्यःपरमःक्रुद्धस्ताटकांचापिशप्तवान्॥ पुरुषादीमहायक्षीविकृताविकृ
ताननां॥ २०॥ शुभंरूपंपरित्यज्यदारुणंरूपमास्थिता॥ सावेपापकृतामर्षाताटकानामराक्षसी॥ देशमुत्सादयत्येतदगस्त्या
चरितंसदा॥ एवंराघवदुर्वृत्तांयक्षींपरमदारुणां॥ गोब्राह्मणहितार्थायजहिदुष्टपराक्रमां॥ नह्येनांशापसंसृष्टांकश्चि
दुत्सहतेपुमान्॥ निहंतुंत्रिषुलोकेषुत्वामृतेरघुनंदन॥ नहितेस्त्रीवधकृतेघृणाकार्यानरोत्तम॥ चातुर्वर्ण्यहितं
तातकर्तव्यंराजसूनुना॥ राज्यभारनियुक्तानामेषधर्मःसनातनः॥ तस्मात्त्वंजहिकाकुत्स्थधर्मोह्यस्यानविद्यते॥
श्रूयतेहिपुरारामविरोचनसुताभवत्॥ राक्षसीदीर्घजिह्वेतिविख्याताकामरूपिणी॥ विद्रुतंसुमहत्सत्वावक्त्रेण ॥ २२॥

तानलोपमं॥ जिघांसुःपृथिवींसर्वांक्रमेणविनिपातिता॥ विष्णुनाचपुरारामशक्रतुल्यपराक्रमा॥ अनिष्टंलो
कमिच्छंतीकाव्यमाताभिषूदिता॥ एवमन्यैरपिपुराराजभिर्धर्मचारिभिः॥ अधर्मनिरतानार्योहताःपुरुषसत्तम॥
तस्मादस्यावधाद्रामप्राणिनःसंतुनिर्भयाः॥ २१॥ मुनेर्वचनमक्लीबंश्रुत्वानृपवरात्मजः॥ राघवःप्रांजलिर्वाक्य
प्रत्युवाचदृढव्रतं॥ पितुर्वचननिर्देशान्मयायमृषिसत्तम॥ वचनंकौशिकस्येतिकर्तव्यमविशंकया॥ अनुशिष्टोस्म्ययोध्यायां
गुरुमध्येमहात्मना॥ पित्रादशरथेनेवमनुरुध्येवतद्वचः॥ सोहंपितुर्वचःकुर्वन्शासनेनतेमहामुने॥ निःसंदेहंकरिष्या
मिताटकावधमुत्तमं॥ गोब्राह्मणहितेचैवयशस्यंचसुखावहं॥ तवचैवाप्रमेयस्यवचनंकृतमस्तुमे॥ एवमुक्त्वाध
नुर्मध्येबध्वामुष्टिमरिंदमः॥ ज्याघोषमकरोत्तीव्रंदिशःशब्देनपूरयन्॥ तेनशब्देनवित्रस्तास्ताटकावनवासिनः॥
ताटकाचसुसंरब्धातेनशब्देनकोपिता॥ तंशब्दमभिनिर्ध्याययक्षीकोपेनमूर्छिता॥ श्रुत्वाचाभ्यद्रवद्वेगाद्यतःशब्दो
विनिःसृतः॥ तांदृष्ट्वाराघवःक्रुद्धांविकृतांविकृताननां॥ प्रमाणेनातिवृद्धांचलक्ष्मणंवाक्यमब्रवीत्॥ पश्यलक्ष्म
णपश्यैतद्रूपंपरमदारुणं॥ भिद्यतेदर्शनेनास्याहृदयंकातरस्यच॥ २०॥ एतांपश्यदुराधर्षांनिर्भिन्नहृदयां
क्षितौ॥ शयानांशयनेधन्येधूतपापांमयाहतां॥ एवंतस्यब्रुवाणस्यताटकाक्रोधमूर्छिता॥ उद्यम्यबाहूगर्जंती
काकुत्स्थंसमभिद्रुता॥ आपतंतींतदारामोविचक्रामाशनीमिव॥ शरेणोरसिविव्याधसापपातममारच॥ तां

हतां भीमसंकाशां दृष्ट्वा सुरपतिस्तदा ॥ साधु साध्विति काकुत्स्थं सुराश्च समपूजयन् ॥ उवाच वासवः प्रीतः सहस्राक्षः
पुरंदरः ॥ सुराश्च सर्वे संप्रीता विश्वामित्रमिदं वचः ॥ मुने कौशिक भद्रं ते सेंद्राः सुरगणास्त्वयो ॥ तोषिताः कर्मणाने
न स्नेहं दर्शय राघवे ॥ प्रजापतेः कृशाश्वस्य पुत्रान् दिव्यपराक्रमान् ॥ तेजोबलयुतान् ब्रह्मन् राघवाय प्रपादय ॥
पात्रभूतो ह्ययं ते षां तवानुगमने कृतः ॥ कर्तव्यं च महत्कार्यं सुराणां राजसूनुना ॥ एवमुक्त्वा सुराः सर्वे जग्मु
र्हृष्टा यथागतं ॥ विश्वामित्रं समाधाय ततः संध्या समवर्तत ॥ ततो मुनिवरः प्रीतस्ताटकावधतोषितः ॥ मूर्ध्नि राममु
पाघ्राय मधुरं वाक्यमब्रवीत् ॥ ३० ॥ इहाद्य रजनीं राम वसामि शुभदर्शन ॥ अयं सिद्धाश्रमो राम मत्प्रसादाद्भ
विष्यति ॥ प्रभाते च गमिष्यामस्तथाश्रमपदं निजं ॥ ३२ ॥ ॥ इत्यार्षे रामायणे बालकांडे ताटकावधो नाम सर्गः ॥
॥ ॥२६॥ ॥६७॥ ॥ प्रभातायां तु शर्वर्यां विश्वामित्रो महामुनिः ॥ प्रहसन्वाक्यतत्वज्ञं उवाच मधुराक्षरं ॥
परितुष्टोस्मि भद्रं ते राजपुत्र महाबल ॥ प्रीत्या परमया युक्तः सर्वास्त्राणि ददामि ते ॥ याभ्यहं वेद काकुत्स्थ
पात्रभूतोसि मे यतः ॥ ब्रह्मास्त्रं परमं राम दिव्यमस्त्रं ददामि ते ॥ सर्वेषामेव लोकानां पीडितानां भयापहं ॥ दंडमस्त्रं ॥२४॥
महच्छ्रेष्ठं ददामि रघुनंदन ॥ सर्वदा राम शत्रूणां येन जेयो भविष्यसि ॥ धर्मचक्रं ततो राम कालचक्रं तथैव च ॥ विष्णु
चक्रं तथात्युग्रं इंद्रचक्रं तथैव च ॥ वज्रमस्त्रं नरश्रेष्ठ शैवं पाशुपतं ततः ॥ गदे द्वे चापि काकुत्स्थ कोमोदकिंशि

वोदके ॥ अस्त्रं ब्रह्मशिरश्चैव ऐषीकमपि राघव ॥ ददामि ते महाबाहो ह्यस्त्रं शंखखरं तथा ॥ शंकरास्त्रं च दीप्तास्यं
ग्रहाणो दंममोघतं ॥ अपि ते नरशार्दूल प्रयच्छामि नृपात्मज ॥ धर्मपाशमहं राम कालपाशं तथैव च ॥ वारुणं पाशार
त्नं च ददाम्येतदनुत्तमं ॥ १० ॥ अशनी द्वे प्रयच्छामि शुष्कार्द्रे रघुनंदन ॥ देवास्त्रमपि नागास्त्रं मस्त्रं नारायणं तथा ॥
आग्नेयमस्त्रं दयितं देवतास्त्रं तथैव च ॥ वायव्यमस्त्रं दयितं ददामि तव राघव ॥ अस्त्रं हयशिरो नाम क्रौंचमस्त्रं
तथैव च ॥ शक्ती द्वे पुरुषव्याघ्र विसृजामि रघूत्तम ॥ कंकालं मुसलं घोरं कपालमथ किंकिणी ॥ धारयत्व हिंवि
रघ्न ददाम्येतानि तेनघ ॥ अस्त्रं विद्याधरं नाम नंदकं नाम चापरं ॥ असिरत्नं महाबाहो ददामि मनुजाधि
प ॥ गांधर्वमस्त्रं दयितं मोहनं नाम नामतः ॥ प्रस्वापनं प्रमथनं वितरामि तवानघ ॥ दर्पणं शोषणं चैव सं
तापनमिति श्रुतं ॥ दमनं चैव दुर्धर्षं कंदर्पदयितानि वै ॥ पैशाचमस्त्रं दयितं मानवं नाम नामतः ॥ ग्रहाणन
रशार्दूल सर्वाण्येतानि राघव ॥ ग्रमनं नरशार्दूल सौमनं च महाबलं ॥ संवर्तं चैव दुर्धर्षं मौशलं च नृपात्मज ॥ सत्य
मस्त्रं महाबाहो मायाधरमथापि वा ॥ मोघं तेजोबलं राम परतेजोपकर्षणं ॥ २० ॥ सोमास्त्रं शिशिरं नाम तथा
त्वाष्ट्रं सुदारुणं ॥ दारुणं च भवस्यापि रौद्रमस्त्रं तथैव च ॥ एतानि राम तेजांसि कामरूपबलानि च ॥ ग्रहाणचा
रूरूपाणि प्रीतात्माहं ददामि ते ॥ अथास्य प्राङ्मुखो भूत्वा शुचिर्मुनिवरस्तदा ॥ ददौ रामाय सुप्रीतो दिव्या

स्त्रग्राममनुत्तमं॥ जपतस्ये स्ते तु मुनेर्विश्वामित्रस्य धीमतः। अभ्युपेयुर्महाभागमस्त्राणि मुनिपुंगव। ऊचुश्च रा
मं सर्वाणि प्रांजलीनि न्यपास्तजं॥ इमानि स्म महोदार किंकराणि हि सुव्रत। प्रतिगृह्य हीषु काकुत्स्थ समालभ्य च पाणिना॥
सर्वाणिमानसानीह भवंतीत्यभ्यभाषत॥ ततः प्रीतमना रामो विश्वामित्रं महामुनिं। अभिवाद्य महातेजा गमना
योपचक्रमे॥२७॥ ॥ इत्यार्षे रामायणे बालकांडे अस्त्रग्रहणो नामस र्गः॥२७॥ ॥ ॥ ॥४०॥ ॥
॥ प्रतिगृह्य ततो स्त्राणि दिव्यानि प्रीतमानसः। गच्छन्नेव ततो रामो विश्वामित्रमुवाच ह॥ गृहीतास्त्रोऽपि भगव
न्दुर्जयस्त्रिदशैरपि। अस्त्राणामथ चैतेषां संहारं वक्तुमर्हसि॥ इत्युक्तवति रामे तु विश्वामित्रो महामुनिः॥
उवाच परमास्त्राणां संहारं च निवर्तनं। दशावस्त्रं जृंभकालोवशीकरणमुत्तमं॥ सत्यवान्सत्यकीर्तिश्च
धृष्टारभसश्चैव च। प्रणिपात रसो नाम अवाङ्मुखपराङ्मुखौ॥ विपाको विश्वकर्मा च गौरो नाम प्रकोनमं॥
दशाक्षो दशावक्त्रश्च दशशीर्षो दशोदरः। पद्मनाभो महानाभो दुंदुनाभः सुनाभकः॥ ज्योतिषकृपनश्चैव नै
कवसुचन्द्रा वुभौ॥ युगंधर स्त्वरी दुर्भ्रनेत्रा प्रमथनस्तथा॥ शुचिर्बाहुर्महाबाहुः सर्वबाहुस्तथैव च॥ चक्र
सौमनसश्चैव विधूमसकरावुभौ। करविंभिः करतीचैव धनधान्यौ च राघव॥ कामरूपीकामरुचिर्मोहआ
वरणस्तथा॥ जृंभकः सर्वनाभश्च संतनावरणौ तथा॥ कृशाश्वतनयाराम भास्कराः कामरूपिणः॥१०॥ प्रति

गृहीष्व भद्रं ते पात्रभूतो सि मे यतः॥ बाढमित्येव काकुत्स्थः सुप्रीतेनांतरात्मना॥ दिव्यभास्वरदेहास्तु दिव्यमूर्ति
सुखावहाः॥ रामं प्रांजलयो भूत्वा प्रब्रुवन्मधुराक्षरं॥ इमे स्म नरशार्दूल ब्रूहि किं करवाम ते॥ गम्यतामिति तान्स
र्वान्यथेष्टं प्राह राघवः॥ मनसा मे यथाकाले सहायार्थं भविष्यथ॥ अथ ते राममामंत्र्य कृत्वा चापि प्रदक्षिणं॥ एव
मस्त्विति काकुत्स्थमुक्त्वा जग्मुर्यथागतं॥ गतासु तासु विद्यासु विश्वामित्रं महामुनिं॥ गच्छन्नेवाथ काकु
त्स्थः श्लक्ष्णं वचनमब्रवीत्॥ किं चेतन्मेघसंकाशं पर्वतस्याविदूरतः॥ कस्येदं सदनं भाति मुने कौतूहलं हि मे॥
दर्शनीयं मनोज्ञं च मम चातिमनोहरं॥ नानाप्रभावैर्नराकुनैः वल्गुवाग्भिरलंकृतं॥ निःसृता स्मो मु
निःश्रेष्ठ कांताराल्लोमहर्षणात्॥ अनेनैवाथ गच्छामो देशोयं सुसुखावहः॥ सर्वं मे शंस भगवान्कस्याश्रमप
दं महत्॥ संप्राप्ताः कुत्र ते यायाः यज्ञघ्ना दुष्टराक्षसाः॥ तत्कोपनिहताः पूर्वं निहता यामयाहिते॥२०॥ ॥ इत्यार्षे
रामायणे बालकांडे विद्यासंहारग्रहणो नामसर्गः॥२८॥ ॥७॥ ॥ अथ तस्याश्रमं पुण्यं तदूनं परि
पृच्छतः॥ आख्यातुं नरशार्दूलं सर्वं निवोपचक्रमे॥ एष पूर्वाश्रमो नाम वामनस्य महात्मनः॥ सिद्धाश्रम इति ख्यातः
सिसोद्यत्रमहायशाः॥ विष्णुर्वामनरूपेण तप्यमानो महत्तपः॥ एतस्मिन्नेव काले तु राजर्षिर्वैरोचनो बलिः॥ का

वाल्मी॰रामा॰बा॰
॥३६॥

र्यामास काकुत्स्थ त्रिषु लोकेषु निर्भयः ॥ बलेस्तु यजमानस्य देवाः साग्निपुरोगमाः ॥ समागम्य स्वयश्चैव विष्णुमूचुरिहाश्रमे ॥
बलिर्वैरोचनिर्विष्णो यजते यज्ञमुत्तमं ॥ अपर्यवसिते तस्मिन्स्वकार्यमुपपाद्यतां ॥ ये चैनमभिवर्तंते याचितार स्ततस्ततः ॥
यद्यच्च तत्र याचंते तेभ्यः सर्वं प्रयच्छति ॥ यत्न सुरहितार्थाय महायोगमुपागतः ॥ वामनत्वं गतो विष्णो कुरु कल्याणमुत्त-
मं ॥ अयं सिद्धाश्रमो नाम प्रसादाद्भविष्यति ॥ सिद्धे कर्मणि देवेश उत्तिष्ठ भगवन्निति ॥ अथ विष्णुर्महायोगी प्रवि-
श्य रघुनंदन ॥ वामनं रूपमास्थाय वैरोचनिमुपागमत् ॥१०॥ त्रीन्क्रमानथ याचित्वा प्रतिगृह्य च वामनः ॥ आक्रम्य
लोकान्लोकात्मा सर्वभूतहिते रतः ॥ तेनैषः पूर्वमाक्रांत आश्रमः श्रमनाशनः ॥ मयापि भक्त्या तस्यैव वामनस्योप-
सेव्यते ॥ अत्र ते राक्षसा राम मम तेविघ्नकारिणः ॥ ते त्वया पुरुषव्याघ्र हंतव्या दुष्टचारिणः ॥ एतमेवाभिगच्छामः
सिद्धाश्रममनुत्तमं ॥ स्वमाश्रमपदं राम यथापेष त्वया मम ॥ तं दृष्ट्वा ऋषयः सर्वे तदाश्रमनिवासिनः ॥ प्रत्युद्गम्य
यथान्यायं विश्वामित्रमपूजयन् ॥ कृत्वा पूजां यथान्यायं विश्वामित्राय धीमते ॥ काकुत्स्थयोरपि तदा पूजां चक्रुर्मह-
र्षयः ॥ मुहूर्तमिव विश्रांतौ राजपुत्रौ महाबलौ ॥ प्रांजलिर्मुनिशार्दूलमुवाच मधुरं वचः ॥ अद्यैव दीक्षां प्रविश भद्रं ते
मुनिपुंगव ॥ सिद्धाश्रमोयं सिद्धः स्यात्सत्यमेवास्तु मे वचः ॥ रामस्य तु वचः श्रुत्वा दीक्षां संहृष्टमानसः ॥ जग्राह स महा-
तेजा विश्वामित्रो महामुनिः ॥ कुमारावपि तां रात्रिमतिवाह्य समाहितौ ॥ प्रभातकाले चोत्थाय विश्वामित्रमतंद्रितौ ॥

राम
॥३६॥

इत्थं विनीय रजनीमथ तौ प्रभाते कौतूहलेन धरिणीरुहपंक्तिमुच्चैः ॥ पुष्पानतां मृगगणैरुषितः प्रकीर्णां यत्रोत्त-
रां ददृशतुः सुहृदौ ककुत्स्थौ ॥२४॥ ॥ इत्यार्षे रामायणे बालकांडे सिद्धाश्रमनिवासो नाम सर्गः ॥२९॥ ॥ ॥३०॥
॥ अथ तौ देशकालज्ञौ राजपुत्रौ महाबलौ ॥ देशे काले च वचितायथा जहतुरिदं वचः ॥ भगवन् श्रोतुमिच्छावः य-
स्मिन्काले निशाचरौ ॥ रक्षणीयाविती ब्रह्मन्नातिवर्तेत तत्क्षणः ॥ ब्रुवतोस्तु तयोरेवं हृष्टयोः परिपृच्छतोः ॥ सर्वे ते
मुनयः प्रीताः प्रशशंसुस्तयोर्वचः ॥ अद्यप्रभृति षड्रात्रं तिष्ठतां वत्स यंत्रितौ ॥ दीक्षागतो हि भगवान् मुनिरेष यथाचलः ॥
तेषां तद्वचनं श्रुत्वा राजपुत्रावतिष्ठतां ॥ अनिद्रौ षडहोरात्रं रक्षमाणौ तपोधनं ॥ अथ काले गते तस्मिन्षष्ठेह-
न्युपकल्पिते ॥ स्थापयांचक्रिरे वेदीं मुनयः संशितव्रताः ॥ प्रजज्वाल ततो वेदी सोपाध्याय समागमा ॥ मंत्रव-
द्यथान्यायं यज्ञः समभिवर्तत ॥ आकाशे च महान्शब्दः प्रादुरासीद्भयंकरः ॥ आचार्य गगनं मेघो यथा प्रावृषि चा-
भवन् ॥ तथा मायां प्रकुर्वाणौ राक्षसावभ्यधावतां ॥ मारीचश्च सुबाहुश्च तयोरनुचरास्तथा ॥ आगम्य भीमनिर्ह्रा-
दाः रुधिरौघानवासृजन् ॥ स तानापततो दृष्ट्वा रामो राजीवलोचनः ॥१०॥ उवाच लक्ष्मणं वाक्यं निर्भयः प्रहस-
न्निव ॥ पश्य लक्ष्मण दुर्वृत्तं राक्षसापसदं मया ॥ मानवेन समाधूतमनिलेन यथा तृणं ॥ समनोः परमोदारम-
स्त्रं परम दुर्जयं ॥ चिक्षेप परमक्रुद्धो मारीचोरसि राघवः ॥ स तेन परमास्त्रेण मानवेन समाहतः ॥ संपूर्णं योजन

शांतक्षिप्तः सागरसंप्लवे ॥ विचेतनं विघूर्णंतं शीतेषुबलताडितं ॥ मारीचं निहतं दृष्ट्वा रामो लक्ष्मणमब्रवीत् ॥ पश्य लक्ष्मण
सीतेषुं मानवं धर्मशोभितं ॥ मोहयित्वा नयद्दूरं न च प्राणैर्व्ययोजयत् ॥ इमांस्तु निहनिष्यामि निर्घृणान् दुष्टचारिणः ॥
राक्षसान्पापकर्मस्थान्यज्ञघ्नान्रुधिराशनान् ॥ सगृहीत्वास्त्रमाग्नेयं चिक्षेप रघुनंदनः ॥ गृहीत्वा वक्षसि स्थाने
सुबाहुं पातयद्भुवि ॥ वायव्येन तु तांश्छेषान्निजघान निशाचरान् ॥ रामं तमथ संहृष्टाः मुनयः प्रत्यपूजयन् ॥ सह
त्वा राक्षसान्घोरान्यज्ञघ्नान्रघुनंदनः ॥ ऋषिभ्यः प्राप्तवान्पूजां यथेंद्रो विजयासुरा ॥ अथ यज्ञे समाप्ते तु वि
श्वामित्रो महामुनिः ॥ २० ॥ निरुपद्रवां दिशो दृष्ट्वा काकुत्स्थमिदमब्रवीत् ॥ कृतार्थोस्मि महाबाहो कृतं गुरु
वचस्त्वया ॥ सिद्धाश्रमनिवासानां कृतं क्षेमं महात्मनां ॥ अथ निहत्य निशाचरमंडलं घननिभैःशुभैरघु
नंदनः ॥ तिमिरजालमतीव दुःसहं दिनकरो विविधूय यथांबरे ॥ २४ ॥ ॥ इत्यार्षे रामायणे बालकांडे
आश्रमवर्णनं नाम सर्गः ॥ ३० ॥ ॥ छ ॥ ॥ अथ तां रजनीं तत्र कृतार्थौ रघुनंदनौ ॥ ऊषतुर्मुदितौ
वीरौ प्रहृष्टेनांतरात्मना ॥ प्रभातायां तु शर्वर्यां कृत्वा शौचमरिंदमौ ॥ अभ्यवादयतां गत्वा विश्वामित्रं महामुनिं ॥
इमौ द्वौ मुनिशार्दूल किंकरौ समुपागतौ ॥ आज्ञापयय यथेष्टं ते शासनं करवाव च ॥ एवं तौ हृष्टवदनौ मुनिं ज्वलन
तेजसं ॥ ऊचतुः परमोदारौ वाक्यं मधुरभाषिणौ ॥ ब्रुवतोस्तु तयोरेवं सर्व एव महर्षयः ॥ विश्वामित्रं पुरस्कृ

राम
॥३७॥

त्य राघवं वाक्यमब्रुवन् ॥ मैथिलस्य नरश्रेष्ठ जनकस्य भविष्यति ॥ यज्ञः परमधर्मिष्ठो यास्यामस्तत्र वै वयं ॥ त्वं चापि नर
शार्दूल सहास्माभिर्गमिष्यसि ॥ रत्नं महाद्भुतं तत्र धनुस्त्वं द्रष्टुमर्हसि ॥ तद्धि पूर्वं नरश्रेष्ठ दत्तं सदसि दैवतैः ॥ अप्र
मेयबलं घोरं मिथोपरमभास्वरं ॥ तत्तु देवा न गंधर्वा नासुरा न च पन्नगाः ॥ अधिज्यं कर्तुमानम्य शक्ताः किमुत मान
वाः ॥ धनुषो बलवीर्यं हि जिज्ञासंति महीक्षितः ॥ नशेकुरारोपयितुं राजपुत्रा महाबलाः ॥ १० ॥ तद्धियज्ञफले तेषां च
मैथिलं धनुरुत्तमं ॥ याचितं नरशार्दूल दुर्लभं सर्वदैवतैः ॥ तद्धनुर्नरशार्दूल मैथिलस्य महात्मनः ॥ मिथोद्रक्ष्य
सि काकुत्स्थ यज्ञं चाद्भुतदर्शनं ॥ एवमुक्त्वा मुनिवराः प्रस्थानं समरोचयन् ॥ महर्षिसंघाः काकुत्स्थमामंत्र्य च न
रदेवताः ॥ स्वस्ति वोस्तु गमिष्यामः सिद्धाः सिद्धाश्रमाद्वयं ॥ उत्तरं जाह्नवीकूले हिमवंतं शिलोच्चयं ॥ प्रदक्षिणीत
तः कृत्वा सिद्धाश्रममनुत्तमं ॥ उत्तरां दिशमास्थाय पंथानमुपचक्रमुः ॥ ते प्रयाता मुनिवराः बहवो रेणुपांडराः ॥
शकटाशतमात्रेण विश्वामित्रपुरोगमाः ॥ मृगपक्षिगणाश्चैव सिद्धाश्रमनिवासिनः ॥ अनुजग्मुर्महाभागं विश्वा
मित्रं महामुनिं ॥ ते गत्वा दूरमध्वानं लंबमाने दिवाकरे ॥ वासं चक्रुर्मुनिवराः शोणकूले समाहिताः ॥ तेस्तं गते दि
नकरे तनोर्चितहुताशनाः ॥ विश्वामित्रं पुरस्कृत्य निषेदुर्धरिणीतले ॥ रामोपि सहसौमित्रिः ऋषींस्ता
न्समभिपूजयन् ॥ अग्रतो निषसादाथ विश्वामित्रस्य धीमतः ॥ २० ॥ अथ रामो महातेजा विश्वामित्रमपृच्छत ॥

पप्रच्छ मुनिशार्दूलं कोन्वयं देशः समन्वितः ॥ भगवन्कोन्वयं देशः समृद्धजनसेवितः ॥ श्रोतुमिच्छामि भद्रं ते वक्तुमर्हसि तत्त्व
तः ॥ नोदितो रामवाक्येन कथयामास विस्तरं ॥ तं देशं निखिलेनैव ऋषिमध्ये तपोधनः ॥२३॥ ॥इत्यार्षे रामा
यणे वालकांडे शोणतीरवर्णनो नामैकत्रिंशत्सर्गः ॥ ॥३१॥ ॥श्रृणु राम कथां दिव्यां देशस्यास्य च स
मुद्भवं ॥ ब्रह्मयोनिर्महानासीत्कुशो नाम महायशाः ॥ स किल्बिषं जनयत्पुत्रांश्चतुरः पुरुषर्षभ ॥ कुशनाभं कु
शांबं च असूर्तरयसं वसुं ॥ महोत्साहान्धार्मिकांस्तान् क्षत्रधर्ममनुव्रतान् ॥ तानुवाच कुशः पुत्रान्धर्मिष्ठान्सत्यपार
गः ॥ क्रियतां पालनं पुत्रा धर्मं प्राप्स्यथ पुष्कलं ॥ कुशस्य वचनं श्रुत्वा चत्वारस्ते मितौजसः ॥ निवेशं चक्रि
रे सर्वे पुराणां कुशसूनवः ॥ कुशांबस्तु महातेजाः कौशांबीमकरोत्पुरीं ॥ कुशनाभस्तु धर्मात्मा पुरं चक्रे महो
दयं ॥ प्राग्ज्योतिषं पुरं चक्रे वसुश्चक्रे गिरिव्रजं ॥ तथास्सूर्तरयो वीरो धर्मारण्यसमीपतः ॥ देशोयं वसुनामा सो
द्भूतोऽमिततेजसः ॥ एषा वसुमती तस्य वसुदस्य महात्मनः ॥ एते शैलवराः पंच प्रकाशन्ते विदूरतः ॥ एषा सा
मागधी रम्या मगधा विश्रुता भुवि ॥ पंचानां शैलमुख्यानां मध्ये चन्द्रमालेव चोभते ॥ एते ते मागधा राम वसुदस्य महा
त्मनः ॥ पूर्वाभिवासिनास्तेन सुक्षेत्राः सस्यशालिनः ॥१०॥ कुशनाभस्तु राजर्षिः कन्याशतमनुत्तमं ॥ सुषुवे देव
रूपिण्यां घृताच्यां रघुनंदन ॥ तास्तु यौवनशालिन्यो रूपेणाप्रतिमा भुवि ॥ उद्यानभूमिमागम्य चिक्रीडु

र्विद्युतो यथा ॥ गायंत्यो वादयंत्यश्च नृत्यंत्यश्च यथासुखं ॥ आह्लादं परमं जग्मुर्वनमाल्यैरलंकृताः ॥ ततस्ता रूपसंपन्ना यौव
नेनाप्यलंकृताः ॥ दृष्ट्वा सर्वत्रगो वायुरिदं वचनमब्रवीत् ॥ भवतीः कामये सर्वा भार्या मे भवतीनि वै ॥ मानुषस्त्यज्यतां स्त
हो दीर्घमायुरवाप्स्यतां ॥ तस्य तद्वचनं श्रुत्वा वायोरमितकर्मणः ॥ अवहस्य ततो वाक्यं कन्याशतमुवाच तं ॥ अंतश्चरसि
भूतानां सर्वेषां त्वं सुरोत्तम ॥ प्रभावं ते विजानीमः किमस्मानवमन्यसे ॥ कुशनाभसुताः सर्वाः समर्थास्त्वं नमारुत ॥ स्था
नाच्यावयितुं देवरक्षामः स्वकुलं वयं ॥ माभूत्सकालं कोविरोस्मि न्यितरंसत्यवादिनं ॥ अवहाय ध्वधर्मेण स्वयंकन्या
वरं व्रजेतुं ॥ जनिता प्रभुरस्माकं दैवतं परमं पिता ॥ यस्मै नो दास्यति पिता स मे भर्ता भविष्यति ॥२०॥ तासां तु वच
नं श्रुत्वा वायुः परमकोपनः ॥ प्रविश्य सर्वगात्राणि बभंज भगवान्प्रभुः ॥ ताः कन्या वायुना भग्ना विविशुर्नगरं पितुः ॥
तास्तथा दुःखिता दृष्ट्वा राजर्षिरिदमब्रवीत् ॥ किमिदं कथ्यतां पुत्र्यः को धर्ममवमन्यते ॥ कुब्जाः केन कृता यू
यं विचेष्टत्यो नभाषथ ॥ श्वसध्वं किमिदं पुत्र्यः कुब्जत्वं कथमागतं ॥ तस्य तद्वचनं श्रुत्वा कुशनाभस्य ताः सु
ताः ॥ अभिवाद्य पितुः पादौ सर्वा वचनमब्रुवन् ॥ वायुः सर्वत्रगः सोस्मान्धर्षयितुं प्रभुः ॥ अशुभं मार्गमा
स्थाय न धर्मं प्रत्यवेक्षत ॥ पितृमत्यो वयं सर्वा न स्वातंत्र्यमुपस्थिताः ॥ इति तेन ब्रुवाणास्म वायुना पहता
भृशं ॥ तासां तु वचनं श्रुत्वा राजा परमधार्मिकः ॥ प्रत्युवाच महातेजाः कन्याशतमिदं वचः ॥ भद्रं कृतं मि

दं पुष्ट्यः कन्यै चमहत्कृतं॥ एकमत्युमुपागम्य कुलं वै रक्षितं मम॥ अलंकारः क्षमापुंच्य स्त्रियो वा पुरुषस्य वा॥
दुष्करं तस्य वः ख्याते त्रिदशेषु विशेषतः॥३०॥ प्राप्तोयं देशकालश्च सुपात्रप्रतिपादने॥ यद्वायुनाच कं
न्यास्तास्तत्र कुब्जीकृताः पुरा॥ कान्यकुब्जमिति ख्यातं ततः प्रभृति तत्पुरं॥ विसृज्य कन्याः काकुत्स्थ राजा
त्रिदशविक्रमः॥ मंत्रज्ञो मंत्रयामास सप्रदानं सह मंत्रिभिः॥ एतस्मिन्नेव काले तु चूडिर्नाम महान्ऋषिः॥ ऊर्ध्वरेताः
शुभाचारो ब्रह्मतेजोत्यलंकृतः॥ तप्यमानं तु तम्ऋषिं गंधर्वी तमुवाच ह॥ सोमपोनाम भद्रं ते उर्म्मायो दुहिता
तथा॥ सातथाप्यनाभूत्वा शुश्रूषणपरायणा॥ उवास काले धर्मिष्ठां तस्यास्तुष्टोभवद्गुरुः॥ स तथा कालयो
गेन प्राब्रवीद्रघुनंदन॥ परितुष्टोस्मि भद्रं ते किं करोमि तव प्रियं॥ परितुष्टं मुनिं ज्ञात्वा गंधर्वी मधुरस्वरा॥
उवाच परमोदारं वाक्यज्ञा वाक्यकोविदं॥ ब्राह्म्या लक्ष्म्या नया ब्रह्मन् पुत्रमिच्छामि धार्मिकं॥ नपतिश्चा
स्मि मे ब्रह्मन्न भार्या चास्मि कस्यचित्॥ स्वयं चवरये हं त्वां मन्त्रोरमपरिग्रहं॥ अनन्यपूर्वी भजमां भज
मानीयनव्रती॥ ब्राह्मण्येन तु संयुक्तं दातुमर्हसि मे सुतं॥४०॥ तस्याः प्रसन्नो ब्रह्मर्षिर्ददौ पुत्रं तथा
विधं॥ ब्रह्मदत्त इति ख्यातं सोभूच्चूडिसुतोन्नप॥ स बुद्धिमकरोद्राजा कुशनाभः सुधार्मिकः॥ ब्रह्मद

त्ताय काकुत्स्थ दातुं कन्याशतं तदा॥ तमाहूय महातेजा ब्रह्मदत्तं महीपतिः॥ ददौ कन्याशतं राजा सुप्रीतेनांतरात्म
ना॥ यथाक्रमं तथा पाणिं जग्राह रघुनंदन॥ ब्रह्मदत्तो महीपालस्तासां देवपतिर्यथा॥ स्पृष्टमात्रे ततः पाणौ वि
ज्वरे विमले शुचिः॥ युक्तं परमया लक्ष्म्या कन्याशतमभूत्तदा॥ स दृष्ट्वा वायुना मुक्ताः कुशनाभः सुतास्तदा॥
बभूव परमप्रीतो हर्षवाष्पाकुलेक्षणः॥ कृतोद्वाहं तु राजा वै ब्रह्मदत्तं महामुनिं॥ सदारं प्रेषयामास सोपाध्या
यगणं तदा॥ सोमपायी तु ताः प्राप्य पुत्रस्य सदृशीः प्रियाः॥ कन्योन्यहीना संपूज्य कुशनाभं तदा ययौ॥४
॥ ॥ इत्यार्षे रामायणे बालकांडे सर्गः॥३२॥ ॥छ॥ ॥ कृतोद्वाहे तदा तस्मिन्ब्रह्मदत्ते
नराधिपः॥ अपुत्रः कुशनाभोथ पुत्रीयामिष्टिमारभत्॥ इष्ट्यां तु वर्तमानायां कुशनाभं तदान्वय॥ उवाच पर
मप्रीतो हव्यवाहो वचस्तदा॥ पुत्रस्ते सदृशः पुत्र सदृशास्ते सुधार्मिकः॥ गाधिं प्राप्स्यसि तेन त्वं कीर्तिं लोके चरा
श्वतीं॥ एवमुक्त्वा कुशो राम कुशनाभं महीपतिं॥ जगामाकाशमास्थाय ब्रह्मलोकं सनातनं॥ कस्यचित्त्वथ
कालस्य कुशनाभस्य धीमतः॥ जज्ञे परमधर्मिष्ठो गाधिर्नाम सुतस्तदा॥ स पिता मम काकुत्स्थ गाधिः परमधा
र्मिकः॥ कुशादेवं प्रसूतास्म कौशिको रघुनंदन॥ पूर्वजा भगिनी चैव मम राघव सुव्रता॥ नाम्ना सत्यवती सा तु ऋची
के प्रतिपादिता॥ भर्तारमनुरुध्यंती सशरीरा दिवं गता॥ कौशिकी परमोदारा सा प्रवृत्ता महानदी॥ स्वर्गात्सुपुण्योद

कारण्याद्धिमवंतमुपाश्रिता ॥ लोकस्य हितकार्यार्थं प्रवृत्ता भगिनी मम ॥ ततोहं हिमवतः पार्श्वे निवसामि ततः
सुखी ॥ भगिन्यास्नेहसंयुक्तः कौशिक्या रघुनंदन ॥१०॥ सेयं सत्यवती पुण्या सत्ये धर्मे च संस्थिता ॥ पति
व्रता महाभागा कौशिकी सरितां वरा ॥ अहं हि नियममास्थाय सिध्यर्थं रघुनंदन ॥ सिद्धाश्रममनुप्राप्तः सिद्धो
स्मि तव तेजसा ॥ एषा राम ममोत्पत्तिः स्वस्य वंशस्य कीर्तिता ॥ देशस्य च महाबाहो यन्मां त्वं परिपृच्छसि ॥
गतोर्धरात्रिः काकुत्स्थ कथाः कथयतो मम ॥ निस्पंदास्तरवः सर्वे निलीना मृगपक्षिणः ॥ नैशेन तमसा व्या
प्ता दिशश्च रघुनंदन ॥ सूक्ष्मेणांजनचूर्णेन नभः कृत्स्नमिवांजितं ॥ ग्रहनक्षत्रताराभिः कांक्षणाभि
रिवावृतं ॥ उदेति चासौ शीतांशुर्लोककांतो निशाकरः ॥ सैषि — ल्हादयते धर्मात्मन् रघुनंदन ॥
निशाचराणि सत्वानि धृष्टं प्रविचरंति च ॥ यक्षरक्षोगणाश्चैव ये चान्ये पिशिताशनाः ॥ निद्रां भज
स्व भद्रं ते विघ्नो वै मा स्म भूत्तु नः ॥ एवमुक्त्वा महातेजा विरराम महानृषिः ॥ साधुसाध्विति ते सर्वे सर्वे
मुनयः प्रत्यपूजयन् ॥ राघवोपि स सौमित्रिः किंचिदागतविस्मयः ॥ प्रशंसन्मुनिशार्दूलं निद्राकरा ॥४०॥
मुपेयिवान् ॥२०॥ ॥ इत्यार्षे रामायणे बालकांडे विश्वामित्रवंशकीर्त्तनं नाम सर्गः ॥३३॥ ॥श्री॥

ऋषीणां तु ततस्तेषां शोणकूले मनोहरे ॥ निशायां सुप्रभातायां विश्वामित्रोभ्यभाषत ॥ सुप्रभाता निशा राम पू
र्वसंध्या प्रवर्त्तते ॥ उत्तिष्ठोत्तिष्ठ भद्रं ते गमनं पुनरोचय ॥ तच्छ्रुत्वा वचनं तस्य कृत्वा पूर्वाह्णिकीं क्रियां ॥ ग
मनं नोदयामास वाक्यं चेदमुवाच ह ॥ अयं शोणः शुचिजलो गाधः पुलिनाचितः ॥ कतमेन पथा ब्रह्मन्संत
रिष्यामः कथं सुखं ॥ सोब्रवीद्राघवं सोत्र तरिष्यामो यथा सुखं ॥ एष पंथा मयोद्दिष्टो येन यांति महर्षयः ॥
ते गत्वा दूरमध्वानं गते चार्धदिवसे तदा ॥ जाह्नवीं सरितां श्रेष्ठां ददृशुः परमर्षयः ॥ तां दृष्ट्वा पुण्यसलिलां
हंससारससेवितां ॥ कथमेनां तरिष्यामो गंतव्यं वा कुतो मुने ॥ इत्युक्तः प्रत्युवाचेदं विश्वामित्रो महामुनिः ॥
रामं कमलपत्राक्षं हर्षयन्निदमब्रवीत् ॥ इतस्त्रियोजनादूर्ध्वं संतरिष्याम जाह्नवीं ॥ अस्मिन्नेव समु
त्तीर्य तीर्थे शोणमिदं तदा ॥ एष पंथाः शिवः क्षेमः स्वादुमूलफलोदकः ॥ अनेन राम यास्यामो यथासुखम
नामयं ॥१०॥ ते तमध्वानमचिरात्सुखेनोत्तीर्य जाह्नवीं ॥ ददृशुर्मुनयः सिद्धाः आश्रमं श्रमनाशनं ॥ ती
ते शुचिजलां दृष्ट्वा गंगां मुनिजनप्रियां ॥ बभूवुर्मुदिताः सर्वे राघवो मुनयस्तदा ॥ तस्यास्तीरे वने चक्रु
र्निवासं मुनयस्तदा ॥ ततः सर्वे यथाकालं संतर्प्य पितृदेवताः ॥ हुत्वा चैवाग्निहोत्राणि प्राश्य चामृतवद्धवि
र्भिविविशुर्जाह्नवीतीरे शुचौ मुदितमानसाः ॥ विश्वामित्रं महात्मानं परिवार्य समंततः ॥ वासं तत्र तदा रामो वि

श्वामित्रमभाषत ॥भगवन्श्रोतुमिछामिगंगांत्रिपथगामिनीं॥ त्रैलोक्यंकथमाक्रम्यगंगानदनदीपतिं॥
नोदितोरामवाक्येनविश्वामित्रोमहामुनिः॥ वृधिंजन्मचगंगायावक्तुंसमुपचक्रमे॥ शैलेंद्रोहिमवान्ना
मसर्वधातूनामाकरोमहान्॥ तस्यकन्याद्वयंरामरूपेणाप्रतिमंभुवि॥ सुमेरोर्दुहितारामतयोर्मातासुम
ध्यमा॥ नाम्नामनोरमारामपत्नीहिमवतःप्रिया॥ तस्यांगंगेयमभवज्ज्येष्ठाहिमवतःसुता॥ उमानाम
द्वितीयाभूत्कन्यातस्यैवराघव॥२०॥ अथज्येष्ठांसुतारामदेवाःसत्रचिकीर्षवः॥ शैलेंद्रंवरयामासुर्गं
गांत्रिपथगामिनीं॥ ददौधर्मेणहिमवांस्तनयांलोकभाविनीं॥ स्वछंत्रिपथगांगंगांत्रैलोक्यहितका
म्यया॥ प्रतिगृह्यसल्लोकार्थंत्रैलोक्यहितकाम्यया॥ गंगामादायतेजग्मुः कृतार्थास्तेतरात्मभिः॥
याचान्याशैलतनयाकन्यासीद्रघुनंदन॥ उग्रंसाव्रतमाधायतपस्तेपेतपोधन॥ उग्रेणतपसायुक्तां
ददौशैलवरःसुतां॥ रुद्रायाप्रतिवीर्यायलोकसंपूजितांमुमां॥ एतेतेशैलराजस्यउभेसुदृयिते
शुभे॥ गंगाचसरितांश्रेष्ठदेवीचोमारघूत्तम॥ एततेसर्वमाख्यातंयथात्रिपथगानदी॥ गांगतार्ग
धर्मरामगंगामिविसतीवर॥ उमाचदेवंभर्त्तारंसंप्राप्ताचसुमध्यमा॥२८॥ ॥इत्यार्षे
रामायणेबालकांडेगंगोत्पत्तिर्नामसर्गः॥ ॥३४॥ ॥छ॥ ॥ ॥श्रीराम॥ ॥

उक्तवाक्येमुनौतस्मिन्नुभौतौरामलक्ष्मणौ॥ प्रतिनंद्यकथांवीरावब्रूतांमुनिपुंगवं॥ युक्तरूपमिदंब्रह्मन्कथि
तंमधुराक्षरं॥ कथेयंकथिनाब्रह्मन्पुण्यश्रवणकीर्त्तनी॥ दुहितुःशैलराजस्यज्येष्ठायावक्तुमर्हसि॥ विस्तरंविस्त
रज्ञोसिकथांनींदिव्येहवा॥ पुनस्तोश्रोतुमिछामिलोकेबहुविस्तरां॥ उमाकेनाभवद्देवीकौमारब्रह्मचारिणी॥
अवाप्यदेवप्रवरंपतिंभूतमहेश्वरं॥ हेतुनाकेनचैवेयंगंगात्रिपथगाभवेत्॥ कथंदेवनदीचेयंमानुषंसमुपाग
ता॥ कथंत्रिपथगागंगाप्रोच्यतेदेवमानुषैः॥ त्रिषुलोकेषुधर्मज्ञाकैश्च धर्मैरनुष्ठिता॥ तथातयोस्तुब्रुवतो
र्विश्वामित्रोमहातपाः॥ निखिलेनकथांदिव्यांऋषिमध्येतथाब्रवीत्॥ पुरारामकृतोद्वाहःशितिकंठोमहात
पाः॥ उमाचास्यर्धयादेवीमैथुनायोपजग्मतुः॥ शितिकंठस्यदेव्याश्चदिव्यंवर्षशतंगते॥ नचैवान्यतस्त्वा
सीत्तयोरामपरंजयः॥ ततोदेवाययुश्चिंतां पितामहपुरोगमाः॥१०॥ यदिचोत्पत्स्यतेपुत्रःसोढाकस्तंभ
विष्यति॥ तेभिगम्यसुराःसर्वेप्रणिपत्यवृषध्वजं॥ देवदेवंमहादेवंसर्वभूतहितेरते॥ सुराणांप्रणिपातेन
प्रसादंकर्त्तुमर्हसि॥ नलोकाधारयिष्यंतितववापत्यंस्फुरोत्तमं॥ ब्रह्मचर्येणसंयुक्तेदेव्यासहव्रतेश्वर॥
त्रैलोक्यहितकामस्त्वंतेजोधारयतेजसा॥ रक्षलोकानिमान्देवनलोकान्हंतुमर्हसि॥ देवतानांवचश्श्रु
त्वासर्वलोकमहेश्वरः॥ बाढमित्यब्रवीत्सर्वान्पुनश्चेदमुवाचह॥ यदिदंक्षुभितंस्थानान्ममतेजोध

वाल्मी॰रामा॰बा॰ ॥४२॥

त्तुत्तमं॥ धारयिष्यति कास्तन्मे प्रोच्यतां सुरसत्तमाः॥ एवमुक्तास्ततो देवाः प्रत्यूचुर्वृषभध्वजं॥ यत्तवक्षुभि
तं तेजस्तद्धरा धारयिष्यति॥ एवमुक्तः सुरपतिः प्रमुमोच महाबलः॥ तेजस्तत्पृथिवी येन व्याप्तं तद्गिरिका
ननं॥ ततो देवाः सुरपतिं प्रोचुः सर्वे हुताशनं॥ प्रविश त्वं महातेजा रौद्रं वायुसमन्वितः॥ तदग्निना पुनर्व्याप्तं
संजातश्वेतपर्वतः॥ दिव्यं शरवनं चैव पावकादित्यवर्चसं॥२०॥ यत्र जातो महातेजाः कार्तिकेयोऽग्निसंभवः॥ त
तो देवीं शिवं चैव देवाः सर्षिगणास्तदा॥ पूजयामासुरत्यर्थं सुराः सुरपतिं तदा॥ अथ शैलसुता राम सर्वानेव त
दा सुरान्॥ समन्युरशपद्देवी रोषात्संरक्तलोचना॥ यस्मादपत्यं सदृशं ममराममने छथा॥ अपत्यं स्वेषु दारे
षु युष्माकं न भविष्यति॥ नार्यश्चाद्य प्रभृति भविष्यंत्यप्रजाः सुराः॥ एवमुक्त्वा सुरान्सर्वान्शशाप पृ
थिवीमपि॥ एकरूपा वनित्वं तु बहुभोज्या भविष्यसि॥ न चापत्यकृतां प्रीतिं मत्क्रोधकलुषीकृता॥ ममा
प्रगमभिछंती मे त्वमपि लप्स्यसे॥ तां दृष्ट्वा व्रीडितां देवीमुमां सुरपतिस्तदा॥ गमनाय मतिं चक्रे दिशं
वरुणपालितां॥ स गत्वा तप आतिष्ठ उत्तमे शैलसित्नुव्रतः॥ हिमवत्प्रभवे शृंगे सह देव्या महेश्वरः॥ एष ते विस्त
रो राम शैलपुत्र्या निवेदितः॥ गंगायाः श्रणु कात्स्न्र्येन प्रभावं सह लक्ष्मण॥ कुमारसंभवं चैव वक्ष्येद्यं सुराजितं॥ शार्व ॥४२॥
॥३०॥ ॥ ॥ इत्यार्षे रामायणे बालकांडे उमोत्पत्तिर्नाम सर्गः॥३५॥ ॥ ॥ ॥छ॥

॥ तप्यमाने महादेवे देवाः सर्षिगणाः पुरा॥ सेनापतिमभीप्संतः पितामहमुपागमन्॥ अब्रुवंश्च सुराः सर्वे भगवंतं पितामहं॥
प्रणिपत्य शुभां वाणीं सुबद्धांजलिकृद्युक्ताः॥ यो नः सेनापतिर्देवः कृतो भगवता पुरा॥ स तपः परमास्थाय स्थितः
सुमहदद्भुतं॥ यदत्रानंतरं कार्यं लोकानां हितकाम्यया॥ तद्विधत्स्व विधानज्ञ त्वं हि नः परमात्मनः॥ देवतानां वचः
श्रुत्वा ब्रह्मा लोकपितामहः॥ सांत्वयञ्श्लक्ष्णया वाचा त्रिदशानिदमब्रवीत्॥ शैलपुत्र्या प्रशप्तास्थ प्रजा वो न भ
विष्यति॥ पत्नीष्विति न चोक्लिष्टं तस्यास्त्यं नात्र संशयः॥ येयमाकाशगंगेयमुपसृत्य हुताशनं॥ जनयिष्यति दे
वानां सेनापतिमरिंदमं॥ ज्येष्ठा शैलेंद्रदुहिता जनयिष्यति यत्सुतं॥ शोतमायो बहुमतो भविष्यति न संशयः॥
तच्छ्रुत्वा वचनं तस्य कृतार्था रघुनंदन॥ प्रणिपत्य सुराः सर्वे पितामहमपूजयन्॥॥ गत्वा तु पर्वतं राम कैलास
त्तमंडितं॥ अग्निं नियोजयामासुः पुत्रार्थं सर्वदेवताः॥ देवतानां कृते साधु पुत्रं जनय पावक॥ शैलपुत्र्या म
हाभाग गंगायां तेज उत्तमं॥ देवतानां प्रतिज्ञाय गंगामभ्योवाच पावकः॥ गर्भं धारय वै देवि देवतानामिदं प्रियं॥
कर्तुमिति सा श्रुत्वा दिव्यं गर्भमधारयत्॥ दृष्ट्वा तं महिमानं सा समंतादवकीर्यते॥ समं ततस्ततो देवीमभि
षिंचत पावकः॥ सर्वस्रोतांसि पूर्णानि तस्या ह्यासन्नरोत्तम॥ तमुवाच ततो गंगा सर्वदेवपुरोहितं॥ शक्ता
धारयितुं नास्मि तव तेजः समुद्यतं॥ असौ तु दह्यमानाहं संप्रव्यथितचेतना॥ अथाब्रवीदिदं तत्र गंगां दि

बोढुं ताशनः॥ गङ्गे हैमवतः पार्श्वे गर्भमेनं निवेशय॥ श्रुत्वा तस्यापि वचनं तं गर्भमपि भास्करं॥ तं ससर्ज म
हातेजाः स्रोतेभ्यो हि तदानघ॥ तीदृ निर्गतं तस्यास्तु तप्तजांबूनदप्रभं॥ कांचनं धरणी प्राप्ते हिरण्यं चाभव
त्तदा॥ ताम्रं कृष्णायसं चापि वक्रादेतदजायत॥ मलं चाप्यभवत्तस्य त्रपुसीशीसकमेव च॥ तदेतद्धरि
णीं प्राप्य नानाधातुत्वमागतं॥२०॥ निक्षिप्तमात्रे गर्भे तु तेजसाप्यत्र रंजितं॥ सर्वपर्वतसंबद्धं सौवर्णम
भवद्वनं॥ जातरूपमिति ख्यातं ततः प्रभृति राघव॥ तं कुमारं ततो जातं सेंद्राः समरुद्गणाः॥ क्षीरसं
भवनार्थाय कृत्तिकाः समयोजयत्॥ तत्क्षीरं जातमात्राय कृत्वा समयमुत्तमं॥ ददौ पुत्रार्थमस्माकं सर्वा
सां प्रकरिष्यति॥ ततस्ता देवता ऊचुः कार्त्तिकेयमिति प्रभुं॥ देवतानां वचः श्रुत्वा सच्युतं गर्भपरिस्रुते॥ स्ना
पयामासुरत्यर्थं दीप्यमानं यथारविं॥ स्कंद इत्येव तं दिव्यावुचुरप्रतिमौजसं॥ कार्त्तिकेयं महातेजाः काकु
त्स्थ ज्वलनोपमं॥ प्रादुर्भूतं ततः क्षीरं कृत्तिकानामनुत्तमं॥ षण्णां षडाननो भूत्वा जग्राह स्तनजं सदा॥
एष ते विस्तरो राम गंगायाः कीर्तितो मया॥ कुमारसंभवश्चैव धन्यः पुण्यः सुखावहः॥२७॥ ॥
॥ ॥इत्यार्षे रामायणे बालकांडे कुमारोत्पत्तिर्नाम षट्त्रिंशः सर्गः॥३६॥ ॥ ॥

॥ तां तथा कौशिको रामे निवेद्य मधुराक्षरां॥ पुनरेवापरं वाक्यं काकुत्स्थमिदमब्रवीत्॥ अयोध्याधिपतिः
शूरः पूर्वमासीन्नराधिपः॥ सगरो नाम धर्मात्मा प्रजाकामः स चाप्रजः॥ वैदर्भदुहिता नाम केशिनी नाम नाम
तः॥ ज्येष्ठा सगरपत्नी सा धर्मिष्ठा सत्यवादिनी॥ अरिष्टनेमेर्दुहिता रूपेणाप्रतिमा भुवि॥ द्वितीया स
गरस्यासीत्पत्नी परमधार्मिकी॥ ताभ्यां सह महेष्वासः पत्नीभ्यां तप्तवांस्तपः॥ हिमवंतमुपाश्रित्य भृ
गुप्रस्रवणे गिरौ॥ अथ वर्षशते पूर्णे तपसाराधितो मुनिः॥ सगराय वरं प्रादाद्भृगुः सत्यवतां वरः॥ अप
त्यलाभः सुमहान्भविता तेन रेश्वर॥ कीर्तिं चाप्रतिमां लोके प्राप्स्यसे पुरुषर्षभ॥ एका जनयिता ए
जन् पुत्रं वंशकरं तव॥ षष्टिं पुत्रसहस्राणामेकापि जनयिष्यति॥ एवं मुनिं भाषमाणं राजपत्न्यौ
नरोत्तम॥ ऊचतुः परमप्रीते कृतांजलिपुटे तदा॥ एकः कस्याः सुतो ब्रह्मन्का बहून्जनयिष्यति॥ इत्ये
तच्छ्रोतुमिच्छावः सत्यं चास्तु वचस्तव॥१०॥ तयोस्तु वचनं श्रुत्वा भृगुः परमधार्मिकः॥ उवाच मधुरां वा
णीं स्वच्छंदोत्र विधीयतां॥ एको वंशकरो वास्तु बहवो वा महाबलाः॥ कीर्तिमंतो महोत्साहा एका वरमि
च्छसि॥ मुनेस्तु वचनं श्रुत्वा केशिनी रघुनंदन॥ पुत्रं वंशकरं राम जग्राह नृपसंसदि॥ पुत्रान्षष्टिसहस्रा
णि सुपर्णभगिनी ततः॥ कीर्तियुक्तान्महोत्साहा जग्राह सुमतिस्तदा॥ प्रदक्षिणमृषिं कृत्वा शिरसा चाभ्यर्चा

वाल्मी॰ रामा॰ बाल॰
॥४४॥

ष्यच॥ जगाम स्वपुरं राजा सभार्यो रघुनंदन॥ अथ काले गते तस्मिन्पुत्रो ज्येष्ठो व्यजायत॥ असमंज इति ख्यातं
काकुत्स्थ सगरात्मज॥ सुमतिस्तु नरव्याघ्र गर्भतुंबं व्यजायत॥ षष्टिपुत्रसहस्राणि तुंबभेदाद्विनिर्ययुः॥ घृतकुंभेषु पू
र्णेषु धात्र्यस्तान्व्यवर्धयन्॥ कालेन महता ते तु यौवनं प्रतिपेदिरे॥ अथ दीर्घस्य कालस्य रूपयौवनशालिनः॥
पुत्राः षष्टिसहस्राणि सगरस्य तदाभवन्॥ स च ज्येष्ठो नरव्याघ्र सगरस्यात्मसंभवः॥ पौराणामहिते युक्तः
पित्रा निर्वासितः पुरात्॥२०॥ तस्य पुत्रोंऽशुमानासीदसमंजस्य वीर्यवान्॥ संमतः सर्वलोकस्य सर्वस्यैव प्रि
यंवदः॥ तस्य कालेन महता मतिरासीन्महात्मनः॥ सगरस्य नरश्रेष्ठ यजेयमिति राघव॥ स कृत्वा निश्चयं
राजा सोपाध्यायगणस्तदा॥ यज्ञकर्मणि वेदज्ञो यष्टुं समुपचक्रमे॥ तत्र तस्यात्मजा राम प्रतिष्ठाः कापिले
नपुः॥ विश्वामित्रवचः श्रुत्वा कथांते रघुनंदनः॥ उवाच परमप्रीतो मुनिं दीप्तमिवानलं॥ श्रोतुमिच्छा
मि भद्रं ते विस्तरेण कथामिमां॥ पूर्वको मे कथं ब्रह्मन्यज्ञं तं समवापह॥ विश्वामित्रस्तु काकुत्स्थमुवा
च प्रहसन्निव॥ श्रूयतां विस्तरो राम सगरस्य महात्मनः॥ शंकरश्वशुरो नाम हिमवानचलोत्तमः॥ विं
ध्यस्तु पर्वतश्रेष्ठो निरीक्षेते परस्परं॥ तयोर्मध्ये प्रवृत्तोऽभूद्यज्ञो वै रघुनंदन॥ स हि देशो नरव्याघ्र
प्रशस्तो यज्ञकर्मणि॥ तस्याश्वचर्यां काकुत्स्थ दृढधन्वा महारथः॥ अंशुमानकरोत्तात सगरस्य महा
त्मनः॥ तस्य पर्वणि तं यज्ञं यजमानस्य राघव॥२०॥ राक्षसीं तनुमास्थाय केनाप्यश्वस्तदाहृतः॥ ह्रिय

राम
॥४४॥

माणे तु काकुत्स्थ तस्मिन्काले महात्मनः॥ उपाध्यायगणाः सर्वे यजमानमथाब्रुवन्॥ अयं पर्वणि वेगेन यज्ञि
योऽश्वोऽपनीयते॥ हर्तारमस्य राजेंद्र जहि माश्वः प्रणश्यतु॥ उपाध्यायवचः श्रुत्वा तस्मिन्सदसि पार्थिवः॥ षष्टिं
पुत्रसहस्राणि वाक्यमेतदुवाच ह॥ गतिं दृश्यते ताव इक्षसः पुरुषर्षभाः॥ मंत्रविद्भिर्महाभागैरधिष्ठितमिदं
सदः॥ तद्गच्छत समुद्धर्तुं पुत्रका भद्रमस्तु वः॥ समुद्रमालिनीमेनां पृथिवीमनुमार्गथ॥ एकैकयोजनं पुत्रा विस्तारमभि
गच्छत॥ यावत्तुरगसंदर्शस्तावत्खनत मेदिनीं॥ दीक्षितः पुत्रसहितः सोपाध्यायगणो ह्यहं॥ न तु यास्यामि भद्रं वो याव
त्तुरगदर्शनं॥ ते सर्वे हृष्टमनसो राजपुत्रा महाबलाः॥ जग्मुर्भूतलं राम पितुर्वचनयंत्रिताः॥ तेषां योजनविस्ती
र्णमेकैको धरणीतलं॥ बिभेद पुरुषव्याघ्र वज्रस्पर्शसमैर्भुजैः॥ शूलैरशनिकल्पैश्च हलैश्चापि सुदारुणैः॥
भिद्यमाना वसुमती विदद्रे रघुनंदन॥ नागानां हन्यमानानामसुराणां च राघव॥४०॥ राक्षसानां च घोराणां नीतः
समुपलक्ष्यते॥ योजनानां सहस्राणि अशीतिं रघुनंदन॥ बिभिदुर्धरणीं वीराः पूर्वे यावद्रसातलं॥ एवं पर्व
तसंबाधं जंबूद्वीपं नृपात्मजाः॥ खनंतस्ते नृपसुताः सर्वतः परिचक्रमुः॥ ततो देवाः सगंधर्वाः सासुराः सहपन्नगाः॥
संभ्रांतमनसः सर्वे पितामहमुपद्रवन्॥ ते प्रसाद्य महात्मानं विषण्णवदनास्तदा॥ ऊचुः परमसंभ्रांताः ससंभ्रममिदं वचः॥
सपर्वतवनादेवी ससरिद्द्वीपसंकुला॥ भगवन्पृथिवी सर्वा खन्यते सगरात्मजैः॥ महात्मानो महासत्त्वा वध्यंते जलचारिणः॥
इत्यार्षे रामायणे बालकांडे पृथिवीखननं नाम सर्गः॥३९॥ ॥ ॥८०॥
॥ ॥६८॥ ॥४६॥

देवानां वचनं श्रुत्वा भगवान्प्रपितामहः॥ तान्प्रत्युवाच संत्रस्तान्सर्वदेवानिदं वचः॥ यस्येयं वसुधा कृत्स्ना वासुदे
वस्यईर्यते॥ कपिलं रूपमास्थाय हयस्तेनापवाहितः॥ पृथिव्याश्चापि निर्भेदो दृष्टएव पुरातनः॥ सगरस्य च पुत्राणां
विनाशो दीर्घजीविनां॥ पितामहवचः श्रुत्वा त्रयस्त्रिंशदरिंदम॥ देवाः परमसंतुष्टाः सर्वे जग्मुर्यथागतं॥ सग
रस्य तु पुत्राणां प्रादुरासीन्महास्वनः॥ पृथिव्यां भिद्यमानायां निर्घातस्वनवांसदा॥ ततो भित्वा महीं कृत्स्नां
कृत्वा चाभिप्रदक्षिणं॥ पार्थिवं सगरं सर्वे पितरं वाक्यमब्रुवन्॥ परिक्रांता मही सर्वा महान्सत्ववधः कृतः॥
गंधर्वयक्षरक्षाणां पिशाचोरगराक्षसां॥ पश्यामो न च ते राजन् यस्तविघ्नकरं तव॥ यत्करिष्यामहे भूयस्तं
बुध्या साधु चिंत्यतां॥ पुत्राणां वचनं श्रुत्वा तेषां तु रघुनंदन॥ समन्युरब्रवीद्वाक्यं सगरः पुरुषर्षभान्॥ भू
यः खनत भद्रं वो निर्भिद्य वसुधातलं॥ कृतार्थाः सन्निवर्तध्वं गृहीत्वाश्वापवाहकं॥ १०॥ पितुर्वचनमाज्ञाय स
गरस्य महात्मनः॥ षष्टिः पुत्रसहस्राणि रसातलमथाद्रवन्॥ खन्यमाने तदा तस्मिं ददृशुः पर्वतोपमं॥ आ
शागतं विरूपाक्षं धारयंतं महीमिमां॥ सपर्वतवनां कृत्स्नां पृथिवीं सनरोत्तम॥ सदाभिपर्शिका कुत्स्थ विरूपाक्षो
महागजः॥ यदा पर्वणि काकुत्स्थ विश्रामार्थं सवारणः॥ ईषच्चालयते स्कंधं कंपते मेदिनी तदा॥ तेतं प्रदक्षि
णीकृत्वा दिक्पालं कुंजरोत्तमं॥ खनमाना दिशं रक्षन् जग्मुर्भित्वा वसुंधरां॥ १५॥ ततः पूर्वां दिशं भित्वा दक्षिणां

बिभिदुः पुनः॥ दक्षिणस्यामपि पुनः ददृशुस्ते गजोत्तमं॥ पद्मनाभं महात्मानं तिष्ठंतं मंदरोपमं॥ शिरसा धा
रयंतं गां ते दृष्ट्वा विस्मयं गताः॥ ततः प्रदक्षिणं कृत्वा सगरस्य महात्मनः॥ षष्टिपुत्रसहस्राणि पश्चिमां बि
भिदुर्दिशं॥ पश्चिमायामपि तदा महांतमचलोपमं॥ दिक्कुंजरं सुमनसं ददृशुस्ते महाबलाः॥ तं ते प्रदक्षिणं कृ
त्वा पृष्ट्वा चैव मनामयं॥ खनंतः समतिक्रांता दिशं हैमवतीं तदा॥ उत्तरस्यां रघुश्रेष्ठ ददृशुर्हिमपांडुरं॥ भद्रं भ
द्रेण वपुषा धारयंतमिमां महीं॥ २०॥ तमालभ्य च ते सर्वे कृत्वा चैनं प्रदक्षिणं॥ राजपुत्रास्ततो भूयो बिभिदु
र्धरिणीतलं॥ ततः प्रायुत्तरां गत्वा याद्वियाः पृथिवीमिमां॥ अभ्युहृषिताः सर्वे काकुत्स्थ सगरात्मजाः॥
ददृशुः कपिलं तत्र वासुदेवं महाबलं॥ तं ते यज्ञहरं ज्ञात्वा क्रोधपर्याकुलेक्षणाः॥ अभ्यधावन्नरश्रेष्ठ
तिष्ठ तिष्ठेति चाब्रुवन्॥ संमूढा निधिदुः सर्वे देवमक्षयमव्ययं॥ ततस्तेनाप्रमेयेणाप्यधत्राप्रामहात्मना॥
भस्मराशीकृताः सर्वे काकुत्स्थ सगरात्मजाः॥ २६॥ ॥ इत्यार्षे रामायणे बालकांडे सगरपुत्र
विनाशो नाम सर्गः॥ ३८॥ ॥ ७॥ ॥ पुत्रांश्चिरगतां ज्ञात्वा सगरो रघुनंदन॥ नप्तारम ब्र
वीद्वाक्यं दीप्यमानं स्वतेजसा॥ शूरश्च कृतविद्यश्च समर्थश्च महाबलः॥ पितॄणां गतिमन्विच्छ न्ये नचा
श्वोपि वाहिताः॥ अंतर्भौमानि सत्वानि वीर्यवंति महांति च॥ तेषां त्वं प्रतिघातार्थं सासिं गृह्णीष्व कार्मुकं॥

अभिवाद्याभिवाद्यस्तं संहत्य न रिपूनपि॥ सिद्धार्थः सन्निवर्तस्व ममयज्ञस्य पारग॥ एवमुक्तोंऽशुमान्नामस
गरेण महात्मना॥ धनुरादाय खड्गं च ययौ लघुविक्रमः॥ स खातं पितृभिर्मार्गमंतर्भूमौ महर्षिभिः॥ पूज्य
मानो रघुश्रेष्ठ जगाम लघुविक्रमः॥ दैत्यदानवरक्षोभिः पिशाचपरमोरगैः॥ स्तूयमानो महातेजाः
दिग्गजं स ददर्शह॥ स तं प्रदक्षिणीकृत्य दृष्ट्वा चैनमनामयं॥ पितृन्स्तान्परिपप्रच्छ वाजिहर्तारमेव च॥
दिग्वारणस्तु तच्छ्रुत्वा सौम्यमंशुमतो वचः॥ तमुवाच कृतार्थस्त्वं हतास्ता श्चाश्यसीति च॥ तस्य तद्वचनं
श्रुत्वा सर्वानेव हि दिग्गजान्॥ यथाक्रमं यथान्यायं प्रष्टुं समुपचक्रमे॥ दिक्पालैः सत्कृतैः सर्वैर्वाक्य
ज्ञोवाक्यकोविदः॥ पूजितः सहतैः सैस्तु गंतासीत्यभ्यभाषित॥१९॥ तेषां तु वचनं श्रुत्वा जगाम ल
घुविक्रमः॥ भस्मराशीकृता यत्र पितरस्तस्य सागराः॥ स दुःखवशमापन्नस्त्वसमंजसुतस्तदा॥ चुक्रोश
परमायस्तो वधे तेषां सुदुःखितः॥ यज्ञियं च हयं तत्र चरंतमविदूरतः॥ ददर्श पुरुषव्याघ्रो दुःखशोक
समन्वितः॥ स तेषां राजपुत्राणां कर्तुकामो जलक्रियां॥ सलिलार्थी महातेजास्तदापश्यज्जलाशयं॥
विचार्य निपुणं दृष्ट्वा न तत्र ददर्शह॥ पितृणां मातुलं राम सुपर्णमनलोपमं॥ स चैनमब्रवीद्वाक्यं वै
नतेयो महाबलः॥ अहिंसि सलिलं वीर दातुमेभ्यो नरोत्तम॥ गंगा हिमवतो ज्येष्ठा दुहिता पुरुषर्षभ॥

भस्मराशीकृतानेनान्प्लावयेल्लोकभावन॥ तया क्लिन्नमिदं भस्म गंगया लोककांतया॥ षष्टिं तानि सहस्राणि
स्वर्गलोकाय धास्यति॥ गच्छ ताश्च महातेज प्रगृह्य पुरुषर्षभ॥ यज्ञं पैतामहं वीर निवर्तयितुमर्हसि॥२०॥
सुपर्णवचनं श्रुत्वा सोंऽशुमान्नाम नामतः॥ त्वरितं हयमादाय पुनरायान्महायशाः॥ स राजानमथासाद्य
दीक्षितं रघुनंदन॥ न्यवेदयत्तथा वृत्तं सुपर्णवचनं ततः॥ तच्छ्रुत्वा घोरसंकाशं वाक्यमंशुमतो नृपः॥
यज्ञं निवर्तयामास यथारब्धं यथाविधि॥ स्वपुरं चागमच्छ्रीमान् इष्टयज्ञो महीपतिः॥ गंगायाश्चा
गमे राजा नाध्यगच्छद्विनिश्चयं॥ अगत्वा निश्चयं राजा कालेन महता महान्॥ त्रिंशद्वर्षसहस्राणि
राज्यं कृत्वा दिवं ययौ॥ विधायसोपानमिव क्रतुं सःप्रतापवि द्योतितभूमिपृष्ठ॥ आरुरुहे दिव
जयमुग्रतेजाः चिक्रीड देशेषु मनोरमेषु॥२६॥ ॥ इत्यार्षे रामायणे बालकांडे सगरयज्ञसमाप्तिर्नाम
सर्गः॥३६॥ ॥ ॥४१॥ ॥ कालधर्मं गते राम सगरे प्रकृतीजनः॥ राजानं रोचयामास अंशुमंतं महाद्युतिं॥ राजा च सुमहानासीदंशुमान् रघुनंदन॥ तस्य पुत्रो महातेजा दिलीप
इति विश्रुतः॥ तस्मिन्राज्यं समावेश्य दिलीपे रघुनंदन॥ हिमवच्छिखरे रम्ये तपस्तेपे तदांऽशुमान्॥ स द्वात्रिंशत्
सहस्राणि वर्षाणाममितप्रभः॥ तपोवने तपश्च कृत्वा स्वर्गं लेभे स्वकर्मजं॥ दिलीपस्तु महातेजाः श्रुत्वा पैतामहं

वा॰ श्री॰ रामा॰ बा॰
॥४७॥

वधं॥ दुःखोपहतया बुध्या नाध्यगच्छत्स निश्चयं॥ कथं गंगावतरणं कथं तेषां जलक्रिया॥ तारयेयं कथं चैव इति चिंता
परोभवत्॥ तस्य चिंतयतो नित्यं धर्मेणाभिजितात्मनः॥ पुत्रो भगीरथो नाम जज्ञे परमधार्मिकः॥ दिलीपस्तु महातेजा
यज्ञैर्बहुविधैर्यजन्॥ त्रिंशतिं वै सहस्राणि वर्षाणां गामपालयन्॥ अगत्वा निश्चयं तेषां तु समुद्धर्तुं मनसा कृपन्॥
व्याधिना नरशार्दूल कालधर्ममुपेयिवान्॥ इन्द्रलोकं गतो राजा स्वार्जितं स्वेन कर्मणा॥ राज्ये भगीरथं पुत्रं निक्षि
प्य गुरुकर्षमा॥१०॥ भगीरथोपि राजाभूद्धार्मिको रघुनंदन॥ ऊर्ध्वबाहुः पंचतपा मिताहारो जितेंद्रियः॥ तस्य व
र्षसहस्रेण तपस्युग्रे महात्मना॥ ब्रह्मा प्रीतोभवद्राम प्रजानां प्रभुरीश्वरः॥ ततः सुरगणैः सर्वैः सह लोकपिता
महः॥ भगीरथं तप्यमानं महात्मानं वचोब्रवीत्॥ भगीरथ महाभाग प्रीतस्तेहं नरेश्वर॥ तपसा त्वं सुतप्तेन वरं व
रय सुव्रत॥ उवाच सुमहात्मानं सर्वलोकपितामहं॥ भगीरथो महातेजा बद्ध्वा शिरसि चांजलिं॥ यदि मे भगवान्प्री
तो यद्यस्ति तपसः फलं॥ सगरस्यात्मजाः सर्वे मत्तः सलिलमाप्नुयुः॥ गंगासलिलसंक्लिन्ने तेषां भस्मनि महौजस॥
स्वर्गं गच्छेयुरत्यंतं सर्वे मे प्रपितामहाः॥ देयं च संततिर्देव नावसीदेत्कदाचन॥ इक्ष्वाकूणां कुले गच्छे देष मेस्तु
वरो नमः॥ उक्तवाक्यं तु राजानं सर्वलोकपितामहः॥ प्रत्युवाच शुभां वाणीं मधुराक्षरभूषितां॥ तपोधन महा
भाग भगीरथ महारथ॥ एवं भवतु भद्रं ते इक्ष्वाकुकुलवर्धन॥२०॥ यासौ देवनदी गंगा ज्येष्ठा हिमवतः सुता॥

॥४७॥

तां वै धारयितुं राजन् शिवो देवः प्रसाध्यतां॥ गंगायाः पतनं राजन् भूमिः सोढुं न शक्ष्यति॥ अतिवेगात्पतंतीं गां
भित्वा पातालमाविशेत्॥ तस्या धारयितारं च नान्यं पश्यामि शंकरात्॥ तमेवमुक्त्वा राजानं गंगां चाभाष्य
लोककृत्॥ नियुक्ता जगतीं गंतुं गंगां प्रति ययौ ततः॥ पुराणं देवसदनं सर्वदेवनमस्कृतः॥२४॥ ॥
॥ इत्यार्षे रामायणे बालकांडे भगीरथवरप्रदानो नाम सर्गः॥४०॥ ॥४१॥ ॥ देवदेवे गते राम
सांगुष्ठाग्रेण पीडितां॥ कृत्वा वसुमतीं राजा संवत्सरमुपावसत्॥ अथ संवत्सरे पूर्णे सर्वदेवनमस्कृतः॥ उमापतिः
पशुपती राजानमिदमब्रवीत्॥ प्रीतस्तेऽहं नरश्रेष्ठ करिष्यामि तव प्रियं॥ शिरसा धारयिष्यामि शैलराज
सुतामहं॥ ततो हैमवती ज्येष्ठा सर्वलोकनमस्कृता॥ ततः स हिमवंतं तमधिरुह्य महेश्वरः॥ पतस्वेत्यब्रवी
द्गंगां आभाष्याकाशगां तथा॥ जटाकलापं विपुलं प्रविकीर्य समंततः॥ बहुयोजनविस्तारं शैलकंदरसन्निभं॥ त
स्मिन्नपात गगनाद्गंगा देवनदी श्रुता॥ वेगेन महता राम शिरस्यमिततेजसः॥ उत्ससर्ज जलं तत्र तीव्रवा
पुरस्कृतं॥ आक्रांता गंगामासाद्य धारयामास शंकरः॥ ततः संवत्सरं पूर्णं बभ्राम परिमोहिता॥ गंगा शिरसि
देवस्य विधृता वेगवाहिनी॥ ततः प्रसादयामास स पुनरेव भगीरथः॥ गंगायाः परिमोक्षार्थं महादेवमुमा

पतिं॥ तस्याथ वचनाद्गंगामुत्ससर्ज भगाक्षिहा॥१९॥ जटामेकां समापीड्य स्त्रोतः संजनयन्स्वयं॥ स्त्रोतसा
तेन सुस्राव ततस्त्रिपथगा नदी॥ प्लावयंती जगद्धाम पुण्या देवनदी शुभा॥ गगनाच्छंकरशिरस्ततश्च
धरिणीं गता॥ तां प्रच्युतामृषिगणाः शिरसा जगृहुस्तदा॥ सेंद्रैः सुरगणैः सार्धं पूजयंतो महानदीं॥ स्वयं
चात्र जगामैनां ब्रह्मा लोकपितामहः॥ नागाश्चत्रोधयामासुर्मोगं तस्यां महौजसः॥ जेपुर्देवर्षयो जाप्यं
सिद्धाश्च परमर्षयः॥ जगुश्च देवगंधर्वा यक्षाः सिद्धगणास्तथा॥ व्याकुलीयामितां गंगां गगनाद्धरिणीं
गतां॥ विमानैर्गरुडैर्हंसैर्हयैर्गजवरैस्तथा॥ पारिप्लवगणाश्चान्ये देवतास्तत्र धिष्ठिताः॥ तदद्भुततमं
लोके गंगापतनमुत्तमं॥ ददृशुर्देवगणाः समीयुरमितौजसः॥ संपतद्भिः सुरगणैस्तेषामाभरणौजसा॥
शतादित्यमिवासीत्तु गगनं गततोयदं॥ क्वचिद्द्रुततरं प्रायात्कुटिलं क्वचिदायतं॥ विनम्रं क्वचिदुद्धूतं याति शनैः
शनैः॥ सलिलेनैव सलिलं क्वचिदभ्याहतं पुनः॥२०॥ स्ववेगोद्भ्रमितावर्तफेनमालावनं सि
रपि पुनः क्वचित्॥ सलिलेनैव सलिलं क्वचिदभ्याहतं पुनः॥ शिशुमारोरगगणैर्मत्स्यैरपि तु चंचलैः॥ विद्युद्भिरिव विक्षि
का॥ महाजलाव र्तवती महाफेनप्रवाहिनी॥ शिशुमारोरगगणैर्मत्स्यैरपि तु चंचलैः॥ विद्युद्भिरिव विक्षिप्तै
प्तैः आकाशमभवद्धृतं॥ पांडुरैः सलिलोत्पीडैः कीर्यमाणं सहस्रधा॥ शारदाभ्रैरिवाभाति गगनं हंससंप्लवैः॥
तैः आकाशमभवद्धृतं॥ पांडुरैः सलिलोत्पीडैः कीर्यमाणं सहस्रधा॥ शारदाभ्रैरिवाभाति गगनं हंससंप्लवैः॥ विरराज नदा तोयं निर्मलं गत
मुहूर्तं तमथो गत्वा पपात धरिण्यां तले॥ तच्छंकरशिरोभ्रष्टं गंगांभ्रमितं पुनः॥ विरराज नदातोयं निर्मलं गत

कल्मषं॥ ऋषयः सगणगंधर्वा वसुधातलवासिनः॥ भवांगसंगतौ तोयेपवित्रमिति पूजिते॥ कृत्वा तत्राभिषेकास्ते ब
भूवुर्गतकल्मषाः॥ शापात्प्रपतिता ये तु गगनाद्वसुधातलं॥ पूतात्मानः पुनस्तेन सलिलेन दिवं गताः॥ भगीरथोपि रा
जर्षिर्दिव्यमारुह्य वै रथं॥ प्रायादग्रे महातेजास्तां गंगां पृष्ठतोन्वगात्॥ देवाः सर्षिगणाः सर्वे दैत्यदानवराक्षसाः॥ गं
धर्वयक्षप्रवराः सकिंनरमहोरगाः॥ सर्वाश्चाप्सरसो राम भगीरथरथानुगाः॥ गंगामन्वगमन्प्रीताः सर्वे जलचराश्च
श्चये॥२१॥ यतो भगीरथो राजा ततो गंगा यशस्विनी॥ जगाम नरशार्दूल सर्वलोकनमस्कृता॥ सगरस्य सागरं सा
जगाम पातालगता सदा॥ प्रविवेश रसातलं भूमेर्यत्र ते भस्मसात्कृताः॥ भस्मन्यथाप्लुते तेन गंगांभसा नरोत्तम॥ सर्वलो
कप्रभुर्ब्रह्मा राजानमिदमब्रवीत्॥ तारितानि नरव्याघ्र दिवं याता निदेववत्॥ षष्टिः पुत्रसहस्राणि सगरस्य
महात्मनः॥ सागरस्य जलं यावल्लोके स्थास्यति पार्थिव॥ सगरस्यात्मजास्तावल्लोके स्थास्यंति देववत्॥ दिव्य
माल्याम्बरधृता दिव्यगंधानुलेपनाः॥ दिव्यरूपधराश्चैव भविष्यंति गुणान्विताः॥ इयं च दुहिता ज्येष्ठा तव गंगा
भविष्यति॥ त्वत्कृतेन च नाम्ना तु लोके धात्रीति विश्रुता॥ गंगेति प्रथितं नाम तथा भागीरथीति च॥ त्रिपथेति च
नामास्यास्त्रिमार्गगत्वमास्मृतं॥ त्रीँल्लोकान्पावयंत्या वै सुरर्षिभिरुदाहृतं॥ द्वितीयं चापि गंगेति गांगनाया
विशां पते॥ भागीरथीति चाप्येवं तृतीयं नाम सुप्रभं॥ भविष्यति च चत्वारि यामस्त्र्या च विचक्षण॥४॥ ॥

वा॰श्रीरामा॰बा॰
॥४९॥

पितामहानांसर्वेषांत्वमत्रमनुजाधिप॥ कुरुष्वसलिलंराजन्प्रतिज्ञांपरिपालय॥ पूर्वकेनापितेराजंस्तेनातियशसा
तदा॥ धर्मिणांप्रवरेणापिनैषप्राप्तोमनोरथः॥ तथैवांशुमतातातलोकेप्रतिमतेजसा॥ गंगांप्रार्थयतातातप्राप्तकामः
समंजसा॥ राजर्षिणागुणवतामहर्षिसमतेजसा॥ अतुल्यतपसाचापिक्षत्रधर्मस्थितेनच॥ दिलीपेनमहाभागतव
पित्रातितेजसा॥ पुनर्नशकितानेतुंगंगांप्रार्थयतानघ॥ सात्वयासमनुप्राप्ताप्रतिज्ञापुरुषर्षभ॥ प्राप्तोसि
परमंलोकेयशोयेत्रिदशासमतं॥ यद्दिगंगावतरणंत्वयाकृतमरिंदम॥ अनेनचमहत्प्राप्तंधर्मस्थानंचयानघ॥ प्ला
वयस्वत्वमात्मानंनरोत्तमसदोदिते॥ सलिलेपुरुषश्रेष्ठशुचिःपुण्यफलोभव॥ पितामहानांसलिलंकुरुष्वच
यथासुखं॥ स्वस्तितेस्तुगमिष्यामिस्वर्गंहंगम्यतामिति॥ इत्येवमुक्त्वालोकेशःसर्वलोकपितामहः॥ य
थागतंजगामाथब्रह्मलोकंपितामहः॥५०॥ भगीरथोपिराजर्षिःकृत्वासलिलमुत्तमं॥ यथाक्रमंयथान्या
यंसागराणांचराघव॥ कृतोदकःशुचीराजास्वपुरंप्रविवेशह॥ समृद्धार्थोनरश्रेष्ठोराज्यंचानुशशा
सह॥ प्रमुमोदचलोकस्तंनृपमासाद्यराघव॥ नष्टशोकःसमृद्धार्थोबभूवविगतज्वरः॥ एषतेरामगंगा
याविस्तरोभिहितोमया॥ स्वस्तिप्राप्नुहिभद्रंतेसंध्याकालोभिवर्त्तते॥ धन्यंयशस्यमायुष्यंपुण्यंसर्वंतथै
वच॥ इदमाख्यानमाख्यातंगंगावतरणंशुभं॥ भागीरथीतिविदितात्रिभुवनत्रयेस्मिन्पीयूषनिर्मलजलप्र
चलत्तरंगा॥ प्रक्षालिताखिलजगत्कलुषाधरित्र्या स्वैरंहिखेलतिविहंगमराड्वरंम्योधि॥५६॥ ॥
॥ ॥ ॥इत्यार्षेरामायणेबालकांडेगंगावतरणंनामसर्गः॥४४॥ ॥ ॥६०॥

त्राय
॥४९॥

विश्वामित्रवचःश्रुत्वाराघवःसहलक्ष्मणः॥ विस्मयंपरमंगत्वाविश्वामित्रमथाब्रवीत्॥ अत्यद्भुतमिदंब्रह्मन्क
थितंपरमंत्वया॥ गंगावतरणंपुण्यंसमुद्रस्यचपूरणं॥ क्षणभूतेवरात्रिर्मेचिंतयेसुमहाव्रत॥ इमांश्चिंतयतःसर्वा
मखिलेनकथांतव॥ ततःसाशर्वरीसर्वासहसौमित्रिणातदा॥ गताचिंतयतस्तस्यविश्वामित्रस्यतांकथां॥ ततःप्र
भातेविमलेविश्वामित्रंमहामुनिं॥ उवाचराघवोवाक्यंकृतपूर्वाह्णिकक्रियः॥ गताभगवतीरात्रिःश्रोतव्यंपरमं
श्रुतं॥ सरामःसरितांश्रेष्ठांपुण्यांत्रिपथगामिनीं॥ नौरेषासुखविस्तीर्णामुनीनांपुण्यकर्मिणां॥ भगवंतमिहप्राप्तंज्ञा
त्वात्वरितमागता॥ तस्यतद्वचनंश्रुत्वाराघवस्यमहात्मनः॥ संतारंतारयामासऋषिसंघःसराघवः॥ उत्तरंकू
लमासाद्यसंपूज्यर्षिगणंततः॥ गंगातीरेनिविष्टास्तेविशालांददृशुःपुरीं॥ ततोमुनिवरस्तूर्णंजगाम
सहराघवः॥ विशालांनगरींरम्यांदिव्यांस्वर्गपुरीमिव॥१०॥ अथरामोमहाप्राज्ञोविश्वामित्रंमहामुनिं॥ पप्र
च्छप्रांजलिर्भूत्वाविशालामुत्तमांपुरीं॥ कतरोराजवंशोयंविशालस्यमहामुने॥ श्रोतुमिच्छामिभद्रं
तेपरंकौतूहलंहिमे॥ तस्यतद्वचनंश्रुत्वाराघवस्यमुनिस्तदा॥ आख्यातुंसमुपचक्रामेविशालस्यपुरातनं॥
श्रूयतामयामहेंद्रस्यकथांकथयतःशुभां॥ तामेनिगदतोवत्सशृणुतत्वेनराघव॥ पूर्वंकृतयुगेवीरदितेःपु
त्रामहाबलाः॥ अदितेश्चसमानाथवीर्यवंतोमहाबलाः॥ ततस्तेषांनरश्रेष्ठबुद्धिरासीन्महात्मनां॥ क्षीरोद

वाल्मी॰ रामा॰ बाल॰
॥५०॥

मथनादीरसं संभाव्यतत्र वै॥ सर्वौषधीः समाहृत्य प्रक्षिप्य च ततस्ततः॥ यद्रत्नोसत्थ्यते सारं तं पास्याम स्ततो वयं॥ त
थाजरामरा लोके भविष्यामो गतज्वराः॥ तेजोवीर्यबलोन्मत्ताः कीर्तिद्युतिसमन्विताः॥ इति ते निश्चयं कृत्वा ममंथु
र्वरुणालयं॥ ते थ निश्चित्य मनसा नेत्रं कृत्वाथ वासुकिं॥ मंथानं मंदरं कृत्वा ममंथुः पुरुषोत्तम॥ अप्सुनिर्मथमा
नासुरसास्तस्माद्वरस्त्रियः॥ २०॥ उत्पेतुः पयसस्तस्मात्तस्मादप्सरसः स्मृताः॥ षष्टिः कोट्यस्तु संभूतास्तस्माद
प्सरसः पुरा॥ दिव्यानां दिव्यरूपाणां दिव्याभरणवाससां॥ रूपयौवनमाधुर्यगुणाढ्यानां सुवर्चसां॥ असंख्ये
यास्तु काकुत्स्थ यास्तासां परिचारकाः॥ तास्ततः प्रतिसंप्राप्तान्न जगृहुर्देवदानवाः॥ अप्रतिग्रहणाच्चैव ततः सा
धारणास्तु ताः॥ वरुणस्य ततः कन्या वारुणी रघुनंदन॥ उत्पपात महावीर्या वीक्षमाना परिग्रहं॥ दितेः पुत्रा
न तां राम जगृहुर्वरुणात्मजां॥ अदितेस्तु सुता वीर जगृहुस्तामनिंदितां॥ तेनाभवन्सुरा देवा दैतेयाश्चा
सुरास्ततः॥ हृष्टाः प्रमुदिताश्चासन्वारुणीग्रहणात्सुराः॥ उच्चैःश्रवाश्च तत्राश्वो मणिरत्नं च कौस्तुभं॥
तस्मादिव समुद्भूतममृतं चाप्यनंतरं॥ अमृतानंतरं चापि धन्वंतरिरजायत॥ वैद्यराउमृतं तस्यैव विक्रांतस्य
र्णकमंडलु॥ धन्वंतरेरनुद्भूतं विषं सर्वविषादद॥ ततो नागा जगृहुः सर्वे ज्वलनादित्यसंनिभं॥ दृष्ट्वा देवास्ततो
धावन्नमृतं चापि भास्वरं॥ ३०॥ अमृतस्य कृते राम महानासीत्कुलक्षयः॥ अदितेरात्मजास्तत्र दिति
पुत्रान्निजघ्निरे॥ विनिहत्य दितेः पुत्रान्राज्यं प्राप्य पुरंदरः॥ विज्वरो निहतामित्रो मुमुदे विबुधैः सह॥

राव
॥५०॥

तदा तु मुदिता लोकाः सर्षिसंघाः सचारणाः॥ हतेषु पुत्रेषु दितिः परं दुःखेन मोहिता॥ मारीचं कश्यपं राम भर्ता
रमिदमब्रवीत्॥ हतपुत्रास्मि भगवंस्तव पुत्रैर्महाबलैः॥ शक्रहंतारमिच्छामि पुत्रं दीर्घतपोर्जितं॥ साहं तप
श्चरिष्यामि गर्भमाधातुमर्हसि॥ ईदृशं शक्रहंतारं त्वमनुज्ञातुमर्हसि॥ तस्यास्तद्वचनं श्रुत्वा मारीचः क
श्यपस्तदा॥ प्रत्युवाच महातेजा दितिं परमदुःखितां॥ एवं भवतु भद्रं ते शुचिर्भव तपोधने॥ जनयिष्यसि पुत्रं
त्वं शक्रहंतारमाहवे॥ पूर्णे वर्षसहस्रे त्वं शुचिर्यदि भविष्यसि॥ एवमुक्त्वा महातेजाः पाणिं स ममार्जतां॥
संमार्ज च त्रिभुवने जगाम स महान्नृषिः॥ गते तस्मिन्नरश्रेष्ठ दितिः परमहर्षिता॥ कुशप्लवनमासाद्य तप
स्तेपे सुदारुणं॥ ४०॥ तपस्तस्याश्च कुर्वत्याः परिचर्यां चकार ह॥ सहस्राक्षो नरश्रेष्ठ परया भक्तिसंपदा॥ स
मिधोग्निं कुशान्पुष्पं तथा मूलफलं हविः॥ शक्रो न्यवेदयत्तस्यै यच्चान्यदपि कांक्षितं॥ गात्रसंवाहनैश्चापि श्र
मापनयनैस्तः॥ शक्रः सर्वेषु कालेषु दितिं परिचचार ह॥ अथ वर्षशते पूर्णे दशमे रघुनंदन॥ दितिः प
रमसुप्रीता सहस्राक्षमुवाच ह॥ प्रीता तेहं सहस्राक्ष दशवर्षाणि पुत्रक॥ अवशिष्टानि भद्रं ते भ्रात
रं द्रक्ष्यसे पुनः॥ तमहं त्वत्कृते पुत्र समाधाय जयोत्सुकं॥ त्रैलोक्यं निखिलं पुत्र भोक्ष्यतां सह विज्व
रो॥

नो॰ श्री॰ रामा॰ बाल॰ ॥५२॥

एवमुक्ता दितिः शक्रं प्राप्ते मध्यंदिवाकरे ॥ निद्रयापहृता देवी पादौ कृत्वाथ शीर्षतः ॥ दृष्ट्वा तामशुचिं शक्रः पाद
योः कृतमूर्धजां ॥ कृतपादौ शिरःस्थाने जहास मुदितोपि च ॥ तस्याः शरीरं विवरं विवेश स पुरंदरः ॥ गर्भं च सप्त
धा राम बिभेद परमात्मवान् ॥ भिद्यमानस्ततो गर्भो वज्रेण शतपर्वणा ॥ रुरोद सुस्वरं राम ततो दितिरबुध्य
त ॥५०॥ मा रोदीरिति तं शक्रो गर्भं चैवाभ्यभाषत ॥ बिभेद च महातेजा एकैकं सप्तधा पुनः ॥ न हंतव्यो न हं
तव्य इत्येवं दितिरब्रवीत् ॥ निर्ययावथ देवेशो मातुर्वचनगौरवात् ॥ प्रांजलिर्वज्रसहितो दितिं चैवाभ्यभाष
त ॥ अशुचिर्देवि सुप्तासि पादतः कृतमूर्धजा ॥ तदंतरमहं लब्ध्वा शक्रहंतारमाहवे ॥ भिन्नवान्सप्तधा
देवि तन्मे त्वं क्षंतुमर्हसि ॥ ५४ ॥ ॥ इत्यार्षे रामायणे बालकांडे गर्भभेदो नाम सर्गः ॥ ४२ ॥ ॥ ॥
॥ सप्तधा तु कृते गर्भे दितिः परमदुःखिता ॥ सहस्राक्षं दुराधर्षं वाक्यं सानुनयाब्रवीत् ॥ ममापराधा
द्गर्भोयं सप्तधा विदलीकृतः ॥ नापराधोस्ति देवेश तव कश्चन पुत्रक ॥ प्रियं तु कृतमिच्छेयं अस्मिन्गर्भवि
पर्यये ॥ सप्तस्थानानि सप्तैते मरुतः पालयंतु ते ॥ वातस्कंधाः सदा सप्त चरंतु मम पुत्रकाः ॥ मरुतश्चेति
विख्याताः दिव्यरूपा महाबलाः ॥ ब्रह्मलोकं चरत्वेक इंद्रलोकं तथापरः ॥ दिव्यवायुरिति ख्यातस्तृतीय
स्तु महायशाः ॥ चतुर्थस्तु नरश्रेष्ठ दिशो वै तव शासनात् ॥ संचरिष्यति भद्रं ते देवरूपो महाबलः ॥ त्वत्कृते

शर्व ॥५२॥

च

नैव मरुत इति नाम्ना च विश्रुताः ॥ संचरिष्यंति भद्रं ते कालेन च मम आत्मजाः ॥ तस्यास्तद्वचनं श्रुत्वा सहस्राक्षः पुरंदरः ॥
उवाच प्रांजलिर्वाक्यं दितिं बलनिषूदनः ॥ सर्वमेतद्यथोक्तं ते भविष्यति न संशयः ॥ एवं तौ निश्चयं कृत्वा मातापुत्रौ तपोव
ने ॥ जग्मतुस्त्रिदिवं राम कृतार्थाविति नः श्रुतं ॥ विष्वग्वायोस्तु काकुत्स्थ पुत्रः परमधार्मिकः ॥१०॥ अलंबुषाया
मुत्पन्नो विशाल इति नः श्रुतं ॥ तेनेयं निर्मिता राम वैशाली नगरी शुभा ॥ विशालस्य सुतो राम हेमचंद्रो महा
बलः ॥ सुमंत इति विख्यातो हेमचंद्रिर्महायशाः ॥ सु-- चंद्रतयो राम धूम्राक्ष इति विश्रुतः ॥ धूम्राक्षतनयश्चा
पि सृंजयः समपद्यत ॥ सृंजयस्य सुतः श्रीमान्सहदेवः प्रतापवान् ॥ कृशाश्वः सहदेवस्य पुत्रः परमधार्मिकः ॥
कृशाश्वस्य महातेजाः सोमदत्तः प्रतापवान् ॥ सोमदत्तस्य पुत्रस्तु काकुत्स्थ जनमेजयः ॥ तस्य पुत्रो महातेजाः
संप्रत्येष पुरीमिमां ॥ अध्यास्ते नरशार्दूल प्रमतिर्नाम दुर्जयः ॥ विष्वग्वायोः प्रसादेन वैशालाः सर्वपार्थिवाः ॥
दीर्घायुषो महात्मानो वीर्यवंतः सुधार्मिकाः ॥ इहाद्य रजनीं राम वत्स्यामः सुसुखं वयं ॥ श्वः प्रभाते नरश्रेष्ठ जनकं
द्रष्टुमर्हसि ॥ अथासौ प्रमती राजा विश्वामित्रमुपागतं ॥ श्रुत्वा नरवरश्रेष्ठ पुरात्प्रत्युद्ययौ तदा ॥ पूजां च
परमां कृत्वा सोपाध्यायः सबांधवः ॥ प्रांजलिः कुशलं पृष्ट्वा विश्वामित्रमथाब्रवीत् ॥२०॥ धन्योस्म्यनुगृही
तोस्मि यस्य मे विषयं मुनिः ॥ संप्राप्तो दर्शनं चैव नास्ति धन्यतरो मया ॥ अद्य मे सफलं जन्म सेवनं च मनो

रथः॥ यस्त्वां कुशलिनं ब्रह्मन्पथ्याभिस्समुपागमं॥ पृष्ट्वा कुशलं तत्र परस्पर समागमे॥ कथांते प्रमतिर्वाक्यं व्याजहा
र महामुनिं॥ इमौ कुमारौ भद्रं ते देवतुल्यपराक्रमौ॥ गजसिंहगती वीरौ शार्दूलवृषभाविव॥ पद्मपत्रविशालाक्षौ वरा
युधधरावुभौ॥ अश्विनाविव रूपेण समुपस्थितयौवनौ॥ यदृच्छयाक्षितिं प्राप्तौ किमर्थं कस्य वा मुने॥ भूषयंताविमं
देशं सूर्यचंद्राविवांबरं॥ परस्परेण सदृशौ प्रमाणस्थितिचेष्टितैः॥ वरायुधधरौ वीरौ श्रोतुमिच्छामि तत्वतः॥
तस्य तद्वचनं श्रुत्वा यथावृत्तं निवेदयत्॥ सिद्धाश्रमकथां चैव राक्षसानां वधमेव च॥ विश्वामित्रवचः श्रुत्वा
विस्मितः समहायशाः॥ बभूव दृष्ट्वा सदृशौ पुत्रौ दशरथस्य तौ॥ अथ तौ पूजयामास नृपतिः सयथाविधि॥ ततः प
रमसत्कारं प्रमतेः प्राप्य राघवौ॥ उष्य तत्र निशामेकां जग्मतुर्मिथिलां ततः॥ दृष्ट्वा तु मुनयः सर्वे जनकस्य शु
भां पुरीं॥ साधु साध्विति तं दृष्ट्वा मिथिलां समपूजयन्॥ मिथिलोपवने तस्मिन्नाश्रमं प्रेक्ष्य राघवः॥ पुराणं नि
र्जितं चैव पप्रच्छाथ महामुनिं॥ श्रीमानविरलच्छायो मुनिसंघविवर्जितः॥ श्रोतुमिच्छामि भगवन्कस्यासीदय
माश्रमः॥ तच्छ्रुत्वा राघवेणोक्तं वाक्यं वाक्यविशारदः॥ प्रत्युवाच महातेजा विश्वामित्रो महामुनिः॥ हंत ते वर्णि
यिष्यामि शृणु तत्वेन राघव॥ यथायमाश्रमः पूर्वं शप्तः कोपान्महात्मनः॥ गौतमस्य नरश्रेष्ठ पूर्वमासीन्म
हामुने॥ आश्रमोयं महापुण्यः सुरैरपि सुपूजितः॥ स चेह तप आतिष्ठदहल्यासहितो मुनिः॥ संवत्स

रसहस्राणि बहूनि रघुनंदन॥ तस्यांतरं विदित्वा तु सहस्राक्षः पुरंदरः॥ मुनिवेषधरो भूत्वाहल्यामिदमब्रवीत्॥
ऋतुकालं प्रतीक्ष्यंते नार्थिनः सुसमाहिते॥ संगमं त्वहमिच्छामि त्वया सह सुमध्यमे॥ मुनिवेषं सहस्राक्षं विज्ञाय रघुनंदन॥ मतिं चकार दुर्मेधा देवराजकुतूहलात्॥ अब्रवीच्च सुरश्रेष्ठं गच्छ शीघ्रमितः प्रभो॥
कृतार्थास्मि सुरश्रेष्ठ गच्छ शीघ्रमितः प्रभो॥ आत्मानं मां च देवेश सर्वदा रक्ष मानद॥ इंद्रस्तु प्रहसन्वाक्यमहल्यामिदमब्रवीत्॥ सुश्रोणि परितुष्टोस्मि गमिष्यामि यथागतं॥ एवं संगम्य तु तदा निश्चक्रामोटजात्ततः॥ स संभ्रमात्त्वरन्राम शंकितो गौतमं प्रति॥ गौतमं तं ददर्शाथ प्रविशंतं महामुनिं॥ देवदानवदुर्धर्षं तपोबलसमन्वितं॥ तीर्थोदकपरिक्लिन्नं दीप्यमानमिवानलं॥ गृहीतसमिधं तत्र सकुशं मुनिपुंगवं॥ दृष्ट्वा सुरपतिस्त्रस्तो विषण्णवदनोभवत्॥ अथ दृष्ट्वा सहस्राक्षं मुनिवेषधरं मुनिः॥ दुर्वृत्तं वृत्तसंपन्नो रोषाद्वचनमब्रवीत्॥ मम रूपं समास्थाय कृतवानसि दुर्मते॥ अकर्तव्यमिदं तस्माद्विफलस्त्वं भविष्यसि॥ गौतमेनैवमुक्तस्य सरोषेण महात्मना॥ पेततुर्वृषणौ भूमौ सहस्राक्षस्य तत्क्षणात्॥ तथा शप्त्वा च वै शक्रं भार्यामपि च शप्तवान्॥ इह वर्षसहस्राणि बहूनि निवसिष्यसि॥

सततं चाश्रमवासिनी ॥ अदृश्या सर्वभूतानां आश्रमेऽस्मिन् वसिष्यसि ॥ यदा चैनं वनं घोरं रामो दाश
रथिर्विभुः ॥ आगमिष्यति दुर्धर्षस्तदा पूता भविष्यसि ॥ तस्यातिथ्येन दुर्वृत्ते लोभमोहविवर्जि तः ॥
मत्सकाशं मुदा युक्ता स्वं रूपं धारयिष्यसि ॥ एवमुक्त्वा महातेजा गौतमो दुष्टचारिणीं ॥ पु
ण्ये देशे समासाद्य सिद्धचारणसेविते ॥ हिमवच्छिखरे रम्ये तपस्तेपे महातपाः ॥५५॥
॥ ॥ इत्यार्षे रामायणे बालकांडे अहल्याशापो नाम सर्गः ॥ ४७ ॥ ॥ ॥छ॥
अफलस्तु कृतः शक्रो देवानग्निपुरोगमान् ॥ अब्रवीत्त्रस्तवचनं सर्षिसंघान्सचारणान् ॥ कुर्व
ता तपसो विघ्नं गौतमस्य महात्मनः ॥ क्रोधमुत्पाद्य तमया सुरकार्यमिदं कृतं ॥ अफलोऽस्मि कृतस्ते
न क्रोधात्सा च निराकृतः ॥ शापमोक्षेण महता तपोऽस्यापहृतं मया ॥ तस्मात्सुरवराः सर्वे सर्षि
संघाः सचारणाः ॥ सुरसाहाय्यकर्तारं सफलं कर्तुमर्हथ ॥ तस्य तद्वचनं श्रुत्वा पितृदेवाः
समागताः ॥ पितृदेवानुवाचाग्निः सहितान्समरुद्गणान् ॥ अयं हि मेषो वृषणी शक्रश्चावृषणी
कृतः ॥ अस्यापहृत्य वृषणं महेन्द्राय प्रयच्छथ ॥ अफलश्च कृतो मेषः परां पुष्टिं गमिष्यति ॥ भवतां

सुप्रयोगेन तद्यस्य सुमहत्फलं ॥ अग्नेस्तु वचनं श्रुत्वा पितृदेवाः समागताः ॥ उत्पाट्य मेषवृषणं सहस्राक्षे समाद
धुः ॥ तदाप्रभृति काकुत्स्थ पितृदेवाः समागताः ॥ अफलं भुंजते तेन सफलं तेन भुंजते ॥ इंद्रस्तु मेषवृषण
स्तदाप्रभृति राघव ॥ गौतमस्य प्रभावेन तपसः सुमहत्फलं ॥१०॥ तस्मात्त्वं छाम हे तस्य आश्रमं पुण्यकर्मणः ॥
तारयेमां महाभागां अहल्यां कामरूपिणीं ॥ विश्वामित्रवचः श्रुत्वा राघवः सहलक्ष्मणः ॥ विश्वामित्रं पुरस्कृ
त्य प्रविवेश महावनं ॥ स ददर्श महाभागां तपसा द्योतितप्रभां ॥ एकामथ समासाद्य दुर्दर्शां मसुरासुरैः ॥ प्र
यत्नान्निर्मितां धात्रा दिव्यां मायामयीमिव ॥ धूमेनाभिपरीतांगीं दीप्तामग्निशिखामिव ॥ तुषारेणावृतां साभ्रां
पूर्णचंद्रप्रभामिव ॥ मध्येऽम्भसो दुराधर्षां दीप्तां सूर्यप्रभामिव ॥ सा हि गौतमवाक्येन दुर्निरीक्ष्या बभूव ह ॥
त्रयाणामपि लोकानां यावद्रामस्य दर्शनात् ॥ राघवौ तु ततस्तस्याः पादौ जगृहतुस्तदा ॥ सा च तौ प्रतिजग्राह
स्मरंती गौतमभाषितं ॥ न्यायतः पाद्यमर्घ्यं च चकार मुदिता तयोः ॥ प्रतिजग्राह रामस्तु शास्त्रदृष्टेन कर्मणा ॥
पुष्पवृष्टिर्महत्यासीद्देवदुंदुभिनिस्वनः ॥ गंधर्वाप्सरसां चापि महानासीत्समागमः ॥ साधु साध्वि
ति देवास्त्वहल्यां समपूजयन् ॥ तपोबलविशुद्धांगीं गौतमस्य वशानुगां ॥२०॥ गौतमस्तु महातेजा
अहल्यासहितः सुखी ॥ रामं संपूज्य विधिवत्तपस्तेपे महातपाः ॥ रामोऽपि परमां पूजां गौतमस्य महामुनेः ॥ सका

शाद्दुधिवल्लाप जगाममिथिलां तदा॥ विश्वामित्रं पुरस्कृत्य पश्यन्देशान्दिशस्तथा॥२३॥ ॥इत्यार्षे
रामायणे बालकाण्डे अहल्याशापमोक्षणो नाम सर्गः॥४४॥ ॥छ॥ ॥ततः प्रागुत्तरां कृत्वा
दिशं रामः सलक्ष्मणः॥ विश्वामित्रं पुरस्कृत्य यज्ञवाटं ददर्श ह॥ रामस्तु मुनिशार्दूलमुवाच सहलक्ष्मणः॥ साध्वी यज्ञ
समृद्धोस्य जनकस्य महाक्रतुः॥ बहवः शतसाहस्रा नानादेशनिवासिनां॥ ब्राह्मणानां समेतानां देशभाषा
विचारिणां॥ यज्ञभागाश्च बहवः शकटीशतसंकुलाः॥ देशो विधीयतां ब्रह्मन्यत्र वासः सुखी भवेत्॥
रामस्य वचनं श्रुत्वा विश्वामित्रो महायशाः॥ निवेशमकरोद्देशे विविक्ते सलिलाश्रिते॥ विश्वामित्रं मुनिं प्राप्तं
जनकः सहमन्त्रिभिः॥ शतानन्दं पुरस्कृत्य पुरोधसमनिंदितं॥ ऋत्विग्भिः परिवृतस्तूर्णमर्घयामास धर्मवित्॥
विश्वामित्राय धर्मेण ददौ मन्त्रपुरस्कृतं॥ प्रतिगृह्य तु तां पूजां जनकस्य महात्मनः॥ पप्रच्छ कुशलं राज्ञो राष्ट्रे
चापि निरामयं॥ तांश्चैव स मुनिः सर्वानुपाध्यायपुरोधसः॥ समागच्छ यथान्यायं यथाविधि यथार्हणं॥ अ
थ राजा मुनिश्रेष्ठं कृताञ्जलिरभाषत॥ आसने भगवानास्तां श्रमं चोत्कु मिहार्हसि॥१०॥ जनकस्य वचः
श्रुत्वा निषसाद महामुनिः॥ पुरोहितो द्विजाश्चैव राजा च सहमन्त्रिभिः॥ आसने तु यथान्यायमुपवि

ष्टा यथाविधिः॥ दृष्ट्वा नरपतिस्तत्र विश्वामित्रमथाब्रवीत्॥ अद्यायं सफलो यज्ञो महर्षे दैवतैः कृतः॥ अद्य यज्ञफलं कृत्स्नं प्राप्तं
तव संदर्शनान्मया॥ धन्यो स्म्यनुगृहीतो स्मि यस्य मे मुनिपुंगव॥ यज्ञावसाने संप्राप्तो द्रष्टुं मुनिवरैः सह॥ महर्षे द्वादशाहं
तु शेषमाहुर्मनीषिणः॥ यज्ञभागार्थिनो देवान्द्रष्टुमर्हसि कौशिक॥ इमौ च मुनिशार्दूल कुमारौ विबपावकौ॥ काकपक्षधरौ वी
रौ कस्येमौ मुनिपुंगव॥ व्यूढोरस्कौ महाबाहू खड्गतूणधनुर्धरौ॥ अश्विनाविव रूपेण कस्येतौ देववर्चसौ॥ किमर्थं
च मुनिश्रेष्ठ प्रपन्नौ दुर्गमाध्वनः॥ बालाववहितौ ब्रह्मन्श्रोतुमिच्छामि संशय॥ तस्य तद्वचनं श्रुत्वा जनकस्य महामु
निः॥ न्यवेदयन्महात्मानौ पुत्रौ दशरथस्य तौ॥ तथागमनमस्त्रं च राक्षसानां च तं वधं॥ सिद्धाश्रमनिवासं च विशालस्य
स्य दर्शनं॥२०॥ गौतमाश्रमकार्यं च गौतमस्य च दर्शनं॥ महाधनुषि जिज्ञासा कार्यं चैषां महात्मनां॥ एतत्सर्वं महा
तेजाः कौशिको जनकाय वै॥ निवेद्य विररामाशु विश्वामित्रो महामुनिः॥ मुनिमध्ये स्थितः प्राज्ञो वसन्निव पावकः॥
तस्य तद्वचनं श्रुत्वा विश्वामित्रस्य धीमतः॥ हृष्टरोमा महातेजाः क्षणेन समपद्यत॥ गौतमस्य सुतो ज्येष्ठस्तपसा
द्योतितप्रभः॥ रामसंदर्शनं प्राप्य परं विस्मयमागतः॥ संनिषण्णौ तु तौ दृष्ट्वा सुखासीनौ नृपात्मजौ॥ शतानन्दो मुनि
श्रेष्ठो विश्वामित्रमुवाच ह॥ अपि ते मुनिशार्दूल मम माता तपस्विनी॥ दर्शिता राजपुत्रस्य तपोदीर्घमुपागता॥ अपि मा
ता विमुक्ता मे नस्मा छायाप्रु दारुणात्॥ अपि कौशिक भद्रं ते गुरुणा चापि संगता॥ माता मुनिगणश्रेष्ठ रामसंदर्श
नादनु॥ अपि मे गुरुणा ब्रह्मन्पूजितो पि यथार्हणं॥ इहागतो महातेजाः पूजां स्त्वा महात्मनः॥ तच्छ्रुत्वा वचनं तस्य रामा

वाल्मी-रामा-बाल० शाद्बुधिवलाप्य जगाम मिथिलां तदा॥ विश्वामित्रं पुरस्कृत्य पश्यन्तै शान्दिशस्तथा॥२३॥ ॥इत्यार्षे
॥५४॥ रामायणे बालकांडे अहल्याशापमोक्षणो नाम सर्गः॥४४॥ ॥७॥ ॥ ततः प्रागुत्तरां कृत्वा
दिशं रामः सलक्ष्मणः॥ विश्वामित्रं पुरस्कृत्य यज्ञवाटं ददर्श ह॥ रामस्तु मुनिशार्दूलमुवाच सह लक्ष्मण॥ साध्वी सु
समृद्धोस्य जनकस्य महाक्रतुः॥ बहवः शतसाहस्रा नानादेशनिवासिनो॥ ब्राह्मणानां समेतानां देशभाषा
विचारिणां॥ यज्ञभागाश्च बहवः शकटीशतसंकुलाः॥ देशो विधीयतां ब्रह्मन्यत्र वासुः सुखीभवेत्॥
रामस्य वचनं श्रुत्वा विश्वामित्रो महायशाः॥ निवेशमकरोद्देशे विविक्ते सलिलाश्रिते॥ विश्वामित्रं मुनिं प्राप्तं
जनकः सह मंत्रिभिः॥ शतानंदं पुरस्कृत्य पुरोधसमनिंदितं॥ ऋत्विन्परिवृतस्तूर्णमर्घयामास धर्मवित्॥
विश्वामित्राय धर्मेण ददौ मंत्रपुरस्कृतं॥ प्रतिगृह्य तु तां पूजां जनकस्य महात्मनः॥ पप्रच्छ कुशलं राज्ञो यज्ञे रा
चापि निरामयं॥ तांश्चैव स मुनिः सर्वानुपाध्यायपुरोधसः॥ समागच्छद्यथान्यायं यथाविद्यं यथार्हणं॥ अ ॥५४॥
थ राजा मुनिश्रेष्ठं कृतांजलिरभाषत॥ आसने भगवानास्तां श्रमं नोनु मिहार्हसि॥१॥ जनकस्य वचः
श्रुत्वा निषसाद महामुनिः॥ पुरोहितो द्विजाश्चैव राजा च सह मंत्रिभिः॥ आसने तु यथान्यायमुपवि

ष्टा यथाविधिः॥ दृष्ट्वा नरपतिस्तत्र विश्वामित्रमथाब्रवीत्॥ अद्यायं सफलो यज्ञो महर्षे दैवतैः कृतः॥ अद्य यज्ञफलं कृत्स्नं प्राप्तं
तव संदर्शनान्मया॥ धन्योस्म्यनुगृहीतोस्मि यस्य मे मुनिपुंगव॥ यज्ञावसानं संप्राप्तो ह्य मुनिवरैः सह॥ महर्षे द्वादशाह रा
न्तु शेषमाहुर्मनीषिणः॥ यज्ञभागार्थिनो देवान्द्रष्टुमर्हसि कौशिक॥ इमौ च मुनिशार्दूल कुमारौविवपावकौ॥ काकपक्षधरौ वी
रौ कस्येमौ मुनिपुंगव॥ व्यूढोरस्कौ महाबाहू खड्गतूणधनुर्धरौ॥ अश्विनाविव रूपेण कस्येमौ देववर्चसौ॥ किमर्थं
च मुनिश्रेष्ठ प्रपन्नौ दुर्गमान्पथः॥ बाल्ये व वहितौ ब्रह्मन्श्रोतुमिच्छामि संशयं॥ तस्य तद्वचनं श्रुत्वा जनकस्य महात्म
नः॥ न्यवेदयन्महात्मानौ पुत्रौ दशरथस्य तौ॥ तथागमनमस्मर्थं राक्षसानां च तैर्वधं॥ सिद्धाश्रमनिवासं च विशालस्य
स्य दर्शनं॥२०॥ गौतमाश्रमकार्यं च गौतमस्य च दर्शनं॥ महाधनुषि जिज्ञासां कार्यं चैषां महात्मनां॥ एतत्सर्वं महा
तेजाः कौशिको जनकाय वै॥ निवेद्य विरराम श्रु विश्वामित्रो महामुनिः॥ मुनिमध्ये स्थितः प्रांशो वसुनाभिव पावकः॥
तस्य तद्वचनं श्रुत्वा विश्वामित्रस्य धीमतः॥ हृष्टरोमा महातेजाः क्षणेन समपद्यत॥ गौतमस्य सुतो ज्येष्ठस्तपसा
द्योतितप्रभः॥ रामसंदर्शनं प्राप्य परं विस्मयमागतः॥ सन्निषण्णौ तु तौ दृष्ट्वा सुखासीनौ नृपात्मजौ॥ शतानंदो मुनि
श्रेष्ठो विश्वामित्रमुवाच ह॥ अपि ते मुनिशार्दूल मम माता तपस्विनी॥ दर्शिता राजपुत्रस्य तपोदीर्घमुपागता॥ अपि मा
ता विमुक्ता मे तस्मा छापात्सुदारुणात्॥ अपि कौशिक भद्रं ते गुरुणा चापि संगता॥ माता मुनिगणश्रेष्ठ रामसंदर्श
नादनु॥ अपि मे गुरुणा ब्रह्मन्पूजितोपि यथार्हणं॥ इहागतो महातेजाः पूजां स्त्वा महात्मनः॥ तच्छ्रुत्वा वचनं तस्य राम

नंदस्य धीमतः॥ प्रत्युवाच शतानंदं वाक्यं वाक्यविकोविदः॥ नातिक्रमो मुनिश्रेष्ठ सर्वं मे तन्मया कृतं॥ संगता मुनिना
पत्नी रेणुकेव महात्मना॥ तछ्रुत्वा वचनं तस्य विश्वामित्रस्य धीमतः॥ शतानंदो महातेजा रामं वचनमब्रवीत्॥ स्वागतं
ते नरश्रेष्ठ दिष्ट्याद्दष्टोसि राघवे॥ विश्वामित्रं पुरस्कृत्य तं चाश्रममुपागतः॥ अचिंत्यो घोर धर्मात्मा महर्षिरमित
प्रभः॥ विश्वामित्रो महातेजास्त्वं वाय्यीं परमा गतिः॥ नास्ति धन्यतरो राम त्वमेव भुवि विश्यते। गोप्ता कुशिकपु
त्रसु येन तप्तं महत्तपः॥ श्रूयतामभिधास्यामि कौशिकस्य महात्मनः॥ यथा भूतं यथा वृत्तं तन्मे निगदतः शृणु॥
राजाभूदेष धर्मात्मा दीर्घकालमरिंदमः॥ धर्मज्ञश्च वदान्यश्च प्रजानां च हिते रतः॥ पितामहसुतस्त्वासी
त्कुशो नाम महातपाः॥ कुशस्य पुत्रो बलवान्कुशनाभः सुधार्मिकः॥ कुशनाभसुतस्त्वासीद्गाधिरित्येष वि
श्रुतः॥ गाधेः पुत्रो महानासीद्विश्वामित्रो महामनाः॥ विश्वामित्रस्तु धर्मात्मा पालयन्मेदिनीमिमां॥ बहुव
र्षगणान्राम राजा राज्यमकारयत्॥ कदाचित्तु महातेजा योजयित्वा वरूथिनीं॥ अक्षौहिणीपरिवृतः पर्यग
च्छद्वसुधरां॥ सरितः पर्वतांश्चैव वनानि नगराणि च॥ विचरन्क्रमशो राजा तदागच्छन्महायशाः॥ वसि
ष्ठस्याश्रमपदं नानापुष्पफलद्रुमं॥ नानामृगगणाकीर्णं दिवर्षिगणपूजितं॥ बहुपुष्पफलरम्यं यक्षराक्षस
वर्जितं॥ देवदानवगंधर्वकिन्नरैरुपशोभितं॥ प्रशांतहरिणाकीर्णं नानाविहगनादितं॥ तपश्चरणसंसिद्धै

राव
॥५५॥

रग्निकल्पैर्महात्मभिः॥ सततं श्रीकुलं श्रीमानू ब्रह्मकल्पैर्महात्मभिः॥ अब्भक्षैर्वायुभक्षैश्च शीर्णपर्ण
शिभिस्तथा॥ फलमूलाशनैर्दांतैर्जितरोषैर्जितात्मभिः॥ संप्रक्षाल्यैरम्भकुट्टैः दंतोलूखलिभिस्तथा॥
ऋषिभिर्वालखिल्यैश्च जपहोमपरायणैः॥ वसिष्ठस्याश्रमपदं ब्रह्मस्थानमनुत्तमं॥ अपश्यज्जयतां
श्रेष्ठो विश्वामित्रो महाबलः॥ वातोधृतं तपनवाहसमं नियम्य वल्गावशोन्नतुरगं चतुराशोकशुभ्रो
दिव्यप्रभाभिः करकुंडललोलमानकर्णस्तुरंगमवरान्नृप उत्ततार॥ ४६॥ ॥ इत्यार्षे रामायणे
बालकांडे वसिष्ठाश्रमदर्शनं नाम सर्गः॥ ५१॥ ॥६०॥ ॥ वसिष्ठं तु तदा तस्मि
न्नाश्रमे मुनिसत्तमं॥ दृष्ट्वा तु परमप्रीतो विश्वामित्रो महामनाः॥ प्रणतो विनयाद्वीरो वसिष्ठं जप
तां वरं॥ स्वागतं तव चेत्युक्तो वसिष्ठेन महात्मना॥ आसनं चैव विधिवत्प्रदत्तं जगतीपतेः॥ उपवि
ष्टाय च तदा विश्वामित्राय धीमते॥ दृष्ट्वा वन्यं मुनिवरः फलमूलमुपाहरत्॥ प्रगृह्य च वरां पूजां
वसिष्ठाद्राजसत्तमः॥ तदाग्निहोत्रशिष्येषु पर्यपृच्छदनामयं॥ विश्वामित्रो महातेजा वनस्पति
गणे तथा॥ सर्वत्र कुशलं चोक्तो वसिष्ठो मुनिसत्तमः॥ सुखोपविष्टं राजानं विश्वामित्रं महातपा॥

अपृच्छज्जयतां श्रेष्ठो गाधेयं ब्रह्मणः सुतः ॥ कच्चित्ते कुशलं राजन् कच्चिद्धर्मेण रंजयन् ॥ प्रजाः पालयसे नि
त्यं राजवृत्तेन धार्मिक ॥ कच्चित्ते सुभृता भृत्याः कच्चित्तिष्ठंति शासने ॥ कच्चित्ते विजिताः सर्वे रिपवो रिपुसू
दन ॥ कच्चित्ते कुशलं कोशे मित्रेषु च परंतप ॥ कुशलं ते नरव्याघ्र पुत्रपौत्रेषु नानघ ॥ सर्वत्र कुशलं राज्ये भ के
तः प्रत्युवाच ह ॥१०॥ विश्वामित्रो महातेजा वसिष्ठं विनयान्वितः ॥ कृत्वा तौ सुचिरं कालं बहुहृष्टौ तु सत्कथां ॥
मुदा परमया युक्तौ अभिनंद्य परस्परं ॥ ततो वसिष्ठो भगवान्कथांते मुनिसत्तमः ॥ विश्वामित्रमिदं वाक्य
मुवाच प्रहसन्निव ॥ आतिथ्यं कर्तुमिच्छामि बलस्यास्य महाबल ॥ तव चैवाप्रमेयस्य यथार्हं प्रतिगृ
ह्यतां ॥ सत्कारोहि भवांस्तात मनीछतु मयोद्यतां ॥ राजंस्त्वमतिथि च श्रेष्ठः पूजनीयः प्रयत्नतः ॥ एवमुक्तो
वसिष्ठे विश्वामित्रो महीपतिः ॥ कृतमित्यब्रवीद्राजा प्रजानाथेन मे कृतं ॥ फलमूलेन भगवन्विद्यते य
त्तवाश्रमे ॥ पाद्येनाचमनीयेन भगवद्दर्शनेन च ॥ सर्वथा च महाबाहो पूजार्हेणापि पूजितः ॥ गमि
ष्यामि नमस्तुभ्यं पश्य मैत्रेण – चक्षुषा ॥ एवं ब्रुवंतं राजानं वसिष्ठः पुनरेव च ॥ न्यमंत्रयत धर्मात्मा पुनः
पुनरुदारधीः ॥ बाढमित्येव गाधेयो वसिष्ठं प्रत्यभाषत ॥ यथाप्रियं भगवतस्तथास्तु मुनिसत्तम ॥
एवमुक्तो महातेजाः वसिष्ठो जपतां वरः ॥२०॥ आजुहाव ततः प्रीतः कल्मषां धूतकल्मषः ॥ एह्येहि शब

॥५६॥

ले क्षिप्रं शृणु चैव वचो मम ॥ सबलस्यास्य राजर्षेः कर्तुं व्यवसितोस्म्यहं ॥ भोजनेन महार्हेण सत्कारं त
द्विधत्स्व मे ॥ यस्य यस्य यथाकामः षट्स्वभीष्टरसेष्विह ॥ तत्सर्वं कामधुग्देवि पूरयस्व कृते मम ॥ वरेणा
न्नेन पानेन चोष्यलेह्येन चाद्यमु ॥ राजानं सपरीवारं शबले मत्प्रिये कुरु ॥ यथा सर्वो जनस्तृप्येत्स्वा
शितश्च यथा भवेत् ॥ एवमुक्ता वसिष्ठेन शबला शत्रुसूदन ॥ विदधे कामधुक्कामं यथा यस्येप्सितं तथा ॥
इक्षून्मधूंस्तथा लाजान्मैरेयं च वरासवं ॥ एतानि च महार्हाणि भक्ष्याश्चोच्चावचान्बहून् ॥ शाल्योदनं तु चाय
त्र राशीन्पर्वतसन्निभान् ॥ मृष्टान्नानि तथा सूपान् दधिकुल्यास्तथैव च ॥ नानास्वादुरसानां च षड्रसान
मितस्ततः ॥ भाजनानि सुपूर्णानि गौडानि च सहस्रशः ॥ सर्वमासीत्सुसंतुष्टं हृष्टपुष्टजनायुतं ॥ विश्वामि
त्रबलं राम वसिष्ठेनाभिनंदितं ॥ यस्य यस्य यथाकामं तस्य तस्य तथा तथा ॥३०॥ अभिवर्षति कामांश्च शबलात्र
शत्रुसूदन ॥ एवमस्य बलं सर्वं सर्वकामैः प्रपूजितं ॥ सर्वं तत्रास्य राजर्षेर्हृष्टपुष्टजनायुतं ॥ सांतःपुरः स
हामात्यः परितुष्टो नृपोत्तमः ॥ पौरैः समंत्रिसहितः सभृत्यबलवाहनः ॥ युक्तः परमहर्षेण वसिष्ठमिदमब्रवी
त् ॥ पूजितोहं त्वया ब्रह्मन् पूजनार्हेण कामतः ॥ श्रूयतामभिधास्यामि वाक्यं वाक्यविदांवर ॥ गवां शतस

हस्तेण दीयतां शबलां मम ॥ रत्नं हि भगवन्नेतद्रत्नहारी हि पार्थिवः ॥ तस्मान्मे शबलां देहि ममैषा धर्मतो द्विज ॥
एवमुक्तस्तु भगवान्वसिष्ठो मुनिसत्तमः ॥ विश्वामित्रेण धर्मात्मा प्रत्युवाच महीपतिं ॥ नाहं शतसहस्रेण गवां कोटि
शतैर्गवां ॥ राजन्दास्यामि शबलां राशिभी रजतस्य हि ॥ न परित्यागमर्हेयं मत्सकाशादरिंदम ॥ शाश्वती शबला
मे कीर्तिरात्मवतो यथा ॥ अत्र हव्यं च कव्यं च प्राणयात्रा तथैव मे ॥ आयत्तमग्निहोत्रं च बलिर्होमस्तथैव च ॥ स्वाहा
कारवषट्कारौ विद्याश्च विविधा नृप ॥ आयत्तमत्र राजर्षे सर्वमेतन्न संशयः ॥ सर्वस्वमेव सत्येन मम तुष्टिकरी सदा ॥
वसिष्ठेनैवमुक्तस्तु विश्वामित्रोब्रवीत्ततः ॥ संरब्धतरमत्यर्थं वाक्यं वाक्यविशारदः ॥ हैरण्यकक्ष्याग्रैवेयान्सर्वा
भरणभूषितान् ॥ ददामि कुंजरांस्तुभ्यं सहस्राणि चतुर्दश ॥ हैरण्यानां तथाश्वानां श्वेतानां च चतुर्युजां ॥ द्विं
लक्षणौ रूपपन्नानां किंकिणीजालमालिनां ॥ हयानां देशजातानां कुलजानां महौजसां ॥ सहस्रमेकं दशाच
ददामि तव सुव्रत ॥ नानावर्णविरक्तानां वयस्थानां तथैव च ॥ ददाम्येकां गवां कोटिं दीयतां शबला मम ॥ एवमुक्त
स्तु भगवान्विश्वामित्रेण धीमता ॥ नैव दास्यामि शबलामिति राजानमब्रवीत् ॥ एतदेव हि मे सर्वमेतदेव हि जीवनं ॥
दर्शश्च पौर्णमासश्च यज्ञाश्चैवाप्तदक्षिणाः ॥ एतदेव हि मे राजन्क्रियाश्च विविधास्तथा ॥ एतन्मूलाः क्रियाः सर्वा
मम राजन्न संशयः ॥ ५० ॥ ॥ इत्यार्षे रामायणे बालकांडे धर्मप्रकारो नाम सर्गः ॥ ४६ ॥ ॥ ॥ ॥

॥ कामधेनुं वसिष्ठो हि न तत्याज यदा मुनिः ॥ ततोस्य शबलां राजा विश्वामित्रस्तदाहरत् ॥ नीयमाना तु शबला
राम राज्ञा बलीयसी ॥ ध्यायन्ति चिंतयामास रुदंती शोककर्शिता ॥ परित्यक्ता वसिष्ठेन किमहं सुमहात्मना ॥ याहं
भृत्या राजभृत्यैर्हि ह्रीये परमदुःखिता ॥ किं मया पकृतं तस्य महर्षेर्भावितात्मनः ॥ यन्मामनागसीं साध्वीं भक्तां त्य
जति धार्मिकः ॥ इति सा चिंतयित्वा तु निःश्वस्य च पुनः पुनः ॥ जयर्यौ सा भवेगेन वसिष्ठं प्रति राघव ॥ विधूय तान्
राजभृत्यान्शतशोथ सहस्रशः ॥ जगामानिलवेगा सा पादमूले महात्मनः ॥ गत्वाथ रुदती शोकादिदं
वचनमब्रवीत् ॥ शोकसंतप्तहृदया स्वसायइदं सुदुःखिता ॥ किं मया पकृतं ब्रह्मन्नत्वपि धर्मभृतांवर ॥ यन्मा
मनागसीं शिष्टां भक्तां त्यजसि धार्मिक ॥ श्रुत्वा तु शबला वाक्यं वसिष्ठश्चैवमब्रवीत् ॥ नहि त्यजामि
शबले न हि मे पकृतं त्वया ॥ एष त्वां नयते राजा बलान्मम महाबलः ॥ नहि तुल्यं बलं भद्रे राज्ञोविषे
महाबलः ॥ १० ॥ बली राजा क्षत्रियश्च पृथिव्याः पतिरेव च ॥ इयमक्षौहिणी पूर्णा गजवाजिरथाकुला ॥
पत्तिध्वजनरोगैश्च यथैष बलवत्तरः ॥ विश्वामित्रो महावीर्य स्तेजस्तु च दुरासदः ॥ एवमुक्ता वसिष्ठेन प्र
त्युवाच विनीतवत् ॥ वचनं वचनज्ञा सा ब्रह्मर्षिममितप्रभं ॥ न बलं क्षत्रियस्याहुर्ब्राह्मणो बलवत्तरः ॥
ब्रह्मन्ब्रह्मबलं दिव्यं क्षत्रात्तु बलवत्तरं ॥ अप्रमेयं बलं ते स्मिन्नायं हि बलवत्तरः ॥ नियुंक्ष्व मां महातेज

स्त्वं ब्रह्मबलसंवृतः ॥ बलं दर्पं च यावद्धि नाशयामि दुरात्मनः ॥ एवमुक्तस्तया राम वसिष्ठः सुमहातपाः ॥ सृज
स्वेमिति होवाच बलं परबलार्दनं ॥ तस्या हुंभारवोद्भूताः पह्लवाः शतशस्तदा ॥ नाशयन्ति बलं सर्वं विश्वामित्र
स्य पश्यतः ॥ यवनाश्च सकंबोजाः बाल्हिका दरदास्तथा ॥ राजा च परमायत्तः क्रोधपर्याकुलेक्षणः ॥ बलवाना
यनं नाशीराशस्त्रैरुच्चावचैस्तथा ॥ विश्वामित्रो हतान्दृष्ट्वा पह्लवान्शतशस्तदा ॥ भय एवासृजद्घोरान्शका
न्यवनमिश्रितान् ॥ २० ॥ तैरासीत्संवृता सर्वा शकैर्यवनमिश्रितैः ॥ प्रभावद्भिर्महावीर्यैः पद्मकिंजल्क
सन्निभैः ॥ दीर्घासिपट्टिशधरैर्हेमवर्णैरिवावृता ॥ शैलस्छेर्विकृताकारैर्भीमवेगपराक्रमैः ॥ निर्द
ग्धं तद्बलं सर्वं प्रदीप्तैरिव पावकैः ॥ अथास्त्राणि महातेजा विश्वामित्रो ह्यवासृजत् ॥ एषां विसृजमा
णानां वस्ये दपितामक्रतुः ॥ ततस्तानाकुलान्दृष्ट्वा विश्वामित्रास्त्रमोहितान् ॥ वसिष्ठो नोदया
मास त्वं धेनो सृज योधिनः ॥ तस्या हुंभारवाज्जाताः कांबोजा रविसन्निभाः ॥ हृदयादभिसंजाता
कीबोजाः शस्त्रपाणयः ॥ योनिदेशाच्च यवनाः शकृत्स्छाना तथा शकाः ॥ म्लेच्छाश्च रोमकूपेभ्यस्तुषा
राः सकिरातकाः ॥ ततो निषूदितं सैन्यं विश्वामित्रस्य तत्क्षणात् ॥ सपदातिगजं साश्वं सरथं रघुनंद
न ॥ दृष्ट्वा निषूदितं सैन्यं वसिष्ठेन महात्मना ॥ विश्वामित्रसुतानां च शतं नानायुधायुधं ॥

अभ्यधावत्सुसंक्रुद्धं वसिष्ठं जपतां वरं ॥ हुंकारेणैव तान्सर्वान्निर्ददाह महामुनिः ॥ गजाश्वरथ
पादाता वसिष्ठेन महात्मना ॥ भस्मीकृता मुहूर्तेन विश्वामित्रसुतास्तथा ॥ दृष्ट्वा विनाशितान्पुत्रान्ब
लं च सुमहद्बलं ॥ सव्रीडश्चिंतयानश्च विश्वामित्रोऽभवत्तदा ॥ समुद्र इव निर्वेगो भग्नदंष्ट्र इवोरगः ॥
उपरक्त इवादित्यः सद्यो निष्प्रभतां गतः ॥ हतपुत्रबलो दीनो लूनपक्ष इव द्विजः ॥ हतामात्यो हतोत्साहो
निर्वेदं समपद्यत ॥ पुत्रमेकं तु राज्ये च नियुज्य परिपाल्यतां ॥ पृथिवीमिति महातेजा वनमेवान्वपद्यत ॥
गत्वा हिमवतः पार्श्वं किंनरैरुपशोभितं ॥ देवानां हि प्रसादार्थं मतप्यत महत्तपः ॥ उर्ध्वबाहुः स राजर्षि
पादांगुष्ठाग्रसंस्थितः ॥ अभक्षयद्दर्शशतं वायुमात्रं भुजंगवत् ॥ ततस्तस्य तादृशं दृष्ट्वा ततस्त्रैलोक्य
तापनं ॥ प्रीतात्मा स्वयमेवास्य स्वयंभूर्दर्शनं ययौ ॥ स तं प्रणम्य विधिवद्भगवंतमभाषत ॥ यदि तुष्टो
महादेव धनुर्वेदो ममानघ ॥ सांगोपांगः सोपनिषत्सरहस्यः प्रदीयतां ॥ यानि देवेषु चास्त्राणि दान
वेषु तथर्षिषु ॥ गंधर्वयक्षरक्षस्सु प्रतिभातु च तानि मे ॥ ४० ॥ भवत्प्रसादाद्भवतु देवदेव ममेप्सितं ॥ एव
मस्त्विति देवेशो वाक्यमुक्त्वा दिवं ययौ ॥ प्राप्य चास्त्राणि राजर्षिर्विश्वामित्रो महातपाः ॥ हर्षेण मह

वाल्मी·रामा·बाल·

॥५२॥

नाविष्टो दर्पपूर्णस्तदाभवत्॥ विवर्धमानो वीर्येण समुद्र इव पर्वणि॥ हतमेव तदा ज्ञासीद्वसिष्ठमृषि
सत्तमं॥ आगम्याश्चाश्रमपदं तान्यस्त्राणि ततो सृजत्॥ तैस्तत्तपोवनं सर्वं निर्दग्धमभवत्तदा॥ उ=
दीर्यमाणमस्त्रं तद्विश्वामित्रस्य धीमतः॥ दृष्ट्वा विप्राश्च ते भीतानृषयः शतशस्तदा॥ वसिष्ठस्य च ये
शिष्यास्तथैव मृगपक्षिणः॥ विप्राद्रवंस्ततो द्विग्ना दिशः सर्वे सहस्रशः॥ वसिष्ठस्याश्रमपदं शून्य
मासीन्महात्मनः॥ मुहूर्तं चैव निःशब्दमासीत्तु तमसन्निभं॥ अवदच्च वसिष्ठस्तत्र माभैष्टेति मुहु
र्मुहुः॥ नाशयाम्येष गाधेयं नीहारमिव भास्करः॥ एवमुक्त्वो महातेजा वसिष्ठो जयतां वरः॥ विश्वामि
त्रं तदा वाक्यं सरोषमिदमब्रवीत्॥ आश्रमं चिरसंवृद्धं यद्विनाशितवानसि॥ दुराचारोसि सम्मूढ तस्मात्
न भविष्यसि॥५०॥ इत्युक्त्वा परमक्रुद्धो दंडमुद्यम्य सत्वरः॥ स धूममिव कालाग्निं यमदंडमिवापरं॥५१॥
॥ ॥इत्यार्षे रामायणे बालकांडे वसिष्ठस्य कोपो नाम सर्गः॥५५॥ ॥६९॥ ॥७॥
॥एवमुक्तो वसिष्ठेन विश्वामित्रो महाबलः॥ आग्नेयमस्त्रमुत्क्षिप्य तिष्ठ तिष्ठेति चाब्रवीत्॥ तस्य तद्वचनं
श्रुत्वा वसिष्ठः प्रत्यभाषत॥ स्थितोस्म्येषः क्षत्रनिचय द्बलं तद्विदर्शय॥ नाशयाम्येष ते दर्पमस्त्र
स्याद्य ते गाधिज॥ क्व च क्षात्रं बलं मूढ क्व च ब्राह्मं महद्बलं॥ क्व च ब्राह्मं बलं दिव्यं मम क्षत्रियपांसन॥

राघ

॥५६॥

तब्रास्त्रं गाधिपुत्रस्य घोरमाग्नेयमुत्तमं॥ ब्रह्मदंडहतं शांतमग्नेर्वेग इवांभसा॥ रौद्रं च वारुणं चैवैं
द्रं पाशुपतं तथा॥ अवासृजत्तथैषीकं रुषितो गाधिनंदनः॥ मानसं मानवं चैव गांधर्वं स्वापनं तथा॥ जृंभ
णं मोहनं चैव संतापनविलापनं॥ शोषणं दारुणं चैव वज्रमस्त्रं सुदुर्जयं॥ दंडास्त्रमथ पैशाचं क्रौंचम
स्त्रं तथैव च॥ धर्मचक्रं कालचक्रं विष्णुचक्रं तथैव च॥ ब्रह्मपाशं कालपाशं वारुणं पाशमेव च॥ पिनाक
मस्त्रं दयितं शुष्कार्द्रे चाशनी उभे॥ वायव्यमथनं चैव अस्त्रं हयशिरस्तथा॥ शक्तिद्वयं चासृजत्कंकालं मु
सलं तथा॥६०॥ स्त्वावरं वै महास्त्रं च कालास्त्रमतिदारुणं॥ त्रिशूलास्त्रं च दयितं कपालमथ किंकिणीं॥ ए
तान्यस्त्राणि दिव्यानि विश्वामित्रस्त्ववासृजत्॥ वसिष्ठे प्रेषयामास तदद्भुतमिवाभवत्॥ ब्रह्मदंडेन जे
ग्राह सर्वाणि ब्रह्मणः सुतः॥ शांतेषु तेषु ब्रह्मास्त्रमग्रहीद्गाधिनंदनः॥ तदस्त्रमुद्यतं दृष्ट्वा वसिष्ठो
ग्निपुरोगमाः॥ देवर्षयश्च वित्रस्ता गंधर्वाश्च महोरगाः॥ त्रैलोक्यमासीत्संत्रस्तं ब्रह्मास्त्रे समुदीरिते॥ तं मु
क्तमस्त्रं घोरं तु ब्राह्मं ब्राह्मणतेजसा॥ वसिष्ठो जग्रसे सर्वं ब्रह्मदंडेन राघव॥ ब्रह्मास्त्रं ग्रसमान
स्य वसिष्ठस्य महात्मनः॥ त्रैलोक्यमोहनं रौद्रं रूपमासीत्सुदारुणं॥ सर्वेभ्यो रोमकूपेभ्यो वसिष्ठस्य म

वाल्मी॰ रामा॰ बाल॰
॥६०॥

हालनः॥ मरीचनो विनिष्पेतुः स धूमज्वलनार्चिषः॥ जज्वाल ब्रह्मदंडस्य वसिष्ठस्य करोद्यतः॥ सधूमइव
कालाग्निर्यमदंड इवापरः॥ ततो स्तुवंस्तु ऋषयो वसिष्ठं जयतां वरं॥ अमोघं ते बलं ब्रह्मन्तेजो धारय तेजसा॥
निगृहीतस्त्वया राजा विश्वामित्रो महातपाः॥ २०॥ विश्वामित्रोपि निकृतो विनिःश्वस्येदमब्रवीत्॥ धिग्बलं
क्षत्रियबलं ब्रह्मतेजोमहद्बलं॥ एकेन ब्रह्मदंडेन सर्वास्त्राणि हतानि मे॥ एतद्बलं समीक्ष्याहं सर्वेंद्रियस
माहितः॥ तपो बलं समास्थाय तद्वै ब्रह्मप्रवर्त्तकं॥ एवं स निश्चयं कृत्वा ब्राह्मण्ये धृतमानसः॥ अतप्यत तपो
घोरं विश्वामित्रो महामुनिः॥ विनिःश्वस्य विनिःश्वस्य कृतवैरो महातपाः॥ दक्षिणां तु दिशं गत्वा महिष्या
सह राघव॥ फलमूलाशनो दांतः परमं चाकरोत्तपः॥ अजायंत ततस्तस्य पुत्रा धर्मपरायणाः॥ हविष्यं
दोमहिष्यंदो दृढनेत्रो महोदरः॥ दृढस्य शाम्यतो राज्यं मष्टौ पुत्रा महाबलाः॥ जज्ञिरे राजशार्दूलेर्वी
र्यवंतो महौजसः॥ पूर्णे वर्षसहस्रे तु तपसा द्योतितप्रभे॥ आजगाम ततो द्रष्टुं ब्रह्मलोकात्पितामहः॥ सोब्रवी
न्मधुरं वाक्यं विश्वामित्र तपोधनं॥ जितो राजर्षिलोकस्ते तपसा कुशिकात्मज॥ अनेन तपसा युक्तो राज
र्षिस्त्वं समर्थय॥ एवमुक्त्वा महातेजा जगाम सह दैवतैः॥ त्रिविष्टपाद्ब्रह्मलोकं जगाम प्रभुरव्ययः॥ २०॥
विश्वामित्रस्तु तच्छ्रुत्वा ह्रिया किंचिदवाङ्मुखः॥ दुःखेन महताविष्टः समन्युरिदमब्रवीत्॥ तपश्च सुमहत्तप्तं

राव
॥६०॥

राजर्षिरिति मां विदुः॥ देवाः सर्षिगणाः सर्वे नास्ति मन्ये तपःफलं॥ एवमुक्त्वा महातेजा भूय एव महामुनिः॥ तप
श्चकार काकुत्स्थ परमं परमात्मवान्॥ २३॥ ॥ इत्यार्षे रामायणे बालकांडे विश्वामित्रवैराग्यं नाम सर्गः॥ ॥
॥४८॥ ॥६८॥ ॥ एतस्मिन्नेव काले तु सत्यवादी महायशाः॥ त्रिशंकुर्नाम राजासीदिक्ष्वाकुकुलनंदनः॥
तस्य बुद्धिः समुत्पन्ना यजेयमिति राघव॥ इच्छेयं स्वशरीरेण गंतुं स्वर्गमिति प्रभो॥ वसिष्ठं स समाहूय मंत्रयित्वा
स राघव॥ अशक्यमिति चाप्युक्तो वसिष्ठेन महात्मना॥ प्रत्याख्यातो वसिष्ठेन प्रययौ दक्षिणामुखः॥ वसि
ष्ठा दीर्घतपसस्तपंते यत्र वै तपः॥ त्रिशंकुस्तु महातेजाः शतं संख्यास्तपस्विनः॥ वसिष्ठपुत्रान्ददृशे तप्यमा
नान्महत्तपः॥ सोभिवाद्य महातेजाः सर्वानेव कृतांजलिः॥ कुशलं चाव्ययं चैव पृष्ट्वा चैतान्नामयं॥ अब्रवीत्सुम
हाभाग गुरुपुत्रान्नराधिपः॥ शरणं वः प्रपद्येहं शरण्यान्शरणागतः॥ प्रत्याख्यातो हि भद्रं वो वसिष्ठेन महात्म
ना॥ यष्टुकामो महायज्ञं तन्मेनुज्ञातुमर्हथ॥ गुरुपुत्रानहं सर्वान्नमस्कृत्य पुरोधसः॥ शिरसा प्रणतो
स्त्वा याचे ते तपसि स्थितान्॥ ते मां भवंतः सिद्ध्यर्थं याजयंतु तपोधनाः॥ सशरीरो यथा स्वर्गं यज्ञेन सम
वाप्नुयां॥ १०॥ प्रत्याख्यातो वसिष्ठेन गतिमन्यां तपोधनाः॥ गुरुपुत्रानृते सर्वान्नाहं पश्यामि तत्वतः॥ इ

क्ष्वाकूणां तु सर्वेषां पुरोधः परमा गतिः ॥ तस्मादनंतरं सर्वे भवंतो दैवतं मम ॥ भवद्भिः संपरित्यक्तः प्रति
पत्स्ये गुरोः सुतान् ॥ अन्ये गुरूनुपाशिष्ये यज्ञार्थं कृतमानसः ॥ त्रिशंको र्वचनं श्रुत्वा ततः क्रोधसमन्वितं ॥
ऋषिपुत्रशतं राम राजानमिदमब्रवीत् ॥ प्रत्याख्यातोसि दुर्बुद्धे गुरुणा सत्यवादिना ॥ न चातिक्रमितुं श
क्यं वचनं सत्यवादिनः ॥ अशक्यमिति चोवाच वसिष्ठो भगवानृषिः ॥ तमद्य वयमाहर्तुं कथं शक्ताः क्रतुं
तव ॥ बालिशस्त्वं नरश्रेष्ठ गुरुपुत्रान्यदृछसि ॥ तपोरतो श्चाल्यथितुं गम्यतामिष्टतो नृप ॥ तेषां तद्व
चनं श्रुत्वा स्नेहपर्याकुलाक्षरं ॥ राजा मन्युसमाविष्टो गुरुपुत्रानथाब्रवीत् ॥ प्रत्याख्यातो वसिष्ठेन गुरु
पुत्रैस्तथैव च ॥ अन्यां गतिं गमिष्यामि स्वस्ति वोस्तु तपोधनाः ॥ वसिष्ठपुत्रास्तच्छ्रुत्वा वाक्यं घोराक्षरं
तदा ॥ शेपुस्ते परमक्रुद्धाश्चंडालत्वं भविष्यसि ॥२०॥ इत्येवमुक्त्वा राजानं विविशुस्ते स्वमाश्रमं ॥ अथ रा
त्र्यां व्यतीतायां राजा चंडालदर्शनः ॥ अथो नीलांबरधरो रक्तांबरयचो नरः ॥ विचित्रमाल्याभरण आ
यसाभरणस्तथा ॥ तं दृष्ट्वा मंत्रिणः सर्वे साक्षाच्चंडालतां गतं ॥ दुद्रुवुः स्वपुरं राम पौरा ये चानुयायिनः ॥
अथैक एव राजा स जगाम परमात्मवान् ॥ दह्यमानं दिवारात्रौ विश्वामित्रं तपोधनं ॥ विश्वामित्रस्तु

तं दृष्ट्वा राजानं विफलीकृतं ॥ चंडालरूपिणं घोरं ततः कारुण्यमीक्षिवान् ॥ कारुण्यात्स महातेजा वाक्यं
वाक्यविशारदः ॥ अब्रवीद्धृतलक्ष्मीकं राजानं घोरदर्शनं ॥ किमागमनहेतुस्ते इक्ष्वाकुकुलनंदन ॥ अयोध्या
धिपते वीर शापाच्चंडालतां गतः ॥ अथ तद्वाक्यमाकर्ण्य राजा चंडालदर्शनः ॥ अब्रवीत्प्रांजलिर्वाक्यं वाक्यज्ञो
वाक्यकोविदं ॥ प्रत्याख्यातोस्मि गुरुणा गुरुपुत्रैस्तथैव च ॥ अनवाप्तश्च तं कामं अहं प्राप्तो विपर्ययं ॥ सशरी
रो दिवं यायामिति मे सौम्य दर्शन ॥ मया चेष्टा क्रतुशतं तच्च नप्राप्तवानहं ॥३०॥ अनृतं नोक्तपूर्वं मे न भवि
ष्यं कदाचन ॥ कृच्छ्रेष्वपि गतः सौम्य क्षत्रधर्मेण ते शपे ॥ यज्ञैर्बहुविधैरिष्टं मे प्रजा धर्मेण पालिताः ॥ गुरवश्च
महात्मानो शीलवृत्तेन तोषिताः ॥ धर्मे प्रयतमानानां श्रुभं चाम्बुधिकर्मणां ॥ परितोषं न गच्छंति गुरवो मु
निसत्तम ॥ दैवमत्र परं मन्ये पौरुषं नास्ति कारणं ॥ दैवेनाक्रमते बुद्धिर्दैवं हि परमा गतिः ॥ तस्य मे परमा
र्तस्य प्रसादं मुनिपुंगव ॥ कर्तुमर्हसि भद्रं ते दैवोपहतकर्मणः ॥ नान्यां गतिं गमिष्यामि नान्यच्छरणमस्ति मे ॥
दैवं पुरुषकारेण निवर्तयितुमर्हसि ॥ दावानलोपद्रुतपत्रशाखो यथा तरुर्हर्षमुपैति दृष्ट्वा ॥ वर्षासु मेघं
तडिदुज्वलांगं तथा ऋषिं प्राप्य नृपस्त्रिशंकुः ॥३९॥ ॥ इत्यार्षे रामायणे बालकांडे
त्रिशंकुशापनाम सर्गः ॥४२॥ ॥ उक्तवाक्यं तु राजानं विश्वामित्रो महामुनिः ॥ अ

वाल्मी॰रामा॰बाल॰

॥६२॥

अब्रवीन्मधुरं वाक्यं त्रिशंकोर्हर्षवर्धनं॥ इक्ष्वाको स्वागतं तेस्तु जानामित्वां सुधार्मिकं॥ शरणं ते प्रविष्यामि वसे हंतप
सत्तम॥ अहमामंत्रये सर्वान् ऋषीन् धर्मपरायणान्॥ यज्ञसाहाय्यकरणे ततो यक्ष्यसि निर्वृतः॥ गुरुशापकृतं रू
पं यदिदं त्वयि वर्त्तते॥ अनेनैव च रूपेण सशरीरो गमिष्यसि॥ हस्तप्राप्तमहं मन्ये सर्वं तव नरेश्वर॥ यस्त्वं कौशिक
माज्ञाय शरण्यं शरणं गतः॥ एवमुक्त्वा महातेजा विश्वामित्रो महामनाः॥ शिष्यांश्च सुहृदश्चैव ऋत्विजः सपुरो
धसः॥ अतोदयन्महाप्राज्ञो यज्ञसंभारकारणात्॥ शिष्यांश्च सर्वानाहूय वाक्यज्ञो वाक्यमब्रवीत्॥ गत्वा
मुनिवरान्सर्वान् क्षमानयत सत्वरं॥ यश्चयद्वचनं ब्रूयात्तन्मह्यं ह्यपरिनोदितः॥ तत्सर्वमखिलेनोक्तं स
माख्येयं विजानतं॥ ततस्तद्वचनं श्रुत्वा दिशो जग्मुः पृथक्पृथक्॥ आजग्मुरथ देशेभ्यः सर्वेभ्यो ब्रह्मवा
दिनः॥ ते तु शिष्याः समागम्य मुनिं ज्वलनतेजसं॥१०॥ अब्रुवन्वचनं सर्वे यथोक्तं ब्रह्मवादिभिः॥ श्रुत्वा तद्व
चनं सर्वे समायांति द्विजातयः॥ भगवन्सर्वदेशेभ्यो वर्जयित्वा महोदयं॥ वासिष्ठं च शतं सर्वे शृणु तन्मुनिपुं
गव॥ क्षत्रियो याजको यस्य चंडालस्य विशेषतः॥ कथं सदसि भोक्तारो हविस्तत्र सुरर्षयः॥ ब्राह्मणा हि महा
त्मानो भुक्त्वा चंडालभोजनं॥ कथं स्वर्गं गमिष्यंति विश्वामित्रेण पालिताः॥ एतद्वचननैष्ठुर्यं कृतं रक्तविलोचनैः॥ ॥६२॥
वासिष्ठैर्नरशार्दूल सर्वैः सहमहोदयैः॥ तेषां तद्वचनं श्रुत्वा यथोक्तं मुनिपुंगवः॥ क्रोधसंरक्तनयनः सरो
षमिदमब्रवीत्॥ ये दूषयंत्यदुष्टं मां तप उग्रमुपागतं॥ भस्मीभूता दुरात्मानः कालस्य वशमागताः॥ अद्य ते का

लपाशेन नीता वैवस्वतक्षयं॥ सप्तजातीशताः संतु मृतपाः संतु सर्वशः॥ श्वमांसनियताहाराः पुष्कसानांमनि
र्घृणाः॥ विकृताश्च विरूपाश्च लोकाननु चरंत्विति॥ दूषितः सर्वलोकेषु निषाद इति विश्रुतः॥ प्राणातिपातनिर
तो निरनुक्रोशतां गतः॥२०॥ दीर्घकालं मम क्रोधाद्दुर्गतिं वर्त्तयिष्यति॥ एतावदुक्त्वा वचनं विश्वामित्रो महात
पाः॥ विरराम महातेजा मुनिमध्ये महामतिः॥ स क्रोधविषमुत्सृज्य गाधिजो रघुनंदन॥ तपोबलहतान्
कृत्वा वासिष्ठान्स महोदयान्॥ ऋषिमध्ये महातेजा विश्वामित्रोऽभ्यभाषत॥ अयमिक्ष्वाकुदायादस्त्रि
शंकुरिति विश्रुतः॥ धर्मज्ञश्च कृतज्ञश्च मां चैव शरणं गतः॥ स्वेनानेन शरीरेण स्वर्गलोकं जिगीषति॥
अथेनाभ्याषिते वाक्ये महायज्ञफलैषिणा॥ विश्वामित्रवचः श्रुत्वा सर्व एव महर्षयः॥ ऊचुः समेत्य वच
नं धर्मज्ञा धर्मयंत्रिताः॥ अयं कुशिकदायादो मुनिः परमकोपनः॥ यदाह वचनं सम्यगेतत्कार्यं न संशयः॥
अग्निकल्पो हि भगवान्शापं दास्यति रोषितः॥ तस्मात्प्रवर्त्ततां यज्ञो यथैवोक्तं महर्षिणा॥ क्रियतां च तथा यत्नं स
शरीरो यदा दिवं॥ गच्छेदिक्ष्वाकुदायादो विश्वामित्रस्य तेजसा॥ ततः प्रववृते यज्ञः सर्वांगः सर्वधिष्ठितथ
याजकश्च महायज्ञे विश्वामित्रो महातपाः॥२०॥ ऋत्विजश्चानुपूर्व्येण मंत्रविन्मंत्रकोविदाः॥ चक्रुस्त

हूतं तत्र देवानां दैवसंमिताः ॥ नताजग्मुस्ततस्तत्र भागार्थं सर्वदेवताः ॥ ततः क्रोधसमाविष्टो विश्वामि
त्रो महामुनिः ॥ स्रुवमुद्यम्य सक्रोधस्त्रिशंकुं तं वचो ब्रवीत् ॥ पश्य मे तपसो वीर्यं पूजितस्य नरेश्वर ॥ एष
त्वां सशरीरेण नयामि स्वर्गमोजसा ॥ बाल्यात्प्रभृति यद्धोस्ति किंचिन्मे तपसः फलं ॥ तेजसस्तस्य मे
हतः सशरीरो दिवं व्रज ॥ उक्तवाक्ये मुनावेवं सशरीरो नृपस्ततः ॥ स्वर्गं जगाम काकुत्स्थ विप्राणां तत्र प
श्यतां ॥ देवलोकं गतं दृष्ट्वा त्रिशंकुं पाकशासनः ॥ सह सर्वैः सुरगणैरिदं वचनमब्रवीत् ॥ त्रिशंको पत
भूमौ त्वं न त्वं स्वर्गकृतालयः ॥ गुरुशापादभिहतो मूढशीघ्रमवाक्शिराः ॥ एवमुक्तो महेंद्रेण त्रिशं
कुरपतत्पुनः ॥ त्रायस्वेति च विक्रोशन्विश्वामित्रं तपोधने ॥ तस्य तद्वचनं श्रुत्वा पतमानस्य सत्रिणः ॥ क्रो
धमाहारयत्तीव्रं तिष्ठ तिष्ठेति चाब्रवीत् ॥ ऋषिमध्ये च काकुत्स्थ प्रजापतिरिवापरः ॥ ततो दक्षिणमार्गस्था
न्सप्तर्षीनपराजितः ॥ नक्षत्रमालामपरां चासृजत्क्रोधमूर्छितः ॥ दक्षिणां दिशमास्थाय मुनिमध्ये महा
तपाः ॥ सृष्ट्वा नक्षत्रमालां च क्रोधेन कलुषीकृतः ॥ देवानपि च संक्रुद्धः स्रष्टुमेवाकरोन्मतिं ॥ ततः परम
संभ्रांताः सर्षिसंघाः सुरासुराः ॥ विश्वामित्रं महात्मानमूचुः सानुनयं वचः ॥ अयं राजा शुचिः सौम्य गुरु

शापपरीक्षितः ॥ सशरीरो दिवं यातुं नार्हत्येष महायशाः ॥ तासां तु वचनं श्रुत्वा देवतानां महाद्युतिः ॥ अब्रवी
न्मधुरं वाक्यं वाक्यज्ञः सर्वदेवताः ॥ सशरीरस्य भद्रं वः इक्ष्वाकोरमितप्रभाः ॥ आरोहणे प्रतिज्ञा मे नानृतां क
र्तुमर्हथ ॥ स्वर्गोस्तु सशरीरस्य त्रिशंकोर्मदनुग्रहात् ॥ नक्षत्राणि च सर्वाणि वैश्वानरपथाद्बहिः ॥ अर्वाक्शि
रास्त्रिशंकुश्च तिष्ठत्वमरसन्निभः ॥ विश्वामित्रश्च धर्मात्मा सर्वदेवैरभिष्टुतः ॥ ऋषिभिश्च महातेजा बा
ढमित्यब्रवीद्वचः ॥ ततो देवा महात्मानो ऋषयश्च तपोधनाः ॥ विश्वामित्रमवोचंस्ते साधयिष्यामहे ततः ॥
यथागतास्तथा जग्मुर्यज्ञान्तस्मात्तपोधनाः ॥ महान्विमर्दो वृत्तोयं दक्षिणामभितो दिशं ॥ दिशमन्यामि
तो यामस्तत्र स्यामो यत्र वै तपः ॥ ५० ॥ पश्चिमायां विशालायां पुष्करे पुतपोधनाः ॥ सुखं तपश्चरिष्यामः प
रं चित्तं तपोधनं ॥ एवमुक्त्वा महातेजाः पुष्करेषु तपोधनः ॥ तप उग्रं दुराधर्षं तेपे परमदारुणं ॥ एतस्मि
न्नेव काले यो अयोध्याधिपतिर्नृपः ॥ अंबरीष इति ख्यातो यष्टुं समुपचक्रमे ॥ तस्यैव यजमानस्य नरमे
धेन भूपतेः ॥ प्रोक्षितं मंत्रपानीयैः पशुमिंद्रो जहार ह ॥ प्रनष्टे तु पशौ तस्मिन्विप्रा राजानमब्रवीत् ॥
पशुरभ्याहृतो राजन्प्रनष्टस्तव दुर्नयात् ॥ अरक्षितारं राजानं घ्नंति दोषा नरेश्वरं ॥ आनयस्व पशुं शी

हूतं तत्र देवानां देवसंम्मिताः॥ नचाजग्मुस्ततस्तत्र भागार्थं सर्वदेवताः॥ ततः क्रोधसमाविष्टो विश्वामि
त्रो महामुनिः॥ स्रुवमुद्यम्य सक्रोधस्त्रिशंकुं तं वचोऽब्रवीत्॥ पश्य मे तपसो वीर्यं पूजितस्य नरेश्वर॥ एष
त्वां सशरीरेण नयामि स्वर्गमोजसा॥ बाल्यात्प्रभृति यद्यस्ति किंचिन्मे तपसः फलं॥ तेजसस्तस्य मे
हतः सशरीरो दिवं व्रज॥ उक्तवाक्ये मुनावेवं सशरीरो नृपस्ततः॥ स्वर्गं जगाम काकुत्स्थ विप्राणां तत्र प
श्यतां॥ देवलोकगतं दृष्ट्वा त्रिशंकुं पाकशासनः॥ सह सर्वैः सुरगणैरिदं वचनमब्रवीत्॥ त्रिशंको पत
भूमौ त्वं न ते स्वर्गे कृतालयः॥ गुरुशापादभिहतो मूढ शीघ्रमवाक्शिराः॥ एवमुक्तो महेंद्रेण त्रिशं
कुरपतद्दिवि॥ त्रायस्वेति च विक्रोशन्विश्वामित्रं तपोधनं॥ तस्य तद्वचनं श्रुत्वा पतमानस्य सत्रिणः॥ रो
षमाहारयत्तीव्रं तिष्ठ तिष्ठेति चाब्रवीत्॥ ऋषिमध्ये च काकुत्स्थ प्रजापतिरिवापरः॥ ततो दक्षिणमार्गस्था
न्सप्तर्षीनपराजितः॥ नक्षत्रमालामपरां चासृजत्क्रोधमूर्छितः॥ दक्षिणां दिशमास्थाय मुनिमध्ये महा
तपाः॥ सृष्ट्वा नक्षत्रमालां च क्रोधेन कलुषीकृतः॥ देवानपि च संक्रुद्धः स्रष्टुमेवाकरोन्मतिं॥ ततः परम
संभ्रांताः सर्षिसंघाः सुरासुराः॥ विश्वामित्रं महात्मानमूचुः सानुनयं वचः॥ अयं राजा शुचिः सौम्य गुरु

शापपरीक्षितः॥ सशरीरो दिवं यातुं नार्हत्येष महायशाः॥ तासां तु वचनं श्रुत्वा देवतानां महाद्युतिः॥ अब्रवी
न्मधुरं वाक्यं वाक्यज्ञः सर्वदेवताः॥ सशरीरस्य भद्रं वः इक्ष्वाकोरमितप्रभाः॥ आरोहणे प्रतिज्ञा मे नानृतं क
र्तुमर्हथ॥ स्वर्गोऽस्तु सशरीरस्य त्रिशंकोर्मदनुग्रहात्॥ नक्षत्राणि च सर्वाणि वैश्वानरपथाद्बहिः॥ अवाक्शि
रास्त्रिशंकुश्च तिष्ठत्वमरसन्निभः॥ विश्वामित्रस्तु धर्मात्मा सर्वदेवैरभिष्टुतः॥ ऋषिभिश्च महातेजा बा
ढमित्यब्रवीद्वचः॥ ततो देवा महात्मानो ऋषयश्च तपोधनाः॥ विश्वामित्रमवोचंस्ते साधयिष्यामहे ततः॥
यथागतास्तथा जग्मुर्यज्ञान्तस्मात्तपोधनाः॥ महान्विमर्दो वृत्तोऽयं दक्षिणामभितो दिशं॥ दिशमन्यामि
तो यामस्तस्यामेवात्र वै तपः॥ ५०॥ पश्चिमायां विशालायां पुष्करे सुतपोधनाः॥ सुखं तपश्चरिष्यामः प
रं चिन्नं तपोधनं॥ एवमुक्त्वा महातेजाः पुष्करेषु तपोधनः॥ तप उग्रं दुराधर्षं तेपे परमदारुणं॥ एतस्मि
न्नेव काले तु अयोध्याधिपतिर्नृपः॥ अंबरीष इति ख्यातो यष्टुं समुपचक्रमे॥ तस्यवै यजमानस्य नरमे
धेन भूपतेः॥ प्रोक्षितं मंत्रपानीयैः पशुमिंद्रो जहार ह॥ प्रनष्टे तु पशौ तस्मिन्विप्रो राजानमब्रवीत्॥
पशुरभ्याहृतो राजन्प्रनष्टस्तव दुर्नयात्॥ अरक्षितारं राजानं घ्नंति दोषा नरेश्वर॥ आनयस्व पशुं शी

प्रेमाच कर्मप्रवर्त्तता ॥ उपाध्यायवचः श्रुत्वा इक्ष्वाकुः समितप्रभः ॥ अन्वियेषमहाबाहुः पशुं गोभिः सह
स्त्रशः ॥ देशां जनपदांश्चापि नगराणि वनानि च ॥ आश्रमांश्च महापुण्यान्विप्रेचिन्वन्महायशाः ॥ स
पुत्रैः सहितं तातं सभार्यं रघुनंदन ॥ भृगुतुंगे समासीनं ऋचीकं तं ददर्श ह ॥ अंबरीषो महातेजाः प्रणिपत्या
भिवाद्य च ॥ सर्वत्र कुशलं पृष्ट्वा ऋचीकं तं महामुनिं ॥ २० ॥ उवाच नमहातेजाः प्रणम्यो भि प्रसाद्य च ॥
ब्रह्मर्षिं तपसा दीप्तं राजर्षिरमितप्रभः ॥ भगवन्छरतसहस्रेण दद्यां त्वं यदि मे सुतं ॥ पशोरर्थे कृ
तार्थोस्मि अहं काश्यपसुव्रत ॥ सर्वे परिस्रुता देशा यज्ञियं न लभे पशुं ॥ दातुमर्हसि मूल्येन यावकं मे प्र
वर्त्तते ॥ एवमुक्तो महातेजा ऋचीकस्तमुवाच ह ॥ ऋचीकस्य वच श्रुत्वा तेषां माता महात्मनां ॥ उवाच नर
शार्दूलं तं राजानं महाव्रतं ॥ अविक्रेयं सुतं श्रेष्ठं पिता प्राह महाद्युते ॥ महाप्येवं कनीयांसं शुनकं विधि
सुप्रियं ॥ प्रायेण तु नरश्रेष्ठ ज्येष्ठाः पितृषु वल्लभाः ॥ मातॄणां तु कनीयांसस्तस्माद्रक्ष्यो हि मे सुतः ॥ उक्त
वाक्ये न मुनिना मुनिपत्न्या तथैव च ॥ शुनःशेपो महाप्राज्ञो मध्यमो वाक्यमब्रवीत् ॥ ज्येष्ठः पितुरवि
क्रेयः कनीयान्मातुरेव च ॥ विक्रीतं मध्यमं मन्ये राजपुत्र नयस्व मां ॥ गवां शतसहस्रेण शुनःशेपं

नरेश्वरः ॥ गृहीत्वा परमप्रीतो जगाम रघुनंदन ॥ अंबरीषस्तु राजर्षिः रथमारोप्य सत्वरः ॥ शुनःशेपं
महातेजाः जगाम च यथागतं ॥ स्वयज्ञसदनं प्राप्तः पुष्करे वा समागमत् ॥ ७१ ॥ ॥ इत्यार्षे रामायणे बाल
कांडे सर्गः ॥ ५९ ॥ ॥ ६७ ॥ ॥ शुनःशेपं नरश्रेष्ठो गृहीत्वाथ महाबलः ॥ विश्रम्य पुष्करे राम म
ध्याह्ने रघुनंदन ॥ तस्य विश्रमतस्तत्र शुनःशेपो महातपाः ॥ पुष्करे ज्येष्ठमागम्य विश्वामित्रं ददर्श ह ॥
विघूर्णमाणहृदयो लज्जया श्रमणेन च ॥ पपातांके पुनस्तत्र वचनं चेदमब्रवीत् ॥ न मेस्ति माता नापि
ता न ज्ञातिर्न च बांधवः ॥ त्रातुमर्हसि मां सौम्य तस्मात्त्वं मुनिपुंगव ॥ त्राता त्वं हि मुनिश्रेष्ठ पितेव मम
सुव्रत ॥ राजा च कृतकृत्यः स्याद्दर्शयज्ञफलार्जितं ॥ स्वर्गलोके तथाश्नीयात्तव सौम्य निदर्शनात् ॥
ममनाथोह्य नाथस्य भव व्यसनतेजसः ॥ पितेव पुत्रं धर्मात्मंस्त्रातुमर्हसि किल्बिषात् ॥ तस्य तद्वचनं
श्रुत्वा विश्वामित्रो महातपाः ॥ सांत्वयित्वा बहुविधं पुत्रानिदमुवाच ह ॥ यत्कृते पितरः पुत्राञ्जनयं
ति शुभार्थिनः ॥ परलोकहितार्थाय तस्य कालोयमागतः ॥ अयं मुनिसुतो बालो मत्तः शरणमिच्छति
अस्य जीवनदानेन प्रियं कुरुत पुत्रकाः ॥ सर्वे सुकृतकल्याणाः सर्वे धर्मपरायणाः ॥ १० ॥ पशुत्वे राजसि
हस्य तु प्तिमग्नेः प्रयच्छथ ॥ नाथवांश्च शुनःशेपो यज्ञो चाविघ्नतो भवेत् ॥ देवतास्तर्पिताश्चास्तु मम सत्याच्च व

वाल्मी॰रामा॰
॥६५॥

चः कृतं ॥ मुनेस्तद्वचनं श्रुत्वा मधुछंदादयः सुताः ॥ साभिमानं मुनिश्रेष्ठं सबीजमिदमब्रवीत् ॥
कथमात्मसुतांस्त्यक्त्वा त्रायसेन्यसुतं प्रभो ॥ अकार्यमेतत्पश्यामः श्वमांसस्येव भोजने ॥ तेषां तद्वचनं
श्रुत्वा सुतानां मुनिपुंगवः ॥ क्रोधसंरक्तनयनो व्याहर्तुमुपचक्रमे ॥ निःसाध्वसमिदं वाक्यं धर्म
तोभिहितं मया ॥ श्वमांसमिति यत्प्रोक्तं दारुणं लोमहर्षणं ॥ अथाब्रवीच्छुनःशेफं कृत्वा रक्षां
निरामयां ॥ पवित्रपाशैराबद्धो रक्तमाल्यानुलेपनः ॥ वैष्णवं रूपमासाद्य ध्यायन्नग्निं मनसा मुकुं ॥
इमे च गाथे द्वे योगी गायेस्त्वं मुनिपुत्रक ॥ अंबरीषस्य यज्ञेस्मिंस्ततः सिद्धिमवाप्स्यसे ॥ शुनःशेफ
श्च ते गृह्य ते गाथे समाहितः ॥ त्वरया राजसिंहं तं अंबरीषमुवाच ह ॥ २० ॥ राजसिंह नरश्रेष्ठ
गच्छ शीघ्रमतः परं ॥ निवर्त्तये मया सौम्य अविघ्नेन मया क्रतुं ॥ तद्वाक्यमृषिपुत्रस्य श्रुत्वा हर्षसमु
त्सुकः ॥ जगाम नृपतिः शीघ्रं यज्ञवाटमतंद्रितः ॥ सदस्यानुमतो राजा पवित्रीकृतलक्षणः ॥
ष्टौ वं रक्तांबरं ध्वस्तं कृत्वा यूपमूले नियोजयेतं स बद्धो वाग्भिरग्र्याभिरभिष्टु
त्यमहौजसं ॥ इंद्रमिंद्रानुगं चैव यथावन्मुनिपुंगवः ॥ ततः प्रीतः सहस्राक्षस्त ॥६५॥

स्य श्रुतिभिरीडितः ॥ दीर्घमायुस्तदा प्रादाच्छुनःशेफाय राघव ॥ स च राजा नरश्रेष्ठस्तस्य लब्ध
वान् ॥ फलं बहुगुणं राम सहस्राक्षप्रसादजं ॥ विश्वामित्रोपि धर्मात्मा तपत्वा सुमहत्तपः ॥ उ
ग्रं परमनाधृष्यं ब्राह्मण्ये कृतमानसः ॥ सहस्रैः शरदामेकं पुष्करेषु तदानघ ॥ २८ ॥ ॥
॥ ॥ इत्यार्षे रामायणे बालकांडे सर्गः ॥ ६१ ॥ ॥ ६० ॥ ॥ पूर्णे वर्षसहस्रे तु व्रतस्नातं
तं महामुनिं ॥ अभ्यागच्छन्सुराः सर्वे तपोबलविस्मिताः ॥ अब्रवीच्च महातेजाः ब्रह्मा सुरुचि
रं वचः ॥ ऋषिस्त्वमसि भद्रं ते स्वार्जितैः कर्मभिः शुभैः ॥ एवमुक्त्वा देवेशस्त्रिदिवं पुनरभ्यगात् ॥
विश्वामित्रोपि धर्मात्मा तपः परमतप्यत ॥ ततः कालस्य महतो मेनकाख्या नाम याप्सराः ॥ पुष्करेषु नरश्रेष्ठ
स्नातुं समुपचक्रमे ॥ तामपश्यन्महातेजाः मेनकां कुशिकात्मजः ॥ रूपेणाप्रतिमां राम राजमेघे मिव विद्युतं ॥ कणत्क
नककेयूरनादापूरितदिङ्मुखं ॥ कंदर्पदर्पवशगो मुनिस्तामिदमब्रवीत् ॥ मेनके स्वागतं तेस्तु वसेहाश्रमया स
ह ॥ अनुगृहीष्व मां भद्रे मदनेन प्रमोहितं ॥ इत्येवमुक्ता कुशिकात्मजेन सा मेनका राममनोरमांगी ॥ तत्रावस
त्तस्य वचोनुरोधात्कंदर्पभार्येव मनोभवेन ॥ १८ ॥ ॥ इत्यार्षे रामायणे बालकांडे सर्गः ॥ ५२ ॥ ॥ ६२ ॥

वाल्मी॰रामा॰ बाल॰ ॥६६॥

इत्युक्त्वा सा वरारोहा तत्रावासमगात्तदा ॥ तपसस्तु महाविघ्नो विश्वामित्रमुपागमत् ॥ तस्यां वसन्त्यां वर्षा
णि पंच पंच च राघव ॥ विश्वामित्राश्रमे रम्ये सम्यक्व्यरिचारह ॥ मुनेस्तु बुधिरुत्पन्ना सामर्षा रघु
नंदन ॥ विघ्नोयं देवविहितस्तपसो मम महान्ध्रुवं ॥ अथ काले गते तस्मिन्विश्वामित्रो महामुनिः ॥ सं
त्रस्तहृदयस्तत्र चिंताशोकसमन्वितः ॥ सर्वं सुराणां च कर्मेदं तपोपहरणं मम ॥ अहोरात्रापदेशेन
गताः संवत्सरा दश ॥ काममोहाभिभूतस्य विघ्नोयं प्रत्युपस्थितः ॥ स निश्वस्य मुनिश्रेष्ठो पश्चात्तापे
न दुःखितः ॥ भीतामप्सरसं दृष्ट्वा वेपमानां कृतांजलिं ॥ मेनकां मधुरैर्वाक्यैर्विसृज्य कुशिकात्मजः ॥
उत्तरं पर्वतं राम विश्वामित्रो भ्यगात्पुनः ॥ कृत्वा सुनिश्चितां बुधिं कामजेतुं महायशाः ॥ कौशिकी
तीरमासाद्य तपोतपत दारुणं ॥ तस्मिन्वर्ष सहस्रं तु तथमाने महत्तपः ॥ उत्तरे पर्वते राम देवानाम
भवद्भयं ॥ तेमंत्रयंतः सहिताः सर्षिसंघाः सुरासुराः ॥१०॥ महर्षिशब्दं लभतां साध्वयं कौशिका
त्मजः ॥ देवतानां वचः श्रुत्वा सर्वलोकपितामहः ॥ अब्रवीन्मधुरं वाक्यं विश्वामित्रं महामुनिं ॥ महर्षे
स्वस्ति ते वत्स तपसोग्रेण कर्शितः ॥ महर्षित्वं दुरावापं ददामि ते सुव्रत ॥ पितामह वचः श्रुत्वा विश्वा

राव ॥६६॥

मित्रस्तपोधनः ॥ प्रांजलिः प्रयतो भूत्वा विश्वामित्रस्ततो ब्रवीत् ॥ महर्षिशब्दमतुलं तपोबलसमन्वि
तं ॥ यदि मे भगवानाह ततोस्मि विजितेंद्रियः ॥ तमुवाच ततो ब्रह्मा न तावत्त्वं जितेंद्रियः ॥ इंद्रियाणि
जयेत्युक्त्वा जगाम त्रिदिवं पुनः ॥ यतस्वेति मुनिश्रेष्ठमुक्तवांस्त्वं दिवं व्रजन् ॥ विप्रस्थितेषु देवेषु विश्वा
मित्रो महामुनिः ॥ उर्ध्वबाहुर्निरालंबो वायुभक्षस्तपोभवत् ॥ ग्रीष्मे पंचतपा भूत्वा वर्षास्वाकाशगोभवे
त् ॥ सलिले शिशिरे सर्वं अहोरात्राणि सर्वशः ॥ एवं वर्षसहस्रेण तपोतप्यत दारुणं ॥ तत्तपसि संरक्ते
विश्वामित्रे महामुनौ ॥ संभ्रमः सुमहानासीत्सुराणां वासवस्य च ॥ रंभामप्सरसं शक्रः सह सर्वै
र्मरुद्गणैः ॥२०॥ स उवाच हितं वाक्यं अहितं कौशिकस्य च ॥ ॥ इत्यार्षे रामायणे बालकांडे सर्गः ॥५३॥
॥ ॥छ॥ ॥ वरारोहे गुणैः सर्वैरप्सरोभिर्विशिष्यते ॥ सुरकार्यमिदं रम्यं कर्तव्यं सुहृदं त्वया ॥ प्र
लोभ्य कौशिकं भद्रे कामक्रोधवशं नय ॥ तथोक्ता साप्सरा राम सहस्राक्षेण धीमता ॥ व्रीडिता प्रां
जलिर्भूत्वा प्रत्युवाच सुरेश्वरं ॥ अयं सुरपते क्रोधी विश्वामित्रो महाद्युतिः ॥ शापमुत्स्रक्ष्यति
मयि देव नानाभयप्रदः ॥ ततो पि भगवन्साधु प्रसादं कर्तुमर्हसि ॥ न मे साधयितव्यानि तेजांसि

वाल्मी· रामा· बाल·
॥६७॥

जनपांसि च ॥ तामुवाच सहस्राक्षो वेपमानां कृतांजलिं ॥ रंभे माभून्न वभयं कुरुष्व वचनं मम ॥ कोकि
लो हृदयग्राही माधवे रुचिरे ऋतौ ॥ अहं कंदर्पसहितस्थाना तव समीपतः ॥ त्वं च रूपं बहुगुणं कृत्वा
परमभास्वरं ॥ तमृषिं कौशिकं भद्रे मोहनार्थमुपाह्वय ॥ श्रुत्वा तु वचनं तस्य रूपमप्रतिमं शुचि ॥ कृत्वा ब
हुविधं रंभा विश्वामित्रमुपाह्वयत् ॥ कोकिलस्य च संश्रुत्य वल्गु व्याहरतः स्वनं ॥ संप्रहृष्टेन मनसा विश्वा
मित्रोऽभ्यवैक्षत ॥ रंभा गीतस्वनं चैव मधुरं सुमनोहरं ॥ मारुतं च सुखस्पर्शं दिव्यगंधाधिवासितं ॥ आयातं
समभिप्रेक्ष्य कामिनीमदवर्धनं ॥ सहसा कृतचित्तात्मा मदनेन महामुनिः ॥ अथ तस्याः सुराद्रेन गी
तेनाप्रतिमेन सः ॥ दर्शनेन च रंभाया मुनिः संमोहमागमत् ॥ सहस्राक्षस्य तत्कर्म विज्ञाय मुनिपुंगवः ॥
यस्माल्लोभयसे रंभे कामक्रोधजयैषिणं ॥ दशवर्षसहस्राणि शैले स्थास्यसि दुर्भगे ॥ ब्राह्मणा हि महात्मान
स्तपोबलसमन्विताः ॥ उद्धरिष्यंति रंभे त्वां मत्क्रोधकलुषीकृतां ॥ एवमुक्त्वा महातेजा विश्वामित्रो महामुनिः ॥ राम ॥६७॥
अशक्नुवन्धारयितुं क्रोधसंतापमागतः ॥ तस्य चिंताभ्युपेतस्य रंभा वै शैलमागता ॥ व्रीडितश्चापि कंदर्पो
ययावाशु यथागतं ॥ क्रोधेन च महातेजास्तपसो हरणं कृतं ॥ इंद्रियैरजितै राम न लेभे शांतिमात्मनः ॥
अथ हैमवतीं राम दिशं त्यक्त्वा महामुनिः ॥ पूर्वां दिशमुपाक्रम्य तपस्तेपे सुदारुणं ॥ तां दृष्ट्वा शापसंयु कौरं

क्तां शैलमयीं कृतां ॥ २० ॥ अभ्यागच्छन्मुनिश्रेष्ठं तं तपोहरणे कृते ॥ नैव कोपं करिष्यामि न च भोक्ष्येपि सां
प्रतं ॥ अथवा श्वासयिष्यामि संवत्सरशतान्बहून् ॥ स्वयं चैशोषयिष्यामि स्वमात्मानं यतेंद्रियः ॥ तावद्या
वद्धि मे प्राप्तं ब्राह्मण्यं महदूर्जितं ॥ अनुच्छ्वसन्नभुंजन्वै तिष्ठेयं शाश्वतीः समाः ॥ नहि मे तप्यमानस्य क्ष
यं यास्यंति वासवः ॥ मौनं वर्षसहस्राय कृत्वा मनसि सुस्थिरं ॥ अकरोदप्रतिसमां प्रतिज्ञां रघुनंदन ॥ स्था
णुभूतो निरालंबः क्रोधमात्सर्यवर्जितः ॥ पूर्णे वर्षसहस्रे तु काष्ठभूतं महामुनिं ॥ विघ्नैश्च बहुभिर्धूत
कोपानंतरमाविशत् ॥ गत्वा च परमं हर्षं तप ओतिष्ठदुत्तमं ॥ अथ वर्षसहस्रेण व्रतदीक्षण आगते ॥ इंद्रो
द्विजाभिर्भूत्वैवं यथासिद्धमयाचत ॥ निःशेषमन्नं भगवान्न भुक्तं च महातपाः ॥ तथैव मौनमकरोदनुच्छ्वासं
च राघव ॥ अथ वर्षसहस्रेण निरुच्छ्वासोऽभवन्मुनिः ॥ निरुच्छ्वासान्मुनेस्तस्य मूर्ध्नि धूमो व्यजायत ॥ त्रै
लोक्यं येन संभ्रांतमादीपितमिवाभवत् ॥ २० ॥ ततो देवर्षिगंधर्वाः पन्नगासुरराक्षसाः ॥ मोहितास्तेजसेवा
संस्तपसा मंदरश्मयः ॥ कश्मलोपहताः सर्वे पितामहमथाब्रुवन् ॥ बहुभिः कारणैर्देव विश्वामित्रो महा
मुनिः ॥ लोभितः क्रोधितश्चैव तपसाभिविवर्धते ॥ नह्यस्य वृजिनं किंचिद्दृश्यते सूक्ष्ममप्यथा ॥ नदी
यते यदा तस्मै मनसोऽभियदीप्सितं ॥ नाशयिष्यति लोकांस्त्रीनेषः सचराचरं ॥ व्याकुलाश्च दिशः

वाल्मी॰रामा॰बाल॰ ॥६८॥

सर्वान चल्पर्यः प्रकाशते॥ सागराः क्षुभिताश्चैव विदीर्यन्ते च पर्वताः॥ प्रकंपते च पृथिवी वायुर्वातिभृशं त
तः॥ देवविप्रान्न भजते नास्तिको जायते नरः॥ त्रैलोक्यमपि संमूढं संप्रक्षुभितमानसं॥ बुद्धिं न कुरुते दे
व यावदेष जगत्क्षये॥ नाकल्पसादं भगवानग्निरूपो महाद्युतिः॥ कालाग्निरिव निश्चेष्टस्त्रैलोक्यं प्रदहेद
यं॥ देवराज्यं किकीर्षे द्वा दीयतामस्य यद्धितं॥ ततः सुरगणाः सर्वे पितामहपुरोगमाः॥ विश्वामित्रं महा
त्मानमूचुः सानुनयं वचः॥ महर्षे स्वागतं ते स्तु धोतपसास्म सुतोषिताः॥४०॥ ब्राह्मण्यं तपसोग्रेण प्राप्त
वानसि कौशिक॥ स्वस्ति प्राप्नुहि भद्रं ते गच्छ सौख्यं यथासुखं॥ पितामहवचः श्रुत्वा सर्वेषांच दिवौकसां॥
कृत्वा प्रणामं विधिवद्व्याहरन्ता महामुनिः॥ ओंकारः स वषट्कारो वेदाश्चायातु सर्वशः॥ क्षत्रवेदविदां श्रे
ष्ठ ब्रह्मवेदविदामपि॥ ब्राह्मण्यं यदि मे प्राप्तं दीर्घमायुस्तथैव च॥ यदर्थं पूर्व ते कामो गमिष्यामि सुरर्षभाः॥
ब्रह्मपुत्रो वसिष्ठो यमेवमेव ब्रवीतु मा॥ ततः प्रसादयं ते देवा विश्वामित्रमथाब्रुवन्॥५ महर्षिस्त्वं न संदेहः
सर्वं संपत्स्यते तव॥ इत्युक्त्वा देवताः सर्वा जग्मुस्त्रिभुवनं तदा॥ सख्यं चकार ब्रह्मर्षिरेवमस्त्विति चाब्रवी ॥६८॥
त्॥ अपूजयत्ब्रह्मर्षिं वसिष्ठं जयतां वरं॥ ब्राह्मण्यमेवमेतेन प्राप्तं राम महात्मना॥ विश्वामित्रोपि ध

र्मात्मा लब्ध्वा ब्राह्मण्यमुत्तमं॥ कृत्स्नकायो महीं सर्वां चचार तपसि स्थितः॥ एष धर्मपरो नित्यं वीर्यस्य च परायणं॥ एष सत्येद
मेशौचे वेदेस्वपरिनिष्ठितः॥ इत्युक्त्वा वचशातानंदो रामलक्ष्मणसन्निधौ॥५०॥ ॥इत्यार्षे रामायणे बालकांडे विश्वामित्रब्रा
५५ ह्मण्यलाभो नाम सर्गः॥५४॥ ॥६७॥ ॥ततः कथांते वाक्यज्ञो वाक्यं मधुरमब्रवीत्॥ अपूजयच्छतानंदं कौशिकः सा
धु साध्विति॥ जनकः प्रांजलिर्भूत्वा विश्वामित्रमथाब्रवीत्॥ धन्योस्म्यनुगृहीतोस्मि यस्य मे मुनिपुंगव॥ यज्ञं काकुत्स्थ
सहितः प्राप्तवानसि धार्मिक॥ सहितो द्विजमुख्यैश्च बहुभिः सुमहायशाः॥ पावितोहं त्वया ब्रह्मन्दर्शनेन महामुने॥
गुणा बहुविधाः प्राप्तास्तव संदर्शनान्मया॥ विप्रभावं च ते ब्रह्मन्कीर्त्यमानं मया श्रुतं॥ श्रुतं भूरि मया चाद्य रामेण च
महात्मना॥ सदस्यैः प्राप्य च सदः श्रुतास्ते बहवो गुणाः॥ अप्रमेयं च ते रूपमप्रमेयं च ते बलं॥ अप्रमेयपुण्याश्चैव नित्यं ते
पुरुषर्षभ॥ न तृप्तिराश्चर्यतमाभिः कथाभिर्नास्ति मे विभो॥ कर्मकाले नरश्रेष्ठ लंबते रविमंडलं॥ श्वः प्रभाते नरश्रेष्ठ द्रष्टुमर्ह
स्यहं पुनः॥ गतार्हं जयतां श्रेष्ठ मामनुज्ञातुमर्हसि॥ एवमुक्तो मुनिवरः प्रशस्य पुरुषर्षभं॥ विससर्जाशु जनकं प्रीतः
प्रीतमनास्तदा॥ पूजितो मुनिना तेन वैदेहो मिथिलाधिपः॥१०॥ प्रदक्षिणं तमकरोत्सोपाध्यायः सबांधवः॥ विश्वामित्रोपि
धर्मात्मा सरामः सहलक्ष्मणः॥ स्ववाटमभिचक्राम पूज्यमानो महर्षिभिः॥ ततो जगाम स्वगृहं स राजा सहर्षचित्तो मुनिम
र्चयित्वा॥ स नद्धियोगं थयितो महर्षिः कृत्स्नां रात्रिं गमयां बभूव॥१२॥ ॥इत्यार्षे रामायणे बालकांडे विश्वामित्रचरितं नाम सर्गः॥
॥५५॥ ॥५२॥ ॥

वाल्मी॰रामा॰बाल॰ ॥ ६६ ॥

ततः प्रभाते विमले कृतकर्मा नराधिपः ॥ विश्वामित्रं महात्मानमाजुहाव सराघवं ॥ तमर्चयित्वा धर्मात्मा शास्त्रदृष्टेन
कर्मणा ॥ राघवौ च महात्मानौ ततो वाक्यमुवाच ह ॥ भगवन्स्वागतं तेस्तु किं करोमि महामुने ॥ भवानाज्ञापयतु मामाज्ञाप्यो भ
वतो ह्यहं ॥ एवमुक्तस्तु धर्मात्मा जनकेन महात्मना ॥ प्रत्युवाच मुनिर्धीरो वाक्यं वाक्यविदां वरं ॥ पुत्रौ दशरथस्येमौ क्षत्रि
यौ लोकविश्रुतौ ॥ द्रष्टुकामौ धनुर्दिव्यं यदेतत्त्वयि तिष्ठति ॥ एतद्दर्शय भद्रं ते कृतकामौ नृपात्मजौ ॥ दर्शनादस्य धनुषो
यथेष्टं प्रतियास्यतः ॥ एवमुक्तस्तु जनकः प्रत्युवाच महामुनिं ॥ श्रूयतां धनुषस्तत्त्वं यदर्थं चेह तिष्ठति ॥ देवरात इति
ख्यातो निमिषगबले मम ॥ ततो नृपतयो भीता मथ्यमानाय युर्दिशः ॥ अवीर्या वीर्यसंदिग्धाः निःसत्त्वा पापकारिणः ॥
तदेतन्मुनिशार्दूल धनुः परमभास्वरं ॥ यदि त्वारोपणं कुर्या द्रामोस्य धनुषः स्वयं ॥ सुतामयोनिजां सीतां दद्यां दश
रथेः स्नुषां ॥ १० ॥ यो रुषे ह्यपि रूपो हि शंखक्षीरमिवार्पितं ॥ जनकस्य वचः श्रुत्वा विश्वामित्रो महामुनिः ॥ धनुर्दर्श
य रामाय तदिति प्राब्रवीन्नृपं ॥ सुरोपमस्तु जनकः सामात्यान्व्यादिदेश ह ॥ धनुरानीयतां दिव्यं रामलक्ष्मणयोरिति ॥ ग्रंथ ॥ ६६ ॥
यत्न दृढपरीक्षार्थं सर्वेषां पृथिवीक्षितां ॥ जनकेन समादिष्टाः प्रविश्य मिथिलां पुरीं ॥ न प्रनु वै पुरस्थत्यानि
जग्मुः पार्थिवालयात् ॥ शतानि पंच पुंसां तु व्यायतानां महात्मनां ॥ मंजूषामष्टचक्रां तां समूहुस्ते कथंच

न ॥ तामानीय तु मंजूषामायसीं यत्र तद्धनुः ॥ सुरोपमं तु जनकमूचुस्ते नृपमंत्रिणः ॥ इदं धनुर्वरं राज
न्सर्वलोकेषु पूजितं ॥ मिथिलायां महाभाग दर्शयेन्नं महामुने ॥ तेषां तद्वचनं श्रुत्वा कृतांजलिरुवाच ह ॥ विश्वा
मित्रं तदा राजा तौ चेभौ रामलक्ष्मणौ ॥ इदं धनुर्वरं ब्रह्मन् जनकैरभिपूजितं ॥ राजभिः सुमहावीर्यैर
शक्तैः पूरणे तदा ॥ नेदं सुरगणैः शक्यं असुरैर्वा महामुने ॥ गंधर्वयक्षप्रवरैः सकिन्नरम
होरगैः ॥ २० ॥ एकैको वा समस्तो वा शक्ता मतिमतां वर ॥ सज्जीं कर्तुं मुनिश्रेष्ठ कुत एव तु मा
नुषाः ॥ अगतिर्मानुषाणां हि धनुषोस्य प्रपूरणे ॥ आरोपणे समायोगे वेधने तोलनेपि वा ॥
तदेतद्धनुषां श्रेष्ठमानीतं मुनिगौरवात् ॥ दर्शयैतन्महाभाग त्वनयो राजपुत्रयोः ॥
विश्वामित्रस्तु धर्मात्मा श्रुत्वा जनकभाषितं ॥ अभ्यभाषत काकुत्स्थं प्रहृष्टेनांतरात्म
ना ॥ गृहाणेदं महाबाहो दिव्यं धनुरनुत्तमं ॥ धारणे कर्षणे चास्य यत्नमातिष्ठ राघव ॥
वत्स राम धनुः पश्यैतद्राघवमब्रवीत् ॥ मुनेस्तु वचनं श्रुत्वा यत्र तिष्ठति तद्धनुः ॥ मंज

ष्वां तामुपावृत्य दृष्ट्वा च धनुरब्रवीत् ॥ इदं धनुर्वरं दिव्यं संस्पृशाम्य घपाणिना ॥
यत्नवांस्तु भविष्यामि तोलने पूरणे तथा ॥ बाढमित्येव तं राजा मुनिश्च समभाषि
त ॥ सलीलमिव तद्रामो जग्राह वचनान्मुनेः ॥ पश्यतां च सहस्राणां बहूनां रघु
नंदनः ॥ आरोपयत्स धर्मात्मा सलीलमरिसूदनः ॥ आरोप्य च महाबाहुः पूरयामास वी
र्यवान् ॥३०॥ बभंज चैन नरश्रेष्ठो धनुर्मध्ये महायशाः ॥ तस्य शब्दोऽभवद्भीमो निर्घातसम
निस्वनः ॥ भूमिश्च कंपे सुमहा दीर्यमाणे गिराविव ॥ निपेतुश्च नराः सर्वे तेन शब्देन मोहिताः ॥
वर्जयित्वा मुनिवरं राजानं तौ च राघवौ ॥ प्रत्याश्वस्ते जने तस्मिन् राजा विगतसाध्वसः ॥ उ
वाच प्रांजलिर्वाक्यं वाक्यज्ञो मुनिपुंगवं ॥ भगवन्नकृतकीर्तिर्मे रामो दशरथात्मजः ॥ अत्यद्भु
तमचिंत्यं च अतर्कितमिदं मया ॥ जनकानां कुले कीर्तिमाहरिष्यति मे सुता ॥ सीता भर्तारमा
साद्य रामं दशरथात्मजं ॥ मम सत्या प्रतिज्ञा च वीर्यशुल्केति कौशिके ॥ सीता प्राणैर्बहुम

॥१०॥

तादेया रामाय मे सुता ॥ भवतोऽनुमते ब्रह्मन् शीघ्रं गच्छंतु मंत्रिणः ॥ मम कौशिक भद्रं ते अयो
ध्यां त्वरिता रथैः ॥ राजानं प्रश्रितैर्वाक्यैरानयंतु पुरं मम ॥ प्रदानं वीर्यशुल्कायाः कथयंतु च सर्व
शः ॥ मुनिगुप्तौ च काकुत्स्थौ कथयंतु नृपाय तु ॥ प्रीयमाणं तु राजानमानयंतु सुशीघ्रगाः ॥
कौशिकेन तथेत्युक्तो राजा त्वाभाष्य मंत्रिणः ॥४०॥ अयोध्यां प्रेषयामास धर्मात्मा मुनिशा
सनात् ॥ ॥ इत्यार्षे रामायणे बालकांडे धनुर्भंगो नाम सर्गः ॥ ५६ ॥ ॥ ६७ ॥
तथा च तत्समाख्यातुं आनेतुं च नृपं तदा ॥ जनकेन समादिष्टा दूतास्ते शीघ्रवाहनाः ॥ त्रिरा
त्रमुषिता मार्गे तेऽयोध्यां प्रविशन्पुरीं ॥ ते राजवचनाद्दूताः राजवेश्म प्रवेशिताः ॥ ददृशुर्देवसं
काशं वृद्धं दशरथं नृपं ॥ शासत्त्वजाः प्रशासंतं धर्मज्ञैः सचिवैर्वृतं ॥ कस्मिंश्चिद्दिवसे कारोवि
शिष्टोऽथैश्च मंत्रिभिः ॥ आशास्यमानं सुप्रीतैः शक्रमंगिरसैरिव ॥ तं लोकपालप्रतिमं लो
कपालसुनिश्चितं ॥ बध्वांजलिपुटाः सर्वे दूता विगतसाध्वसाः ॥ राजानं प्रयता वाक्यं मधुरं म

धुराक्षरं ॥ मैथिलो जनको राजन्सोऽग्निहोत्रपुरस्कृतः ॥ कुशलं चाप्ययं चैव सोपाध्यायपुरोहितम् ॥
मुहुर्मुहुर्मधुरया स्नेहसंयुक्तया गिरा ॥ नृपतिस्त्वां महाराज न्कुशलं परिपृच्छति ॥ पृष्ट्वा कुशल
मव्यग्रो वैदेहो मिथिलाधिपः ॥ कौशिकानुमतो वाक्यं वाक्यज्ञ इदमब्रवीत् ॥ विजितातेप्रति
ज्ञाते वीर्यशुल्का ममात्मजा ॥ राजानो विजिता रामो निर्वीर्ये विमुखीकृतैः ॥ नामिमां मत्सुतां राज
न्विश्वामित्रपुरस्सरः ॥१०॥ यदृच्छयागतो वीर्यान्तव निर्जितवान्कृतः ॥ तच्चदिव्यं धनुः श्रीमान्मध्ये
मध्ये महात्मना ॥ राघवेण महत्तेजो महत्यां जनसंसदि ॥ तस्मै सीता मया देया वीर्यशुल्का महाद्युते ॥ प्रति
ज्ञां तर्तुमिच्छामि तदनुज्ञातुमर्हसि ॥ पुत्रयोरुभयोरेवं प्रीतिं समुपलप्स्यसि ॥ एवं विदेहाधि
पतिर्वाक्यं मधुरमब्रवीत् ॥ विश्वामित्राभ्यनुज्ञातः शतानंदमते स्थितः ॥ इति दूतवचः श्रुत्वा राजा
परमहर्षितः ॥ सोपाध्यायश्च राजेंद्रः पुरस्कृत्य पुरोहितं ॥ वसिष्ठं वामदेवं च मंत्रिणोन्यांश्च सोऽब्र
वीत् ॥ गुप्तः कुशिकपुत्रेण कौसल्यानंदवर्धनः ॥ लक्ष्मणेन सह भ्रात्रा सं विदेहे षु तिष्ठति ॥ दृष्ट

मात्रे च काकुत्स्थे जनकः सुमहायशाः ॥ संप्रदानं सुतायाश्च राघवे कर्तुमिच्छति ॥ यदि वैरोच
ते वृत्तं जनकस्य महात्मनः ॥ गच्छामस्तां पुरीं शीघ्रं माभूत्कालस्य पर्ययः ॥ मंत्रिणो बाढमित्यू
चुः सह सर्वैर्महर्षिभिः ॥ प्रीतश्चाप्यभवद्राजा श्वोभूत इति चाब्रवीत् ॥ मंत्रिणो जनकस्या
पि रात्रिं परमसत्कृताः ॥ ऊषुः प्रमुदितास्तत्र सर्वकामैः सुपूजिताः ॥२०॥ ॥ इत्यार्षे रा
मायणे बालकांडे दूतवाक्यं नाम सर्गः ॥६७॥ ॥६॥ ॥ अथ रात्र्यां व्यतीता
यां सोपाध्यायः सबांधवः ॥ राजा दशरथो हृष्टः सुमंत्रमिदमब्रवीत् ॥ अद्य सर्वे धनाध्य
क्षाः धनमादाय पुष्कलं ॥ व्रजंत्वग्रे सुविहिता नानारत्नसमन्विताः ॥ चतुरंगबलं चापि शी
घ्रं निर्यातु सर्वशः ॥ ममाज्ञासमकालं च यानं युग्यमनुत्तमं ॥ वसिष्ठो वामदेवश्च जाबा
लिरथ काश्यपः ॥ मार्कंडेयश्च दीर्घायुर्मुनिः कात्यायनस्तथा ॥ एते द्विजाः प्रयांत्वग्रे स्यं

वाल्मी॰ रामा॰ बाल॰ ॥७२॥

दत्तं योजयाशु भोः ॥ यथा कालात्ययो न स्याद्दूता हि त्वरयन्ति माम् ॥ वचनान्तु नरेन्द्रस्य निर्ययौ च
तुरङ्गिणी ॥ राजानमृषिभिः सार्धं व्रजन्तं पृष्ठतोऽन्वयात् ॥ चतुर्भिस्स्तानहोरात्रैर्वैदेहानभ्युपेयि
वान् ॥ ददर्श मिथिलां रम्यां जनकेनोपशोभिताम् ॥ ततो राजानमासाद्य वृद्धं दशरथं तदा ॥ जनको
मुदितो राजा प्रहर्षं परमं ययौ ॥ उवाच च नरश्रेष्ठो नरश्रेष्ठं मुदान्वितः ॥ जनकश्श्लक्ष्णया वाचा
वृद्धं दशरथं नृपम् ॥ स्वागतं ते महाराज दिष्ट्या प्राप्तोऽसि राघव ॥ पुत्रयोरुभयोः प्रीतिः प्रणत
वीर्यनिर्जिता ॥१०॥ दिष्ट्या प्राप्तो महातेजा वसिष्ठो भगवानृषिः ॥ सह सर्वैर्द्विजगणैर्देवैरिव शत
क्रतुः ॥ दिष्ट्या मे निर्जिता विघ्ना दिष्ट्या मे पूजितं कुलम् ॥ राघवैः सह सम्बन्धो वीर्यश्रेष्ठैर्महाब
लैः ॥ श्वः प्रभाते तु राजेन्द्र निर्वर्तयितुमर्हसि ॥ यज्ञस्यान्ते महाराज विवाहमृषिसम्मतम् ॥ ततस्तद्व
चनं श्रुत्वा मुनिमध्ये नराधिपः ॥ वाक्यं वाक्यविदां श्रेष्ठः प्रत्युवाच महीपतिः ॥ प्रतिग्रहो दातृ
वशः श्रुतमेतत्पुरा मया ॥ यथा वक्ष्यसि धर्मज्ञ तत्करिष्यामहे वयम् ॥ तद्धर्मिष्ठं वरिष्ठं च वचनं स

सर्ग ॥७२॥

त्यवादिनः ॥ श्रुत्वा विदेहाधिपतिः परं विस्मयमागमत् ॥ ततः सर्वे मुनिगणाः परस्परसमाग
मे ॥ कथयन्तः कथां दिव्यां हृद्यां श्रोत्रसुखावहाम् ॥ परस्परस्वभावज्ञाः पूजयन्तः परस्परम् ॥ विश्वामि
त्रं तु दृष्ट्वैव राजा दशरथस्तदा ॥ शिरसा प्रणतो भूत्वा ववन्दे हृष्टमानसः ॥ भवन्तं नाथमासाद्य पू
तोऽस्मि तव तेजसा ॥ विश्वामित्रोऽपि चैवैनं प्रीतिमानिदमब्रवीत् ॥ पूत एवासि राजर्षे स्वकृतैः क
र्मभिः शुभैः ॥२०॥ अनेनापि च पुत्रेण रामेणामिततेजसा ॥ पूतोऽसि श्लाघनीयोऽसि देवानामपि
सङ्गमे ॥ एष ते नृपते पुत्रो रामो निर्यातितो मया ॥ लक्ष्मणेन सह भ्रात्रा कुशली रघुनन्दनः ॥
इत्युक्तो मुनिना राजा विश्वामित्रेण धीमता ॥ तौ चापि पुत्रावाघ्राय परिष्वज्य निपीडितौ ॥
हर्षेण महताविष्टस्तां निशामवतस्थिवान् ॥ स तैः पुत्रैः परिवृतो निशां परमहर्षितैः ॥ सुखो
वास प्रहृष्टः प्रीतो जनकेन सुपूजितः ॥ जनकोऽपि महातेजाः क्रिया धर्मेण धर्मवित् ॥ य
ज्ञस्य सुतयोश्चैव कृत्वा रात्रिमुवास ह ॥ रामं जामातरं लब्ध्वा हृष्टः परमधार्मिकः ॥

वाल्मी॰ रामा॰ बाल॰ ॥७३॥

ततः प्रभाते जनकः कृतकार्यः महर्षिभिः ॥ उवाच वाक्यं वाक्यज्ञः शतानंदं पुरोहितं ॥ भ्राता मम महातेजा
वीर्यवानतिधार्मिकः ॥ कुशध्वज इति ख्यातो योध्यासे नगरं शुभं ॥ चंपाचलकपर्यंतं पिबन्निक्षुमतीं
नदीं ॥ सांकश्यं दिव्यसंकाशं विमानमिव पुष्पकं ॥ तमहं द्रष्टुमिच्छामि यज्ञगोप्तारमेमतः ॥ प्रीतिं
सोपि महातेजाः प्रीतियुक्तो महायशाः ॥२॥ शासनात्तेन नरेंद्रस्य प्रयाताः शीघ्रवाहनाः ॥ आनयां
मासुरव्यग्रा विष्णुमिंद्राज्ञयेव तं ॥ आज्ञया तु नरेंद्रस्य आगतः स कुशध्वजः ॥ ददर्श च महात्मानं ज
नकं धर्मवत्सलं ॥ अभिवाद्य महात्मानं शतानंदं स पार्थिवं ॥ राजार्हं परमं दिव्यं अध्यारोहत दासनं ॥
उपविष्टो सुखासीनो महाभागो महाबलौ ॥ मंत्रिश्रेष्ठ सुदामानं प्रेषयामासतुस्ततः ॥ आमंत्रयस्व शी
घ्रं तमिक्ष्वाकुममितप्रभं ॥ आत्मजैः सह दुर्धर्षं सोपाध्यायं समंत्रिणं ॥ औपकार्यं कृतं तं तु इक्ष्वाकुकु
लनंदनं ॥ दृष्ट्वा दशरथं प्राह सोभिवाद्य महामतिः ॥ अयोध्याधिपते वीर वैदेहस्त्वां नरेश्वर ॥
द्रष्टुमिच्छति धर्मेण सोपाध्यायः सबांधवः ॥ मंत्रिश्रेष्ठवचः श्रुत्वा राजा सर्षिगणस्तदा ॥ सबंधु

राव ॥७३॥

रगमत्तत्र स राजा यत्र मैथिलः ॥ समासाद्य च राजानं सोपाध्यायगणैर्वृतं ॥ तं वाक्यं वाक्यकुशलो वैदे
हमिदमब्रवीत् ॥ विदितोयं महाराज त्विक्ष्वाकुकुलदैवतं ॥ वक्ता सर्वेषु कालेषु वसिष्ठो भगवानृषिः ॥४॥
विश्वामित्राभ्यनुज्ञातः सर्वैश्च परमर्षिभिः ॥ एष वक्ष्यति धर्मात्मा यथायोगं यथाक्रमं ॥ तूष्णींभूते
दशरथे वसिष्ठो वाग्विदां वरः ॥ उवाच वाक्यं वाक्यज्ञो वैदेहं सपुरोहितं ॥ अव्यक्तप्रभवो ब्रह्मा शाश्व
तो नित्य अव्ययः ॥ तस्मान्मरीचिः संजज्ञे मरीचेः कश्यपः सुतः ॥ मारीचिः कश्यपाज्जज्ञे विवस्वान्लोकभा
वनः ॥ मनुर्विवस्वतः पुत्र इक्ष्वाकुस्तु मनोः सुतः ॥ तमिक्ष्वाकुमयोध्यायां राजानं विधिपूर्वजं ॥ इक्ष्वाकु
स्तु सुतः श्रीमान् विकुक्षिः समपद्यत ॥ विकुक्षेस्तु महातेजा बाणः पुत्रः प्रतापवान् ॥ बाणस्य तु महातेजा
अनरण्यः प्रतापवान् ॥ अनरण्यात्पृथुर्जज्ञे त्रिशंकुस्तु पृथोरपि ॥ त्रिशंकोरभवत्पुत्रो धुंधुमारो महाय
शाः ॥ धुंधुमारस्ततो राजा युवनाश्वो महाबलः ॥ युवनाश्वसुतः श्रीमान्मांधाता पृथिवीपतिः ॥ मांधातु
सु महातेजाः सुगंधिः समपद्यत ॥ सुगंधे ध्रुवसंधिस्तु द्वितीयस्तु प्रसेनजित् ॥ यशस्वी ध्रुवसंधेस्तु भ
रतो नाम नामतः ॥ भरतात्तु महातेजा असितः समजायत ॥५॥ सह ते सागरेणैव तस्मात्स सगरो भवत् ॥

सगरस्यासमंजाभूद समंजस्कतोंशुमान्॥ दिलीपोंशुमतःपुत्रो दिलीपस्य भगीरथः॥ भगीरथात्ककुत्स्थस्तु क
कुत्स्थात्तु रघुस्मृतः॥ रघोस्तु वंशो तेजस्वी विवृद्धः पुरुषादकः॥ कल्माषपादो राजा भूत्तवनकस्तस्य चासजः॥
सुदर्शनस्तु खनखाद ग्निवर्णः सुदर्शनात्॥ शीघ्रगस्त्वग्निवर्णस्य शीघ्रगस्याभवन्मुनिः॥ मुनेः प्रसुस्तुको
स्यासीदंबरीषः प्रसुस्तुकात्॥ अंबरीषस्य पुत्रोभून्नहुषः पृथिवीपतिः॥ नहुषात्तु ययातिश्च नाभागस्तु
ययातिनः॥ अजो नाभागपुत्रस्तु तस्माद्दशरथो भवत्॥ नृपाद्दशरथाज्जातौ भ्रातरौ रामलक्ष्मणौ॥
कुलवंशानुरूपिण्यौ कुलवंशानुरूपयोः॥ रामलक्ष्मणयोरर्थे वरयामास जेतव॥ सदृशाभ्यां नरश्रेष्ठ
सदृशो दातुमर्हसि॥ ५८॥ ॥ इत्यार्षे रामायणे बालकांडे वंशाकीर्त्तनो नाम सर्गः॥ ॥७०॥ ॥
एवमुक्तोथ जनकस्समुवाच कृतांजलिः॥ श्रोतुमर्हसि धर्मज्ञ कुलंनः श्रृण्वतां वर॥ प्रदाने षु थवक्त
व्यं कुलं निरवशेषतः॥ वक्तव्यं कुलजातेन तन्निबोध नरेश्वर॥ राजाभूत्त्रिषु लोकेषु विश्रुतस्वेन कर्मणा॥
निमिः परमधर्मात्मा सर्वसत्ववतां वरः॥ तस्य पुत्रो मिथिर्नाम जनितो नेमिपर्वते॥ प्रथमो जनको नाम
जनकात्तुरुदावसुः॥ उदावसोस्तु धर्मात्मा महावीर्योभ्यजायत॥ महावीर्यस्य धृतिमान्सुधृतिस्तस्य

चात्मजः॥ सुधृतेरपि धर्मात्मा धृष्टकेतुरजायत॥ धृष्टकेतोस्तु का कुत्स्थ हर्यश्व इति विश्रुतः॥ हर्यश्वस्य
मरुस्तुत्रो मरुस्तुत्रात्प्रतंधकः॥ प्रतंधकस्य धर्मात्मा राजा कीर्त्तिरथः सुतः॥ पुत्रः कीर्त्तिरथस्यापि देवमीढ इतिस्मृ
तः॥ देवमीढस्य विबुधो विबुधस्य महींधकः॥ महींधकसुतो राजा कीर्त्तिरातो महाबलः॥ कीर्त्तिरातस्य काकुत्स्थ
महारोमाभ्यजायत॥ महारोम्णस्तु धर्मात्मा ह्रस्वरोमाभ्यजायत॥ सुवर्णरोमा को कुत्स्थ ह्रस्वरोम्णोभ्यजायत॥
॥१०॥ यस्य पुत्र द्वयं राजन् धर्मज्ञस्य महात्मनः॥ तस्य ज्येष्ठोहमनुजो मम भ्राता कुशध्वजः॥ मां नियोज्य स्तुतं रा
ज्ये विनियुज्य नराधिप॥ कुशध्वजं समावेश्य भ्रातरं मे वनं गतः॥ गते पितरि तस्मिंस्तु स्वर्गमावृत्य तिष्ठति॥
भ्रातरं देवसंकाशं पालयामि कुशध्वजं॥ कस्यचित्त्वथ कालस्य संकाश्यादागमत्पुरा॥ सुधन्वा वीर्यवा
न्राजा मिथिलामवरोधकः॥ सच मे प्रेषयद्दूतं शैवं धनुरनुत्तमं॥ प्रेषयाशु नरश्रेष्ठ रत्नभूतं ममेस्थितं॥
तस्याप्रदाने का कुत्स्थ युद्धमासीन्मयासह॥ हतश्च प्रमुखे राजा मिथिलामवरोधकः॥ निहत्य च नरश्रे
ष्ठ सुधन्वानं नराधिपं॥ सांकाश्ये भ्रातरं शूरमभ्यषिंचं कुशध्वजं॥ कनीयानेष मे भ्राता ज्येष्ठोस्याहं महाय
शः॥ ददामि परमप्रीतो पुत्रौ ते रघुनंदन॥ सीतां रामाय भद्रं ते लक्ष्मणाय तथोर्मिलां॥ वीर्यशुल्कां मया दत्तां सीतां॥

तां सुरसुतोपमां ॥ इति कन्ये प्रयच्छामि निर्वदामि न संशयः ॥ प्रदानं वानयो वद्धो धर्मेणेक्ष्वाकुनंदन ॥ २०॥
रामलक्ष्मणयो राजन्कुरु गोदानमुत्तमं ॥ पितृकार्यं च भद्रं ते ततो वैवाहिकं कुरु ॥ मया पितुर्महाबाहो तृती
ये दिवसे शुभे ॥ फल्गुनी विषये राजन्कार्यं कन्याप्रवर्जनं ॥ यथावस्तु त्रयो वीर धर्मकार्यं सुखोदयं ॥ क्रियतो
दैवपूर्वं हि प्रथमं कार्यमुत्तमं ॥ उक्तवाक्ये तु वैदेहे विश्वामित्रो महामुनिः ॥ उवाच वचनं वीरो वसिष्ठसहि
तं नृपं ॥ अचिंत्यान्यप्रमेयानि कुलानि कुलपुंगव ॥ नेक्ष्वाकुविदेहानां तेषां तुल्योस्ति कश्चन ॥ सीताया
उर्मिलायाश्च रामलक्ष्मणयोरिति ॥ वक्तव्यं ते नरश्रेष्ठ वचनं श्रूयतामिति ॥ भ्राता ह्येष यवीयांस्ते धर्मा
त्मा हि कुशध्वजः ॥ अस्य धर्मात्मनो नित्यं रूपेणाप्रतिमे भुवि ॥ सुताद्वयं नरश्रेष्ठ वधूर्थं वरयामहे ॥ भरत
स्य कुमारस्य शत्रुघ्नस्य च धीमतः ॥ इत्युक्त्वा मुनिशार्दूलो वरयामास तु नृपं ॥ पुत्रौ दशरथस्येतौ रूपयौ
वनशालिनौ ॥ भरतश्च महातेजाः शत्रुघ्नश्चापराजितः ॥ तयोरर्थे महाराज भवंतं वरयामहे ॥ कुशध्व
ज सुताभ्यां च प्रदानमभिरोचय ॥ उभयं हि नरश्रेष्ठ संबंधेनानुरुंध्यतो ॥ २१॥ इक्ष्वाकुकुलमव्यग्रं भवतश्च
यशस्विनः ॥ विश्वामित्र वचः श्रुत्वा वसिष्ठस्य च भाषितं ॥ जनकः प्रांजलिर्वाक्यमुवाच मुनिपुंगवौ ॥ सदृशं कु

लसंबंधान्कृतं नेवनौ अनुग्रहं ॥ एवं भवतु भद्रं वः कुशध्वज सुते इमे ॥ पत्न्यौ भजेतां सहितौ शत्रुघ्नभरतावुभौ ॥ ए
काह्नैव सर्वासां कन्यानां मुनिपुंगवौ ॥ पाणिं गृह्णंतु चत्वारो राजपुत्रा महाबलाः ॥ उत्तरे दिवसे ब्रह्मन्फाल्गुनीभ्यां
मनीषिणः ॥ वैवाहिकं प्रशंसंते भग सत्र तु दैवतं ॥ एवमुक्त्वा वचः सौम्यं प्रत्युत्थाय कृतांजलिः ॥ उभौ मुनिवरौ राजा
जनको वाक्यमब्रवीत् ॥ परं धर्मः कृतः सर्वे शिष्योहं भवतां सदा ॥ सामान्यासे वलेश्चैव परवानस्मि चिंत्यतां ॥ रा
ज्ञो दशरथस्येयं यथायोध्या तथा पुरी ॥ प्रभुत्वे नास्ति संदेहो यथेष्टं कर्तुमर्हथ ॥ एवं ब्रुवति वैदेहे जनके रघुनंद
नः ॥ राजा दशरथो हृष्टः प्रत्युवाच महीमहीपतिं ॥ युवामसंख्येयगुणौ भ्रातरौ मिथिलेश्वर ॥ उक्तमोराजर्षी
णौ युवाभ्यामभिपूजितः ॥ ५०॥ स्वस्तिप्राप्नुहि भद्रं ते गमिष्यामि स्वमालयं ॥ शेषकर्माणि सर्वाणि विधास्य
इति चाब्रवीत् ॥ आपृच्छ्य तं पुरस्कृत्य मुनिं दशरथोययौ ॥ स गत्वा निलयं राजा श्राद्धं कृत्वा हि पुष्कलं ॥ पुत्रा
र्थे प्रियपुत्रः स चक्रे गोदानमुत्तमं ॥ गवां शतसहस्राणि विधास्य इति चाब्रवीत् ॥ आपृच्छ्य जनकं राजा दान
मभ्युद्यतं तथा ॥ गवां शतसहस्राणि चत्वारि पुरुषर्षभः ॥ एकैकशो ददौ राजा पुत्रानुद्दिश्य धार्मिकः ॥ सुवर्ण
शृंगीः सुछिन्नाः सवत्साः कांस्यदोहनाः ॥ वित्तमन्यच्च सुबहु द्विजेभ्यो रघुनंदनः ॥ ददौ गोदानमुद्दिश्य पुत्राणां

॥७६॥

पुत्रवत्सलः॥ स सुतैः कृतगोदानैर्वृतस्तु नृपतिस्तदा॥ लोकपालैरिवाभाति वृतः सौम्यः प्रजापतिः॥ मुमुदे
तत्र सुप्रीतः स्वर्गे शक्र इवामरैः॥ यमेव दिवसं राजा चक्रे गोदानमुत्तमं॥ तमेव दिवसं शूरो युधाजिदुपयातवा
न्॥ पुत्रः केकयराजस्य साक्षाद्भरतमातुलः॥ दृष्ट्वा पृष्ट्वा च कुशलं राजानमिदमब्रवीत्॥ केकयाधिपती
राजन्स्नेहात्कुशलमब्रवीत्॥५०॥ येषां कुशलकामः स तेषां प्रत्यनामयं॥ स्वस्रीयं मम राजेंद्र द्रष्टु
कामो महीपतिः॥ तदर्थमुपयातोहमयोध्यां रघुनंदन॥ श्रुत्वा त्वहमयोध्यायां विवाहेषु समागमं॥ त्वरयाभ्यु
पयातोस्मि द्रष्टुकामः स्वसुः सुतं॥ अथ राजा दशरथः प्रियातिथिमुपस्थितं॥ दृष्ट्वा परमसत्कारैः पूजा
र्हमपूजयत्॥ ततस्तामुषितो रात्रिं सह पुत्रैर्महात्मभिः॥ मुनिं तदा पुरस्कृत्य यज्ञवाटमुपागमत्॥
युक्ते मुहूर्ते विजये सर्वाभरणभूषितैः॥ कृतकौतुकमांगल्यैः पुत्रैर्दशरथो वृतः॥ वसिष्ठमग्रतः कृत्वा
सर्वांश्चैव द्विजर्षभान्॥ उपगम्य वसिष्ठस्तु वैदेहमिदमब्रवीत्॥ राजा दशरथो राजन्कृतकौतुकमंग
लः॥ पुत्रैर्नरवरश्रेष्ठ दातारमभिकांक्षति॥ दातृप्रतिग्रहीतृभ्यां सर्वार्थाः प्रभवंति हि॥ स्वधर्मं प्रतिपद्यस्व
कुरुष्वैवाहमुत्तमं॥ इत्युक्तः परमोदारं वसिष्ठेन महात्मना॥ प्रत्युवाच महातेजा वाक्यं परमधर्मवित्॥ प्रतीहा

श्री
राब
॥७६॥

रस्थितः कामेकस्यां त्रीसंप्रतीच्छथ॥६०॥ स्वगृहे को विचारस्ते यथा राज्यमिदं तव॥ कृतकौतुकसर्वस्वा
वेदीमूलमुपागताः॥ मम कन्या मुनिश्रेष्ठ वह्नेर्दीप्ता इवार्चिषः॥ सज्जोस्मि त्वत्प्रतीक्षोस्मि वेद्यामस्मिन्व
स्थितः॥ अविघ्नं कुरु राजेंद्र किमर्थं च विलंबसे॥ तद्वाक्यं जनकेनोक्तं श्रुत्वा दशरथो नृपः॥ प्रवेशयामास
ततः सर्वानृषिगणान्नृपः॥ ततो राजा विदेहानां उवाच रघुनंदनं॥ राम कमलपत्राक्षं पूर्वमेव महायशाः॥
इयं सीता नरश्रेष्ठ सह धर्मचरी तव॥ गृहाण पाणिना पाणिं त्वमस्या रघुनंदन॥ लक्ष्मणागच्छ भद्रं ते ऊर्मिला
याः परंतप॥ गृहाण पाणिना पाणिं मा भूत्कालस्य पर्ययः॥ स एवमुक्त्वा जनको भरतं प्रत्यभाषत॥ गृहीष्व पा
णिना पाणिं मांडव्या रघुनंदन॥ शत्रुघ्नायेच धर्मात्मा यथापूर्वं जनेश्वरः॥ श्रुतकीर्त्या महाबाहो पाणिं गृह्णी
ष्व पाणिना॥ सर्वे भवंतः सहिता दीर्घकालमनिंदिताः॥ पत्नीः संपरिगृह्णीध्वं मा भूत्कालस्य पर्ययः॥ जन
कस्य वचः श्रुत्वा कुमारा रघुनंदनाः॥७०॥ चत्वारस्ते चतसृणां शतानंदमतेस्थिताः॥ अग्निं प्रदक्षि
णी चक्रुर्वेदीं राजानमेव च॥ ऋषींश्च सुमहात्मानः सुभार्या रघुनंदनाः॥ पुष्पवृष्टिर्महत्यासीदंतरिक्षे
सुभास्वरा॥ शंखदुंदुभिनिर्घोषैः गीतिशब्दश्च शुश्रुवे॥ ननृतुश्चाप्सरो हृष्टाः गंधर्वाश्च जगुः कलं॥

वा॰मी॰रामा॰ बा॰ विवाहे रघुमुख्यानां तदद्भुतमिवाभवत्॥ तस्मिंश्च वर्तमाने तु तूर्योद्घुष्टनिनादिते॥ त्रिरग्निं ते परिक्रम्य प्रतिजग्मु
॥७७॥ र्यशस्विनः॥ अथोपकार्यं विविशुः प्रहृष्टा रघुनंदनाः॥ राजाप्यनुययौ पश्चात्सर्षिसंघः सबांधवः॥ अथ दश
रथनामा भूपतिः स बभासे परिवृत इति पुत्रैर्वधूभिः समेतैः॥ शशधर इव मेघैर्युक्त बिंबावलैर्वियमव
रुणकुबेरैराप्तकीर्तासमेतैः॥ ॥७६॥ ॥ इत्यार्षे रामायणे बालकांडे विवाहप्रसंगो नाम सर्गः॥ ५१॥ ॥
॥ ७॥ ॥ अथ रात्र्यां व्यतीतायां विश्वामित्रो महामुनिः॥ आपृच्छ्य तौ नरव्याघ्रौ जगामोत्तरपर्वतं॥ विश्वामि
त्रे गते चापि वैदेहं मिथिलाधिपं॥ आपृच्छ्याथ जगामाशु राजा दशरथः पुरीं॥ अथ राजा विदेहानां
ददौ कन्याधनं बहु॥ कंबलादीनि वस्त्राणि क्षौमयश्चांबराणि च॥ गवां शतसहस्राणि बहूनि मिथिलाधिपः॥
पदात्यश्वद्विपरथान् दिव्यरूपानलंकृतान्॥ हिरण्यस्य सुवर्णस्य दासीनां च शतं शतं॥ ददौ परमसंहृष्टः रा॰ बं॰
कन्याधनमनुत्तमं॥ दत्वा बहुविधं राजा समनुज्ञाप्य पार्थिवं॥ प्रविवेश स्वनिलयं मिथिलां मिथिलेश्वरः॥ ॥७७॥
राजाप्ययोध्याधिपतिः सह पुत्रैर्महात्मभिः॥ ऋषीन्सर्वान्पुरस्कृत्य जगामाशु महाबलः॥ कृतोद्वाहं तु गच्छं
तं सर्षिसंघं सबांधवं॥ घोराः पक्षिगणा वाग्भिः प्रत्याशंसुः समंततः॥ सौम्याश्चापि मृगा भौमाः गच्छंति स्म प्रदक्षि

णं॥ तान्दृष्ट्वा राजशार्दूलो वसिष्ठं प्रत्यभाषत॥ भगवन्पश्य तामेतानुत्पातान्सुदारुणान्॥ दिशश्च सर्वा भगव
न्धूमोत्पातसमाकुलाः॥ परिवेषस्तथा सूर्ये दृश्यते सुमहानपि॥ तमसा च नभः सर्वं न प्रज्ञायत किंचन॥ दृष्ट्वा
भयमुपक्लिष्टं हृदयं मम चाभवत्॥ ब्रूहि मे विदितज्ञान भगवन्को ह्ययं विधिः॥ नान्यो वक्तुमिदं शक्तस्त्वदृते
मुनिसत्तम॥ किमनिष्टं महद्दुःखं न्यक्ष्यामि सुमहद्भयं॥ असौम्याः पक्षिणः सव्या मृगाश्चापि प्रदक्षिणाः॥
किमयं हृदयोत्कंपो हृदयं मे विषीदति॥ राज्ञो दशरथस्यैतच्छ्रुत्वा वाक्यं महानृषिः॥ उवाच मधुरां वाणीं श्रू
यतामस्य यत्फलं॥ उपस्थितं भयं घोरं दिव्यं पक्षिमुखाच्युतं॥ मृगाः प्रशमयंत्येते संतापस्त्यज्यतामयं॥ तयोः
संवदतोस्तत्र वायुः प्रादुर्बभूव ह॥ कंपयन्मेदिनीं सर्वां सपर्वतवनां शुभां॥ तमसा संवृतः सूर्यो न प्रज्ञाय
त किंचन॥ भस्मनेवावृतं सर्वं संमूढमिव तद्बलं॥ वसिष्ठो ऋषयश्चान्ये राजा च ससुतस्तदा॥ विसंज्ञा इव
तत्रासन्सर्वे चान्ये च विचेतसः॥ तस्मिंस्तमसि घोरे तु भस्मछन्नेव सा चमूः॥ ददर्श भीमकर्माणं जटामंड
लधारिणं॥ २०॥ कैलासमिव दुर्धर्षं कालाग्निमिव दुःसहं॥ ज्वलंतमिव तेजोभिर्दुर्निरीक्ष्यं पृथग्जनैः॥ स्कंधा नि
सक्तपरशुं धनुर्विद्युद्गणोपमं॥ प्रगृहीतशरं रामं त्रिपुरघ्नं यथा हरं॥ तं दृष्ट्वा भीमकर्माणं ज्वलंतमिव पावकं॥

वसिष्ठप्रमुखा विप्रा जपहोमपरायणाः॥ संगताश्चर्षयः सर्वे संजजल्पुरथो मिथः॥ कच्चित्क्षत्रवधामर्षी
क्षत्रं नोत्सादयेत्पुनः॥ पूर्वं क्षत्रवधं कृत्वा गतमन्युर्गतज्वरः॥ क्षत्रियस्योदनं भूयो मारव्वस्य चि। कीर्षितं॥
एवमुक्त्वार्घमादाय भार्गवं भीमदर्शनं॥ ऋषयो राम रामेति तदा मधुरमब्रुवन्॥ प्रतिगृह्य तु तां पूजां जा
मदग्न्यः प्रतापवान्॥ ज्वलज्ज्वलनसंकाशस्तेजसा मोहयन्निव॥ रामं दाशरथिं रामः समुपेत्याभ्यभाष
त॥ राम दाशरथे वीर श्रूयते ते महद्बलं॥ धनुषो भेदनं सर्वं निखिलेषु मया श्रुतं॥ तदद्भुतमचिंत्यं च ध
नुषो भेदनं त्वया॥ श्रुत्वाहं समनुप्राप्तो गृहीत्वेतन्महद्धनुः॥ तदिदं समनुप्राप्तं जामदग्न्यं महद्धनुः॥ स्व
सशरं पश्य रामत्वं स्वबलं दर्शयस्व मे॥ तदहं ते बलं ज्ञात्वा धनुषोस्य प्रपूरणे॥ धनू रामप्रदास्यामि वीर्यश्लाघ्य
वतस्तव॥ तस्य तद्वचनं श्रुत्वा राजा दशरथस्तदा॥ विषण्णवदनस्तत्र स्तः प्रांजलि दीनमब्रवीत्॥ क्षात्राद्रो
षात्प्रशांतस्त्वं ब्राह्मणश्च महायशाः॥ बालानां मम पुत्राणां नाभयं कर्तुमर्हसि॥ भृगूणां हि कुले जातः
स्वाध्यायव्रतशालिनां॥ सहस्राक्षे प्रतिज्ञाय शस्त्रं निक्षिप्तवानसि॥ सत्वं धर्मपरो भूत्वा काश्यपाय व ॥७८॥

सुंधरां॥ दत्वा वनमुपागम्य महेंद्रकृतकेतनः॥ मम सर्वविनाशाय संप्राप्तः किं महामुने॥ न चैक
स्मिन्हते रामे सर्वे जीवामहे वयं॥ ब्रुवत्येवं दशरथे जामदग्न्यः प्रतापवान्॥ अनादृत्य तु तद्वाक्यं राममे
वाभ्यभाषत॥ द्वे एव धनुषी रत्ने दिव्ये त्रैलोक्यविश्रुते॥ दृढे बलवती मुख्ये सुकृते विश्वकर्मणा॥ अति
सृष्टं सुरैरेकं त्र्यंबकाय युयुत्सवे॥ त्र्यंबकस्य च विष्णोश्च प्रायच्छन्नमितौजसोः॥ पुरा धन्ते मुनिश्रे
ष्ठ भग्नं काकुत्स्थ यत्त्वया॥ धर्मायमपि दुर्धर्षं विष्णवेय ददुः सुराः॥ ४०॥ समानसारं काकुत्स्थ रौद्रेण
धनुषान्वितं॥ दत्वा च देवताः सर्वाः पृच्छंति स्म पितामहं॥ शितिकंठस्य विष्णोश्च धनुषोश्च बलाबलं॥
अभिप्रायं विदित्वा तु देवतानां पितामहः॥ विरोधं जनयामास तयोः सत्ववतां वरः॥ विरोधे सुमहद्युद्ध
मभवल्लोमहर्षणं॥ शितिकंठस्य विष्णोश्च परस्परजयैषिणोः॥ तस्य तत्तूरितं शैवं धनुर्भीमपराक्रमं॥
हुंकारेण महादेवं स्तंभयामास केशवः॥ देवतैस्तु समागम्य सर्षिसंघैः सचारणैः॥ याचितो नप्रहतवान्
विष्णुर्बलवतां वरः॥ जितं हि धनुषा सार्धं शिवे विष्णुपराक्रमात्॥ अधिकं मेनिरे विष्णुं देवाः सर्षिग
णास्तदा॥ ततस्तु रुद्रः संक्रुद्धो विदेहेषु महायशाः॥ देवरातायदेवेशो ददौ संन्यासमायुधं॥ इदं च वैष्ण

 वं राम धनुः परमपूजितं॥ ऋचीके भार्गवे प्रादाद्विष्णुः संन्यासमुत्तमं॥ ऋचीकस्तु महातेजाः पुत्रायाप्रद्रु
॥७५॥ तकर्मणे॥ पित्रे ममददौ दिव्यं कार्मुकं जमदग्नये॥ ५०॥ न्यस्तशस्त्रे पितरि मे तपोदमसमन्विते॥ अर्जुनो
विदधे मृत्युं प्राकृतां बुद्धिमास्थितः॥ बधमप्रतिमं श्रुत्वा पितुस्तस्य महात्मनः॥ क्षात्रमुत्सादितं क्रो
धाज्जातं जातमनेकधा॥ पृथिवीमखिलां जित्वा कश्यपाय महामुने॥ यज्ञस्यान्ते हमददां दक्षिणां पुण्य
कर्मिणे॥ ततो महेंद्रनिलयात्तपोबलसमन्वितः॥ एवं ब्रुवाणे वचनं महामुनौ युगांतकालो च्छलितां बुभै
रवौ॥ क्षणेन सर्वं सचराचरं जगद्भयाच्च कंपे सहदेवदानवैः॥ ५४॥ ॥ इत्यार्षे रामायणे बाल
कांडे रामरामसमागमो नाम सर्गः॥ ॥७५॥ ॥ श्रुत्वा तु वचनं तस्य वाक्यं दशरथा
त्मजः॥ गौरवाद्यंत्रितकथो रामरामो मथाब्रवीत्॥ श्रुतवानस्मि ते कर्म कृतं यत्तत्पुरातनं॥ ननेस्रूया राम
मिते ब्रह्मन् पितुरानृण्यकारिणः॥ वीर्यहीनमिदं यत्तु क्षत्रधर्मेण भार्गव॥ प्रतिरुध्द्वामि तेजोस्य ॥७६॥
पश्यमे तत्रपौरुषं॥ इत्युक्त्वा राघवो वाक्यं भार्गवस्य वरायुधं॥ सतज्जग्राह तेजस्वी कुद्दो हीत्वाश्रुपरा
क्रमः॥ आरोप्य रामस्तु धनुः शरमारोप्य कांचनं॥ जामदग्न्यमसंभ्रांतो राघवो वाक्यमब्रवीत्॥

ब्राह्मणोसीति पूज्योमे विश्वामित्रकृतेन च॥ शक्तोपि तेन मुंचेयं अहं प्राणहरं शरं॥ इमां स्तव कृते
राम तपोबलसमन्वितान्॥ लोकान् प्रजितांश्चापि बधिष्यामि यदीच्छसि॥ न ह्ययं वैष्णवो दिव्यः
शरः परपुरंजयः॥ मोघः पतति वीरेषु बलदर्पविनाशनः॥ वरायुधधरं रामं देवाः सर्षिगणास्तदा
दा॥ पितामहं पुरस्कृत्य समेतास्तत्र सर्वशः॥ गंधर्वाप्सरसश्चैव सिद्धचारणकिंनराः॥ य
क्षराक्षसनागाश्च तद्द्रष्टुं महदद्भुतं॥ ६०॥ एकीभूते तदा लोके रामे चापि धनुर्धरे॥ निर्वीर्यो
जामदग्न्योथ रामो राममुदैक्षत॥ तेजोपहतवीर्यश्च जामदग्न्यो जडीकृतः॥ रामं कमलप
त्राक्षमिदं मंदमुवाचह॥ कश्यपाय पुरा दत्ता मयाराम वसुंधरा॥ विषये मे न वस्तव्यमिति
वै काश्यपोब्रवीत्॥ सोहं गुरुवचः श्रुत्वा न वसाम्यवनीं भुवि॥ हीनप्रतिज्ञः काकुत्स्थ तस्य कश्य
पसंस्थया॥ इमां मम गतिं तात न हंतुमर्हसि राघव॥ मनोजवो गमिष्यामि महेंद्रं पर्वतोत्तमं॥
लोकास्त्वप्रतिमाराम निर्जितास्तपसा मया॥ जहि तान् शरमुख्येन माभूत्कालस्य पर्ययः॥
अक्षय्यं मधुहंतारं जाने त्वाहं सुरोत्तमं॥ धनुषोस्य परामर्शात्स्वस्ति तेस्तु परंतप॥ ७०॥ एते सुर

गणाः सर्वे निरीक्ष्य ते समागताः॥ त्वामप्रतिमकर्माणमप्रतिद्वंद्वमाहवे॥ नचेयं मम काकुत्स्थ
व्रीडा भवति कर्हिचित्॥ त्वया त्रैलोक्यनाथेन यदहं विमुखीकृतः॥ शरैश्चाप्रतिमं राम मोक्तुमर्ह
सि धार्मिक॥ शरमोक्षे गमिष्यामि महेंद्रपर्वतोत्तमं॥२०॥ रामेति ब्रुवते चैवं जामदग्न्ये प्रता
पवान्॥ रामो दाशरथिः श्रीमांश्चिक्षेप शरमुत्तमं॥ आसन्वितिमिराः सर्वा दिशः प्रतिदिशस्तथा॥
प्रववुश्च शिवा वाता मृगाश्च शुभनिस्वनाः॥ सुराः सर्षिगणाश्चैव प्रशशंसुर्नृपात्मजं॥ रा
मो दाशरथिं रामं प्रशस्य रघुनंदनं॥ प्रदक्षिणीकृत्य ततो जगामात्मगतिस्तथा॥२४॥ गते
रामे प्रशांतात्मा रामो दाशरथिर्धनुः॥ वरुणायाप्रमेयाय ददौ हस्ते महायशाः॥ अभिवाद्य त
तो रामो वसिष्ठप्रमुखानृषीन्॥२५॥ पितरं विह्वलं वाक्यमुवाच रघुनंदनः॥ जामदग्न्यो ग
तो रामः प्रयातु चतुरंगिणी॥ अयोध्याभिमुखी सेना त्वया नाथेन पालिता॥ रामस्य तद्वचः श्रु ॥८०॥
त्वा राजा दशरथः सुतं॥ बाहुभ्यां संपरिष्वज्य मूर्ध्नि चाघ्राय राघवं॥ गतो राम इति श्रुत्वा प्रा

प्य हर्षमनुत्तमं॥ चोदयामास तां सेनां जगामाशु ततः पुरीं॥ पताकाध्वजिनीं रम्यां तूर्योद्घुष्ट
निनादितां॥ सिक्तराजपथां कृत्स्नां प्रकीर्णकुसुमोत्करां॥ राजप्रवेशाभिमुखैः पौरैर्मंगलवादि
भिः॥३०॥ प्रकीर्णमाविशद्राजा पुरं चक्रे निवेशनं॥ कौसल्या च सुमित्रा च कैकयी च सुमध्य
मा॥ वधूप्रतिग्रहे युक्ता याश्चान्या राजयोषिताः॥ ततः सीतां श्रीप्रतिमां मूर्मिलां च यशस्वि
नीं॥ कुशध्वजसुते चोभे जगृहुर्नृपपत्नयः॥ मंगलालंभनैश्चैव शोभिताः क्षौमवाससः॥
देवतायतनान्यादौ सर्वास्ताः परिचक्रमुः॥ अभिवाद्याभिवाद्यांश्च सर्वा राजसुतास्तथा॥३४॥
रेमिरे मुदितास्तत्र भर्तृप्रियहिते रताः॥ कृतदाराः कृतास्त्राश्च सधनाः ससुहृज्जनाः॥
शुश्रूषमाणाः पितरं वर्त्तयंति नरर्षभाः॥ तेषामतिशयो लोके रामः सत्यपराक्रमः॥
स्वयंभूरिव भूतानां बभूव गुणवत्तरः॥ रामस्तु सीतया सार्धं विजहार बहून्नृतून्॥३७॥

मनश्चतद्गतंतस्यनित्यंहृदिसमर्पितः॥ प्रियातुसीतारामस्यदाराःप्रियकृताइव॥ गुणा
रूपगुणाश्चापिपुनर्भूयोविवर्धिताः॥ तस्यापिभात्राद्विगुणाद्गुणाढ्योहृदयेस्थितः॥
अनाख्यातमपिव्यक्तंआख्यातहृदयंहृदि॥ तस्यभूयोविशेषेणमैथिलीजनकात्मजा॥
देवताभिःसमारूपेसीताश्रीरिवरूपिणी॥ तयासराजर्षिवरोभिकामयासमेयिवा
नुत्तमराजकन्यया॥ अतीवरामःशुशुभेभिरामयाशचीवपूर्णोदिविदक्षकन्यया॥ ॥
॥ ॥४२॥ ॥ इतिश्रीमदार्षेरामायणेवाल्मिकिविरचितेबालकांडेदशरथवर
प्रदोनामयथासंख्यःसर्गः॥ ॥ ॥ ॥ श्रीमल्लक्ष्मीवेंकटेशार्पणमस्तु॥ ॥

इपुस्तकबंकापुरदरंगगमुद्दसतक्ळदु

अथ वासिष्ठरामायणे षट्प्रकरणात्मके ब्रह्मविद्यायां प्रकरणसर्गानुक्रमः। तत्र सर्गारंभपत्राणि लिख्यंते

91/15

९१/१५

[illegible]

[illegible]

15
16